यश्चेति ॥ (च) किंचेति चकारार्थः । यः हिमाद्रिः (अप्सरोविभ्रम-मण्डनानां) अप्सरसां विभ्रममण्डनानि विलासालंकरणानि । अथवा विभ्रमो विपरीतन्यासः । विभ्रमस्त्वरयाकाले भूषास्थानविपर्ययः । इति दशरूपकात् ॥ तेन मण्डनानि तेषां संपादयित्रीम् । एतद्धातुरागदर्शिन्योऽप्सरसः संध्याभ्रमेण प्रसाधनाय त्वरन्त इति भावः ॥ तथात्वे भ्रान्तिमदलंकारो व्यज्यते ॥ कर्तृकर्मणोः कृति इति कर्मणि षष्ठी ॥ (बलाहकच्छेदविभक्तरागां) वारीणां वाहका बलाहकाः ॥ पृषोदरादित्वात्साधुः ॥ तेषां छेदेषु खण्डेषु विभक्तः संक्रमितो रागो यया ताम् । एतेनाद्रेरभ्रंकषत्वं गम्यते ॥ इदं विशेषणद्वयं संध्यायामपि योज्यम् ॥ धातवः सिन्दूरगैरिकादयोऽस्य सन्तीति धातुमान् । नित्ययोगे मतुप् ॥ तस्य भावो धातुमत्ता तां (धातुमत्ताम्) धातुयोगित्वमिति सम्बन्धोऽपि वाच्यार्थः ॥ समासकृत्तद्धितेषु संबन्धाभिधानं भावप्रत्ययेन इति वचनात् । लक्षणाया नित्यानुषङ्गिकधातुमित्यर्थः ॥ अकालसन्ध्यामिव अनियतकालप्राप्तसन्ध्यामिव शिखरैः बिभर्ति धत्ते ॥ अत्र संध्याशब्दस्य जातिवाचित्वाज्जात्युत्प्रेक्षा ॥

Notes—अप्सरोविभ्रममण्डनाम्, n. gen. plu. 'of the amorous decorations of the nymphs.' अप्सरस्, f. *Vide infra* 3. 17. also. "In the last mythological epoch when the Gandharvas have saved from their mythological nature only so much as to be the musicians in the paradise of Indra, the *apsaras* appear amongst other subordinate deities which share in the merry life of Indra's heaven, as the wives of Gandharvas but more especially as wives of a licentious sort, and they are promised therefore, too, as a reward to heroes fallen in battle when they are received in the paradise of Indra." Theodore Goldstucker in his G. *L.* p. 223.

विभ्रम, m. 'an amorous movement.' The second sense noted by the comm. and supported by a text from Dasrupaka is that of 'putting of ornaments on wrong places through flurry.' This sense, too, is quite suitable, only it is technical. **संपादयित्रीम्**, f. acc. sing. goes with धातुमत्ताम्, 'the producer, the accomplisher of.' अप्सरोविभ्रम-मण्डनानां is governed by the verb 'to produce' in संपादयित्री being the *logical* object of the same. The *logical* object is put in the gen. since संपादयित्री is a fem. कृत्. Cf. कर्तृकर्मणोः कृति Pan. 2, 3, 65. **बिभर्ति**, लट्. 3rd per. sing. from √ भृ 3. U. 'to bear, to support.' **बलाहकच्छेदविभक्तरागाम्**, f. acc. sing. qualifies. attributively धातुमत्ताम्. 'imparting ruddy, golden hue to pieces of clouds'; anal. बलाहकानां छेदेषु (pieces) विभक्तः (imparted) रागः (ruddiness) यया. Bahuvr. **बलाहक**, m. 'a cloud' is explained as वारि+वाहक (carrier of water or rain-water), बल (or वर) being a reduced form of and replacing वारि and व of वाहक (bearer) dropping out from its contiguity to the preceding semi-vowels. **अकालसंध्याम्** f. acc. sing. 'untimely twilight.' Red minerals on the summits of the Himalayas reflected their tints on the clouds capping those summits and a spurious twilight thus resulting from the Himalayas being rich in red minerals would deceive the love-blind nymphs, who would hasten to decorate themselves and (to follow the second sense of विभ्रम), misplace their ornaments in confusion. **धातुमत्ताम्**, f. acc. sing. from धातुमत्ता abstract noun formed from its adj. धातुमत् (धातु+मत् a suffix indicating possession), 'the state of being rich in red minerals.'

Trans.—Who carries about its peaks a wealth of (red) minerals, which, imparting ruddiness to the fragments of clouds, appears like an untimely twilight, and thus causes the nymphs to decorate themselves amorously.

अनुवाद—जो हिमालय पर्वत अपनी चोटियों पर (गेरु-सिंदूरादिक) धातुओं को इतने अधिक अंश में रखता है कि जब उन की लाली मेघों के खण्डों पर पड़ती है और समय के न होते हुए भी सन्ध्या की प्रतीति होती है तब अप्सरायें (इसी भ्रम में) विलासार्थ अपने आप को भूषित करती हैं ॥ ४ ॥

आमेखलं संचरतां घनानां
छायामधःसानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥ ५ ॥

आमेखलमिति ॥ **सिद्धाः** अणिमादिसिद्धा देवयोनिविशेषाश्च ॥ पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः । इत्यमरः । आ मेखलाभ्यः **आमेखलं** नितम्बपर्यन्तम् ॥ मेखला खण्डबन्धे स्यात्काञ्चीशैलनितम्बयोः । इति विश्वः ॥ आङ् मर्यादाभिविध्योः इत्यव्ययीभावः । **संचरतां घनानां** मेघानाम् (**अधः सानुगतां**) अधः सानूनि मेघमण्डलादधस्तटानि गतां प्राप्ताम् ॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इति समासः ॥ **छायाम्** अनातपम् ॥ छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः । इत्यमरः ॥ **निषेव्य वृष्टिभिः उद्वेजिताः** क्लेशिताः सन्तः ॥ उद्वेगस्तिमिते क्लेशे भये मन्थरगामिनि । इति ! शब्दार्णवः ॥ **यस्य** हिमाद्रेः **आतपवन्ति** सातपानि **शृङ्गाणि आश्रयन्ते** । आश्रित्य स्थिता इत्यर्थः । अतिमेघमण्डलमस्यौन्नत्यमिति भावः ॥

Notes.—**आमेखलम्**, adv. मेखला, f. means 'the mid-slopes (of a mountain.)' आ makes an indec. comp. with मेखला, the whole modifying the verb in संचरतां (moving, floating). **अधःसानुगतां**, f. acc. sing. qualifying छायां (the shade). अधःसानु—means 'lower crests, lower slopes.' गतां makes a द्वितीया तत्पु० compound with the accus. अधःसानूनि. Pan. 2. 1. 24. द्वितीया श्रितातीतपतितगत०. **उद्वेजिताः**, m. nom. plu. 'troubled' from उद् √ विज्. आतपवन्ति n. acc. plu 'sunny' qualifies शृङ्गाणि, 'peaks.' **सिद्धाः**, m. nom. plu. are those who have acquired *siddhis* or superhuman powers. In 3. 45. of Patanjalayogasutram commenting on ततो अणिमादि प्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च the comm. Vyasa enumerates these superhuman faculties as follows :—"Of these,

(*i*) अणिमा, 'attenuation' *i. e.* (the yogin) shrinks to the smallness of an atom, (*ii*) लघिमा, 'buoyancy' *i. e.* (the yogin) becomes light; (*iii*) महिमा, 'hugeness' *i. e.* (the yogin) attains magnitude; (*iv*) प्राप्तिः, 'unlimited access' *i. e.* (the yogin) may touch even the moon by his finger-tip, (*v*) प्राकाम्यम् 'unrestricted will' *i. e.* there is absence of restraint to his will. (The yogin) may be seen popping out his head from the ground or plunging into it as in water; (*vi*) वशित्वम्, 'unlimited control' *i. e.* the (yogin) secures mastery over the elements and the products of those elements and, in the case of the rest, is not subject to them; (*vii*) ईशितृत्वम्, 'sovereignty' *i. e.* (the yogin) has sovereign power over the production, absorption, and arrangement of these (elements and products); and (*viii*) यत्रकामावसायित्वम्, 'power to determine things according to desire' *i. e.* the power to will actual facts, to secure the disposition of elements and things as (the yogin) wishes." These eight powers are summed up in the couplet अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा । ईशित्वं वशित्वं च तथा कामावसायिता. These *siddhas* were regarded as semi-divine beings by popular conception. They were thus considered as a class of demi-gods possessed of great purity and holiness.

Trans.—Whose sunny peaks the Siddhas, who, while enjoying the shade on the lower crests of clouds girding the mid-slopes, were startled by showers of rain, seek.

अनुवाद—जब सिद्धजनों को हिमालय पर्वत के मध्य-भाग में चारों ओर चक्कर लगा रहे बादलों की निचली चोटियों पर छा रही छाया सेवन करते करते (एकाएक) वर्षा पड़ने से खेद होता, तो वे (झट) ऊपर की धूप वाली चोटियों का आश्रय लेते ॥ ५ ॥

पदं तुषारस्रुतिधौतरक्तं
यस्मिन्नदृष्ट्वापि हतद्विपानाम्।
विदन्ति मार्गं नखरन्ध्रमुक्तै-
र्मुक्ताफलैः केसरिणां किराताः ॥ ६ ॥

पदमिति ॥ यस्मिन् अद्रौ किराताः (तुषारस्रुतिधौतरक्तं) तुषारस्रुतिभिर्हिमनिस्यन्दैर्धौतं क्षालितं रक्तं शोणितं यस्य तत्तथोक्तम्। अतो दुर्ग्रहमिति भावः। हता द्विपा गजा यैस्तेषां हतद्विपानां केसरिणां सिंहानां पदं पादप्रक्षेपस्थानम् अदृष्ट्वापि (नखरन्ध्रमुक्तैः) नखरन्ध्रैर्नखद्रोणीभिर्मुक्तैः मुक्ताफलैः मार्गं विदन्ति जानन्ति। अत्र व्याधाः सिंहघातिनो गजेन्द्राश्च मुक्ताकरा इति भावः ॥ करीन्द्रजीमूतवराहशंखमत्स्याहिशुक्त्युद्भववेणुजानि। मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि।

Notes. तुषारस्रुतिधौतरक्तम्, n. acc. sing. qualifying पदं ('the foot-print') 'the blood marks of which were washed away by the (melting) snow as it trickled out (in a thin stream).' Anal. तुषारस्य (of snow) स्रुतिभिः (thinly flowing streams) धौतं रक्तं (blood) यस्य तत्. **हतद्विपानाम्** m. gen. plu. qualifying केसरिणाम् (of the lions) 'who had killed elephants'. द्विप m. 'an elephant' is so called because (द्वाभ्यां पिबति) an elephant drinks water with both the trunk and the mouth. The first member द्वि—(two) has been paraphrased by अनेक—(lit. not one *i e.* two) to give us its synonymn अनेकप m. 'an elephant'. **विदन्ति** लट्. 3rd pers. plu. from √विद् 2. p. 'to know.' **नखरन्ध्रमुक्तैः**, n. instr. plu. 'let down by the cavities (रन्ध्र) of their nails (नख)' qualifies मुक्ताफलैः (through pearls). किराताः were degraded mountaineers living on northern hills and leading barbarous lives.

Trans.—where the mountaineers, even though missing the foot-prints of lions who have killed elephants because of blood-marks having been washed away by the thin streams of (melting) snow, know their track

from the pearls dropped down from the cavities of their claws.

अनुवाद—जिस हिमालय पर्वत पर किरात लोग हाथियों को मार कर गये हुए शेरों के रक्त से भरे हुए पञ्जों के चिन्ह बर्फ के (पिघल कर) बहने से मिट जाने के कारण न देख (केवल) उन शेरों के नखों से गिरे हुए (हाथी की खोपरी से निकाले हुए) मोतियों के द्वारा मार्ग ('शेर इसी रास्ते से गये हैं', यह जान लेते हैं॥६

न्यस्ताक्षरा धातुरसेन यत्र
भूर्जत्वचः कुञ्जरबिन्दुशोणाः।
व्रजन्ति विद्याधरसुन्दरीणा-
मनङ्गलेखक्रिययोपयोगम् ॥ ७ ॥

न्यस्ताक्षरेति ॥ **यत्र** हिमाद्रौ **धातुरसेन** सिन्दूरद्रवेण ॥ शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः। इत्यमरः। **न्यस्ताक्षराः** लिखितवर्णा अतएव (**कुञ्जरबिन्दुशोणाः**) कुञ्जरस्य ये बिन्दवः काये वयोविशेषभाविनः पद्मकाख्याः। पद्मकं बिन्दुजालकम्। इत्यमरः॥ ते इव शोणा रक्तवर्णाः। लिखितभागेष्विति शेषः। **भूर्जत्वचः** भूर्जपत्रवल्कलानि॥ भूर्जपत्रो भुजो भूर्जो मृदुत्वक्चर्मिका अपि। इति यादवः॥ **विद्याधरसुन्दरीणाम्**। (**अनङ्गलेखक्रियया**) लिख्यते येषु ते लेखाः पत्रिकाः। अनङ्गस्य लेखास्तेषां क्रियया। कामव्यञ्जकलेखकरणेनेत्यर्थः। **उपयोगम्** उपकारं **व्रजन्ति**। दिव्याङ्गनाविहारयोग्योऽयं शैल इति भावः॥

Notes—**न्यस्ताक्षराः**, f. nom. plu. anal. न्यस्तानि (have been put down) अक्षराणि यासु (त्वक्षु) ताः न्यस्ताक्षराः; qualifies **भूर्जत्वचः** (the barks of birch-trees) 'on which the words were charactered'. धातुरसेन m. instr. sing. 'with (धातु) mineral fluid.' **कुञ्जरबिन्दुशोणाः**, f. nom. plu. 'red like small spots (on the skin) of (full-grown) elephants (कुञ्जर)' qualifies भूर्जत्वचः विद्याधरसुन्दरीणाम्. Vidyadharas are "a class of spirits who reside upon the loftiest peaks of the Himalaya mountains, and who possess superhuman longevity and faculties and the knowledge of what is passing beyond their presence. They have in many cases been mortals and are constantly

connected with human beings in friendship and enmity, love and hate." *Wilson's works Vol. IV.* **अनंगलेख-क्रियया**, f. instr. sing. 'for purposes of love-letters.' Anal. अनङ्गस्य लेखाः ते अनङ्गलेखाः, तेषां क्रियया. Why Love is called अनंग see Canto III.

Trans.—Where the barks of birch-trees having words 'character'd' on them with mineral fluid and red like dots on (full-grown) elephants, serve the damsels of Vidyadharas for purposes of love-letters.

अनुवाद—जिस हिमालय पर्वत पर भोजपत्र को, जिन पर विद्याधरों की सुन्दर स्त्रियां (अपने प्रेम के भावों को) धातु के रस से लिखती हैं और जो (सिंदूर आदि धातुरस से लिखन के पश्चात्) हाथी के लाल चिन्हों से चिन्हित मस्तक के निचले भाग के समान होते हैं, विद्याधर स्त्रियां अपने प्रेमपात्रों प्रति पत्र भेजने के काम लाती हैं ॥ ७ ॥

यः पूरयन्कीचकरन्ध्रभागा-
न्दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां
तानप्रदायित्वमिवोपगन्तुम् ॥ ८ ॥

य इति ॥ **यः** हिमाद्रिः । (**दरीमुखोत्थेन**) दरी गुहा सैव मुखं तस्मादुत्थेनोत्थितेन । आतश्चोपसर्गे इति कप्रत्ययः । **समीरणेन** वायुना । (**कीचकरन्ध्रभागान्**) कीचका वेणुविशेषाः । वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः । इत्यमरः ॥ तेषां रन्ध्रभागाञ्छिद्रप्रदेशान् **पूरयन्** धमयन् । वांशिकोऽपि वंशरन्ध्राणि मुखमारुतेन पूरयतीति प्रसिद्धिः । **उद्गास्यतां** देवयोनित्वादुच्चैर्गान्धारग्रामेण गानं करिष्यताम् ॥ उक्तं च नारदेन षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः । न तु गान्धारनामानं स लभ्यो देवयोनिभिः । इति ॥ **किन्नराणां** देवगायकानां **तानप्रदायित्वम्** । तानो नाम स्वरान्तरप्रवर्तको रागस्थितिप्रवृत्त्यादिहेतुरंशापरनामा वंशवाद्यसाध्यः प्रधानभूतः स्वरविशेषः॥ तानस्त्वंशस्वरो मतः इत्यभिनवगुप्तः ॥ गाता यं यं स्वरं गच्छेत्तं तं वंशेन तानयेत् । इति भरतः ॥ तत्प्रदानशीलत्वं तानप्रदायित्वं वांशिकत्वम् **उपगन्तुमिच्छति इव** इत्युत्प्रेक्षा । सा च दरीमुखोत्थेनेत्येकदेशविवर्तिरूपकोज्जीविता । मुखसाध्यत्वात्तानप्रदायित्वस्य । यत्रावयवरूपणादवयविरूपणं गम्यते तदेकदेशविवर्ति रूपकम् । गम्यते चात्रावयविनः पुंसो रूपणं यच्छब्दनिर्दिष्टे हिमाद्रावित्यलं बहुना ॥

Notes.—**कीचकरन्ध्रभागान्**, m. acc. plu. object to पूरयन् (filling), 'the cavities of the bamboos.' The कीचकs are those bamboos which give out musical sounds when wind blows about them. See comm. In Megh. 1. 56. they are described as producing music: शब्दायन्ते मधुरम् अनिलैः (with winds) कीचकाः पूर्यमाणाः .... Cf. also Raghu. II. 12. स कीचकैः मारुतपूर्णरन्ध्रैः कूजद्भिर् आपादितवंशकृत्यम् (adv. wherein the function of flutes was performed) । शुश्राव कुञ्जेषु (in the bowers) यशः स्वम् उच्चैर् उद्गीयमानं वनदेवताभिः ॥. The stems of the bamboos are here described as functioning so many flutes, the cavities being fileed with breath from the *mouth* of the Himalayan caverns. The word मुख is thus significant. **दरीमुखोत्थेन**, m. instr. sing. qualifying **समीरणेन** (with wind) 'issuing from the cavern-mouth. Anal. दरी (a cavern) एव मुखम् इति दरीमुखं, तस्मात् उत्थेन. It is to be noted that we cannot analyse the comp. as तस्मात् उत्तिष्ठति इति, inasmuch as उत्थ is a word which is a grammatical whole formed according Pan. 3. 1. 136. In an उपपदसमास the verbal representative though seeming a noun is not treated as such. *Vide supra* the anal. of सौभाग्यविलोपि. उत्थ is, however, seen used only at the end of compounds. **किन्नराणाम**, m. gen. plu. A 'Kinnara' is a mythical being with a human figure and the head of a horse. The name seems to mean: 'Is he a man?' The Kinnaras are also called किं पुरुष's and अश्वमुख's; and are classed with the Gandharvas as minstrels of the gods. **तानप्रदायित्वम्**, n. acc. sing. abstract noun from तानप्रदायिन् (one who sets the pitch). तान is the same as in Panjabi.

Trans.—Who filling the cavities of the bamboos with winds issuing from his cavern-mouth, seems, as it were, desirous of setting the pitch for Kinnaras (who are) about to sing loudly.

अनुवाद—जो हिमालय पर्वत अपनी गुफा के मुंह से निकल रहे वायु से कीचक-बांसों के छिद्रों को भरता है, मानो कि हिमालय पर्वत आप ऊंचे स्वर से गाना आरम्भ करने वाले किन्नरों को तान देना चाहता है ॥ ८ ॥

कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्नुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति ॥ ९ ॥

कपोलेति ॥ यत्र हिमाद्रौ **करिभिः** गजैः **कपोलकण्डूः** गण्डस्थलकण्डूः **विनेतुम्** अपनेतुं **विघट्टितानां** घर्षितानां **सरलद्रुमाणां** संबन्धीनि स्नुतानि करिकपोलघर्षणात्क्षरितानि क्षीराणि येषां तेषां भावस्तत्ता तया (**स्नुतक्षीरतया**) हेतुना **प्रसूतः** उत्पन्नः **गन्धः सानूनि सुरभीकरोति** ॥ एतेनास्य गजाकरत्वं गम्यते । तथा च गजायुर्वेदे–हिमवद्विन्ध्यमलया गजानां प्रभवा नगाः इति ॥

Notes.—**कपोलकण्डूः**, f. acc. plu. 'itching (कण्डूः) of the temples (कपोल)'; object to विनेतुम् (to remove). **विघट्टितानाम्**, m. gen. plu. qualifies **सरलद्रुमाणाम्** (of cedar trees) 'peeled'. **स्नुतक्षीरतया**, f. instr. sing. 'because of the condition of fluid oozing (from them).' Anal. स्नुतानि क्षीराणि येषां, तेषां भावः स्नुतक्षीरता, तया. **सुरभीकरोति**, 'makes fragrant' असुरभीणि सुरभीणि सम्पद्यमानानि करोति इति. It is a chvi formation. Pan 5. 4. 50. कृभ्वस्तियोगे सम्पद्यकर्तरिच्विः ॥

Trans.—Where the (sweet) smell engendered by the milky juice trickling down from the cedar trees peeled by elephants in the act of removing the itching of their temples makes the summits fragrant.

अनुवाद—जिस हिमालय पर्वत पर हाथी अपनी कट-स्थान (पंजा० पुड़पड़ी) में हो रही खुजली को दूर करने के लिये उस स्थान को साल के वृक्षों से रगड़ते हैं और जहां (उन रगड़े हुए स्थानों से) बहते हुए साल रस से उत्पन्न हुआ सुगन्ध हिमपर्वत की चोटियों को सुगन्धित करता है ॥ ९ ॥

वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः ॥
भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः ॥ १० ॥

वनेचराणामिति ॥ **यत्र** हिमाद्रौ **रजन्यां** (**दरीगृहोत्सङ्गनिषक्तभासः**) दर्यः कन्दरा एव गृहास्तेषामुत्सङ्गेष्वभ्यन्तरेषु निषक्ताः संक्रान्ता भासो यासां ताः **ओषधयः** तृणज्योतींषि । अग्नावोषधीषु च तेजो निधाय रविरस्तं याति इत्यागमः । वनितानां सखायो वनितासखाः । राजाहःसखिभ्यष्टच । तेषां (**वनितासखानां**) रममाणाना-मित्यर्थः । वने चरन्तीति वनेचराः किराताः । चरेष्टः इति टप्रत्ययः । तत्पुरुषे कृति बहुलम् इत्यलुक् । तेषां **वनेचराणाम्** । **अतैलपूराः** । अनपेक्षिततैलसेका इत्यर्थः । [**सुरतप्रदीपाः**] सुरते सुरतकर्मणि प्रदीपाः **भवन्ति** । अत्रौषधीष्वारोप्यमाणस्य प्रदीप-त्वस्य प्रकृतसुरतोपयोगित्वात्परिणामालंकारः । तदुक्तम्—आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः । इति । तथा प्रदीपकारणतैलपूरणनिषेधादकारणकार्योत्पत्तिलक्षणा विभावना चेत्युभयोः संसृष्टिः ॥

Notes.—**वनेचराणाम्**, m. gen. plu. 'To the dwellers of the woods'. Anal. वने चरति इति वनेचरः, ते Pan. 3. 2. 16. चरेष्टः. The case-ending is retained according to Pan. 6. 3. 14. तत्पुरुषे कृति बहुलम्. **वनितासखानाम्**, m. gen. plu. 'accompanying their beloved ones.' The compound is to be analysed thus. वनितानांसखायः वनितासखाः, तेषाम्. The compound is a तत्पुरुष and as such it replaces its last syllable by अ (टच्). Cf. Pan. 5. 4. 91. It is sometimes cheaply remarked that the compounds वनितासखानाम्, महिषीसखः and the like may be dissolved as bahuvr. but for the restriction laid down in Pan. 5. 4. 91. राजाहःसखिभ्यश्च टच्. Against it it may be mentioned that in the Rigveda the compound मरुत्सखा occurs several times (Vide Rig. 8. 76. 2. अयम् इन्द्रो मरुत्सखा वि वृत्रस्य अभिनच्छिरः । वज्रेण शतपर्वणा). It is always accented on the first syllable and is, to judge by its accent, a bahuvrihi. Pan. 6. 2. 1. बहुव्रीहौ प्रकृत्या पूर्वपदम् (i. e. A bahu. comp. retains the

(original) accent of its first member). Of this bahu, moreover, the base is मरुत्सखि (Indra) and not मरुत्सख (which means clouds or fire). See. C. Cappeller's A Sanskrit-English Dictionary, p. 399. **दरीगृहोत्सङ्गनिषक्तभासः**, f. nom. plu '(the faint and tremulous) light of which filled the cave-dwellings'. Anal. दर्यः (caves) एव गृहाः, तेषां दरीगृहाणाम् उत्सङ्गेषु (in the interior) निषक्ताः (reflected) भासः (light) यासां, ताः (ओषधयः). **अतैलपूराः**, f. nom. plu. 'which did not stand in need of the (पूर m.) pouring in of oil *i. e.* which were not being fed with oil.'

Trans. Where the herbs, whose (shimmering) light is reflected into the interior of the cave-houses, and which need no feeding with oil serve, at night, as lamps at the time of their amorous sports for foresters in the company of their wives.

अनुवाद—जहां रात को पहाड़ी बनों में विचरने वालों और उन की स्त्रियों के लिये जब कि वे सुरत-क्रिया मे (मगन चित्त होते हैं), वे ओषधियां जो कि तेल से भरने की अपेक्षित नहीं है (स्वतः दीप्त होने के कारण) गुफाओं में अपना प्रकाश डालती हैं और प्रदीपों का काम देती हैं ॥ १० ॥

उद्वेजयत्यङ्गुलिपार्ष्णिभागा-
न्मार्गे शिलीभूतहिमेऽपि यत्र ।
न दुर्वहश्रोणिपयोधरार्ता
भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥ ११ ॥

उद्वेजयतीति ॥ **यत्र** हिमाद्रौ । शिलीभूतं घनीभूतं हिमं यत्र तस्मिन् (**शिलीभूतहिमे**) अतएव (**अङ्गुलिपार्ष्णिभागान्**) अङ्गुलीनां पार्ष्णीनां च भागान्प्रदेशान् **उद्वेजयति** अतिशैत्यात्क्लेशयति **अपि मार्गे** श्रोणयश्च पयोधराश्च श्रोणिपयोधरम् । दुर्वहेण दुर्धरेण श्रोणिपयोधरेणार्ताः पीडिताः (**दुर्वहश्रोणिपयोधरार्ताः**)॥ आङ्पूर्वादिच्छतेः क्तः ॥ उपसर्गादृति धातौ इति वृद्धिः ॥ अश्वानां मुखानीव मुखानि यासां ताः **अश्वमुख्यः** किंनरस्त्रियः ॥ उष्ट्रमुखवत्समासः ॥ स्यात्किंनरः किंपुरुषस्तुरङ्गवदनो मयुः । इत्यमरः । **मन्दां** मन्थरां **गतिं** न **भिन्दन्ति** न त्यजन्तीत्यर्थः । पादपीडाकारेऽप्यतिभारभङ्गुरशरीरतया न शीघ्रं गन्तुं शक्नुवन्ति इति भावः ॥

Notes.—उद्वजयति, m. loc. sing. qualifies मार्गे, 'making (the toes and the heels) smart.' पार्ष्णि, f. 'heel'. शिलीभूत, 'become solidified like a rock', a chvi formation. दुर्वहश्रोणिपयोधरार्ताः, f. nom. plu. goes with अश्वमुख्यः 'depressed under (the weight of) their heavy hips and breasts'. श्रोणि, f. 'a hip.'

Trans.—Where the ladies of the Asvamukhas (*i. e.* Kinnaras) depressed under (the weight of) their hips and breasts difficult to bear up, cannot break off their slow pace, though the way where snow lies hardened into bergs makes their toes and heels smart.

अनुवाद—जिस हिमालय पर्वत पर अश्वमुखों अर्थात् किन्नरों की स्त्रियों के चरणों की अंगुलियों और एड़ियों को मार्ग पर जम कर पत्थर के समान हुई हुई बर्फ दुःख देती है, पर फिर भी वे अपने भारी कुचों और नितम्बों (पंजा० चुत्तड़ों) के भार से दबी हुई अपनी मन्द गति (सुस्त रफ़तार) को नहीं छोड़ सकतीं ॥ ११ ॥

दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव ॥ १२ ॥

दिवाकरादिति ॥ यः हिमाद्रिः **दिवा** दिवसे **भीतं** भयाविष्टम् **इव**। उलूकमिवेति च ध्वनिः। **गुहासु लीनम् अन्धकारं** ध्वान्तम्। दिवा दिनं करोतीति दिवाकरस्तस्माद् **दिवाकरात्**। दिवाविभानिशाप्रभाभास्कर- इत्यादिना टप्रत्ययः। भीत्रार्थानां भयहेतुः इत्यपादानत्वात्पञ्चमी ॥ **रक्षति** त्रायते ॥ ननु क्षुद्रसंरक्षणमनर्हमित्याशङ्क्याह—क्षुद्र इति। **उच्चैःशिरसां** उन्नतानां **शरणं प्रपन्ने** शरणागते **क्षुद्रे** नीचे **अपि सति** सज्जने **इव नूनं ममत्वं** ममायमित्याभिमानः। अस्तीति शेषः ॥ ममशब्दात्त्वप्रत्ययः ॥ अर्थान्तरन्यासोऽलंकारः ॥

Notes.—दिवाकर, m. 'the Sun' has been analysed in kas. 3-2-21 thus : दिवा करोति प्राणिनः चेष्टायुक्तान्. Upapada tat. **गुहासु लीनं**, 'skulking away in the interior of the caves'. दिवा adv. 'by day'. The words दिवाभीतम्, acc. sing. seem to imply also 'the owl'. ममत्वम्,

nom. sing. 'kinship', lit. 'the state when one says in reference to something, It is *mine*.' मम enters into another compound in the same sense निर्मम 'having no attachment'. Cf. the derivatives from Lat. ego 'I'.

Trans.—Who shelters from the sun darkness which afraid (of the sun) skulks all the day long in his caverns. Indeed the lofty souls extend their kinship as much towords the lowly when seeking protection as towards the noble ones.

अनुवाद.—जो हिमालय पर्वत दिन को प्रकाश से उल्लू के समान भयभीत हुए अतः गुफा में घुसे हुए अन्धकार को सूर्य्य से रक्षा करता है। सच है कि महात्माओं की शरण में आये हुए नीचों के लिये भी वही मित्र की दृष्टि होती है जो सज्जनों के लिये ॥ १२ ॥

लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्वन्ति बालव्यजनैश्चमर्यः ॥ १३ ॥

लाङ्गूलेति ॥ **चमर्यः** मृगीविशेषाः **इतस्ततः** (**लाङ्गूलविक्षेपविसर्पिशोभैः**) लाङ्गूलानि बालधयः। पुच्छोऽस्त्री लोमलाङ्गूले बालहस्तश्च बालधिः। इत्यमरः ॥ तेषां विक्षेपैर्विधूननैर्विसर्पिण्यो विसृमराः शोभाः कान्तयो येषां तैः। (**चन्द्रमरीचिगौरैः**) चन्द्रमरीचिभिरिव गौरैः शुभ्रैः। गौरः करीरे सिद्धार्थे शुक्ले पीतेऽरुणेऽपि च। इति यादवः ॥ उपमानानि सामान्यवचनैः इति समासः। **बालव्यजनैः** चामरैः **यस्य** हिमाद्रेः **गिरिराजशब्दं** गिरिराज इति संज्ञाम् **अर्थयुक्तम्** अभिधेयवन्तं **कुर्वन्ति**। राजानो हि छत्रचामरादिचिह्निता इति भावः ॥

Notes.—**लाङ्गूलविक्षेपविसर्पिशोभैः**, qualifies **बालव्यजनैः** (with chamaras, Panj. चौरी). Anal. लाङ्गूलानां विक्षेपैः (with the movements of the tails) विसर्पिण्यः (spreading) शोभाः येषां, तैः 'diffusing lustre with the movements of their tails'. **चमर्यः**, Apte following Amara takes चमर to mean "a kind of deer". According to C. Cappeller

we have "चमर m. ई f. the Yak (Bos Grunniens).". Fanning with chowries indicated that he who was being thus fanned was a king. चमरी's fanning the Snowy Range with their chowries indicated that his title 'Sovereign of the Mountains' was no empty one and that he was a real king.

Trans.—Where the yaks with (*i. e.* by waving over the Himalayas) their chowries silvery like the moonbeams, and the shine of which is diffused everywhere by the movements of their tails, prove his (*i. e.*, of King Himalaya) title "Sovereign of the Hills" to be a significant one.

अनुवाद—जिस हिमालय पर्वत की संज्ञा 'पर्वतों का राजा' को चमरी गायें चांद की चांदनी की नाईं श्वेत पूंछ रूपी चौरियों के झूलने द्वारा सार्थक दरशाती हैं और उन्हीं को इधर उधर हिलाने से सुन्दर कान्ति को सब ओर छिटकती हैं ॥१३॥

यत्रांशुकाक्षेपविलज्जितानां
यदृच्छया किंपुरुषाङ्गनानाम् ॥
दरीगृहद्वारविलम्बिबिम्बा-
स्तिरस्करिण्यो जलदा भवन्ति ॥ १४ ॥

यत्रेति ॥ **यत्र** हिमाद्रौ । (**अंशुकाक्षेपविलज्जितानाम्**) अंशुकाक्षेपेण वस्त्रापहरणेन विलज्जितानां **किंपुरुषाङ्गनानां** किंनरस्त्रीणां **यदृच्छया** दैवगत्या (**दरीगृहद्वारविलम्बिबिम्बाः**) दरीगृहद्वारेषु विलम्बिबिम्बाः लम्बमानमण्डलाः **जलदाः तिरस्करिण्यः** जवनिकाः **भवन्ति** ॥ प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा । इत्यमरः ॥ तिरसोऽन्यतरस्याम् इति सत्वम् । अत्र जलदेष्वारोप्यमाणस्य तिरस्करिणीत्वस्य प्रकृतोपयोगित्वात्परिणामलंकारः ॥

Notes.—**अंशुकाक्षेपविलज्जितानां**, f. gen. plu. qualifying **किंपुरुषाङ्गनानाम्** (wives of the kimpurushas) 'who were shy because of their upper garments having been taken away.' Anal. अंशुकानाम् आक्षेपः (snatching away) अंशुकाक्षेपः (षष्ठी तत्॰), तेन विलज्जितानाम् (तृतीया तत्॰). **यदृच्छया**, adv. 'fortuitously, by chance, accidentally.' The word

is analysed as यद् – इष् (to wish) + अ (भावे) – आप् (स्त्रियाम्), तृतीया एकवचन. **दरीगृहद्वारविलम्बिबिम्बाः**, m. nom. plu. qualfying **जलदाः** (clouds) 'with their forms hanging before the doors of the cave-dwellings.' Anal. दर्यः एव गृहाः दरीगृहाः, तेषां द्वाराणि दरीगृहद्वाराणि, तेषु विलम्बीनि बिम्बानि (विलम्बिनः बिम्बाः) येषां, ते. **तिरस्करिणी**, f. 'a screen', 'a curtain.'

Trans.—Where the clouds with their forms fortuitously hanging before the doors of the cave-dwellings, become screens for kinnaras' wives shy at their upper garments having been removed away (by their husbands.)

अनुवाद—जिस हिमालय पर्वत पर दोपट्टों के उठाये जाने से शरमाई किन्नरों की स्त्रियों के लिये गुफाघरों के आगे दैवयोग से लटकते हुए बादल परदों अथवा चिकों का काम देते हैं (और उन किन्नर स्त्रियों की लज्जा रख लेते हैं). ॥१४

भागीरथीनिर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातै-
रासेव्यते भिन्नशिखण्डिबर्हः ॥ १५ ॥

भागीरथीति ॥ **भागीरथीनिर्झरशीकराणां** गङ्गाप्रवाहपाथःकणानाम् । कर्मणि षष्ठी । **वोढा** प्रापकः ॥ वहेस्तृच् ॥ **मुहुः** पुन पुनः सद्यो वा । पौनःपुन्ये भृशार्थे च सद्यो वा स्यान्मुहुःपदम् । इति वैजयन्ती ॥ (**कम्पितदेवदारुः**) कम्पिता देवदारवो येन स तथोक्तः (**भिन्नशिखण्डिबर्हः**) भिन्नानि विश्लेषितानि शिखण्डिनां बर्हाणि गतिलाघवार्थं किरातकटिबद्धानि येन स तथोक्तः । क्रमाद्विशेषणत्रयेण शैत्यसौरभ्यमान्द्यान्युक्तानि । यस्य हिमाद्रेर्वायुः (**यद्वायुः**) **अन्विष्टमृगैः** मार्गितमृगैः ॥ श्रान्तैरिति भावः ॥ अन्विष्टं मार्गितं मृगितम् इत्यमरः ॥ **किरातैः आसेव्यते** ॥

Notes.—भागीरथीनिर्झरशीकराणां, 'of the spray of the current of the Ganges.' **वोढा**, from वोढृ 'bearer' (वह्+ तृच्). **यद्वायुः**, 'whose breeze'; anal. यस्य वायुः. **भिन्नशिखण्डबर्हः**, m. nom. sing. qualifying यद्वायु (whose breeze) 'ruffling the peacocks' feathers' Anal. भिन्नानि शिखण्डिनां (of the peacocks) बर्हाणि (feathers) येन सः. Malli. says that

the kiratas wore a girdle of feathers round their waists in order to move the more swiftly with their aid. Maybe these peacock feathers were set in their turbans for the sake of ornament. Coolness, fragrance, and gentleness are the characteristic attributes of an ideal breeze as imagined by Sanskrit poets. शीकराणां वोढा indicates that the breeze was cool, कम्पितदेवदारुः, that it was fragrant; and भिन्न शिखण्डिबर्हः, that it was gentle.

Trans.—Where the breeze, which wafts the spray of the Gangetic stream (as it is near its source), time and again shaking the cedar trees and ruffling the peacock feathers (worn by the mountaineers), is enjoyed by the kiratas who have done stalking the game.

अनुवाद—जिस हिमालय पर्वत का भागीरथी के प्रवाह के जल-कणों को अपने साथ ले जाने वाला, देवदार के वृक्षों को पुनः पुनः कम्पित करने वाला, और किरात लोगों के (शरीर के मध्ये में बन्धे हुए) मोरों के परों को शनैः शनैः हिलाने वाला वायु उन पर्वत में रहने वाले लोगों से सेवन किया जाता है जब वे हिरण का शिकार कर चुकते हैं (और इस कारण से थके होते है) ॥१५॥

सप्तर्षिहस्तावचितावशेषा-
ण्यधो विवस्वान्परिवर्तमानः।
पद्मानि यस्याग्रसरोरुहाणि
प्रबोधयत्यूर्ध्वमुखैर्मयूखैः॥ १६ ॥

सप्तर्षीति ॥ (**सप्तर्षिहस्तावचितावशेषाणि**) सप्त च ते ऋषयश्च सप्तर्षयः। दिक्संख्ये संज्ञायाम् इति समासः। तेषां हस्तैरवचितेभ्यो लूनेभ्योऽवशेषाण्यवशिष्टानि। शेषोऽप्रधाने संतापे त्रिष्वन्यत्रोपयुज्यते। इति केशवः ॥ कर्मण्यप्रत्ययः ॥ अनेन पद्मानां साफल्यं सूचितम्। **यस्य** हिमाद्रेः। (**अग्रसरोरुहाणि**) रोहन्तीति रुहाणि ॥ इगुपधज्ञाप्रीकिरः कः इति कप्रत्ययः ॥ अग्र उपरि यानि सरांसि तेषु रुहाणि **पद्मानि अधः परिवर्तमानः** भ्रमन् **विवस्वान्** सूर्यः **ऊर्ध्वमुखैः मयूखैः प्रबोधयति** विकासयति। न कदाचिदधोमुखैः अतिमार्तण्डमण्डलत्वादप्रभूमेरिति भावः। सप्तर्षिमण्डलं ध्रुवादूर्ध्वमिति ज्योतिषिकाः अतस्तेषामग्रसरोरुहभागित्वं युक्तम् ॥

Notes.—**सप्तर्षिहस्तावचितावशेषाणि,** n. acc. plu. qualifies पद्मानि (lotuses) 'which remain after having been plucked by the hands of the Seven Sages'. Anal. सप्त च ते ऋषयः सप्तर्षयः (कर्मधारय), तेषां हस्ताः (षष्ठी तत्पु०), तैः अवचितानि "plucked, culled" (तृतीया तत्०), तेभ्यः अवशेषाणि (सुप्सुपा), सप्तर्षयः makes a संज्ञा or designation special. The seven sages generally enumerated are मरीचिः, अत्रिः, पुलहः, पुलस्त्यः, क्रतुः, अङ्गिराः and वसिष्ठः. These Seven Sages are the seven stars of the constellation Ursa Major. Astronomically the seven stars are even higher than Dhruva or the Polar star. The Seven Sages gather flowers for worship after they have bathed in the Ganges. (*Vide infra* sl. V, 37.) **विवस्वान्,** m. nom. sing. 'having lustre or rays, the Sun'. विवस्+मतुप्. अधः परिवर्तमानः, 'revolving below'. The Sun revolving below sends its beams upwards, which cause the lotuses to bloom. The mountain peaks are conceived so high that they are reached by the rays of the Sun only from below and that the Seven Sages pluck lotuses growing in their topmost lakes. **अग्रसरोरुहाणि,** n. acc. pl. qualifying पद्मानि. Anal. अग्रे सरांसि अग्रसरांसि, अग्रसरःसु (in the lakes on the summits) रुहाणि (growing) अग्रसरोरुहाणि.

Trans.—Where such lotuses as remain growing in the lakes on the summits of the Himalayas after having been culled by the hands of the Seven Sages, the Sun, revolving below, wakes (to bloom) by his rays shooting upwards.

अनुवाद—जिस की चोटियों पर की झीलों में उग रहे उन कमल के फूलों को नीचे घूमता हुआ सूर्य अपनी ऊपर की ओर भेजी हुई किरणों से विकसित करता है जो सात ऋषि के हाथों से तोड़े जाने के पीछे बचे रहते हैं ॥ १६ ॥

यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमं च।
प्रजापतिः कल्पितयज्ञभागं
शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥ १७ ॥

यज्ञाङ्गेति ॥ **यस्य** हिमाद्रेः (**यज्ञाङ्गयोनित्वम्**) यज्ञाङ्गानां यज्ञसाधनानां सोमलतादीनां योनिः प्रभवस्तस्य भावस्तत्त्वम् । यज्ञाङ्गार्थं मया सृष्टो हिमवानचलेश्वरः । इति विष्णुपुराणात् ॥ **धरित्रीधरणक्षमं** भूभारधरणयोग्यं **सारं** बलं च ॥ सारो बले स्थिरांशे च इत्यमरः ॥ **अवेक्ष्य** ज्ञात्वा **प्रजापतिः स्वयम्** एव (**कल्पितयज्ञभागं**) कल्पितो यज्ञभागो यस्मिंस्तत्तथोक्तम् ॥ सोमस्य राज्ञः कुरङ्ग इन्दोः शृङ्गं समुद्रस्य शिशुमारो हिमवतो हस्ती इति श्रुतेरिति भावः । (**शैलाधिपत्यम्**) शैलानामाधिपत्यमधिपतित्वम् । पत्यन्तपुरोहितादिभ्यो यक् इति यक्प्रत्ययः ॥ **अन्वतिष्ठत्** । ददाति स्मेत्यर्थः । उक्तं च ब्रह्माण्डपुराणे शैलानां हिमवन्तं च नदीनां चैव सागरम् । गन्धर्वाणामधिपतिं चक्रे चित्ररथं विधिः ॥ इति ॥

Notes.—यज्ञाङ्गयोनित्वम्, n. acc. sing. anal. यज्ञस्य अङ्गानि (षष्ठी तत्०), तेषां योनिः (षष्ठी तत्) तस्य भावः. 'Being a source of sacrificial requisites.' The Himalayas have an abundant supply of palasa sticks, khadira-wood for sacrificial posts, and above all of soma plants. **धरित्रीधरणक्षमं**, goes with **सारम्** (strength) 'capable of supporting the earth.' **कल्पितयज्ञभागम्**, 'with a share of the sacrificial offerings attached to it.' We are told an elephant may be sacrificed in order to propitiate the Himalayas (हिमवतो हस्ती—Yajurveda) as it is enjoined that a horned animal may be sacrificed in order to propitiate Indra. This verse means that the Himalaya is both lord of mountains and a god.

Trans.—Considering the Himalayas to be a source of sacrificial requisites and as having strength to keep the earth firmly fixed (in its place), the Lord of the Creation Himself conferred on him sovereignty of the mountains with a share of sacrificial offerings attached to it.

अनुवाद—जिस हिमालय पर्वत को यज्ञ की सामग्री की खान और समग्र भूमि के धारण करने में शक्त जान स्वयम् प्रजापति ने उस को सब पर्वतों का अधिपति बना दिया और साथ ही यज्ञ-भाग भी नियत कर दिया ॥ १७ ॥

स मानसीं मेरुसखः पितॄणां
कन्यां कुलस्य स्थितये स्थितिज्ञः ।
मेनां मुनीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे ॥ १८ ॥

स इति ॥ मेरोः सखा **मेरुसखः** । बन्धुसंपन्न इति भावः । **स्थितिज्ञः** मर्यादाभिज्ञः । अनेन श्रुतसंपत्तिः सूच्यते । हिमवान् **पितॄणां मानसीं** मनःसंकल्पजन्यां **मुनीनामपि माननीयाम्** । योगब्रह्मवादाभ्यां पूज्यामित्यर्थः । उक्तं च विष्णुपुराणे—तेभ्यः शुभास्पदं जज्ञे मेनका हरिणी तथा । ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज ॥ इति ॥ **आत्मानुरूपां** कुलशीलसौन्दर्यादिभिः सदृशीं **मेनां** मेनकादेवीति नामवतीं **कन्याम्** । **कुलस्य स्थितये** प्रतिष्ठायै । **विधिना** यथाशास्त्रेण **उपयेमे** परिणीतवान् ॥ उपाद्यमः स्वकरणे इत्यात्मनेपदम् ॥ तेषां तु मानसी कन्या मेना नाम महागिरेः । पत्नी हिमवतो यस्याः पुत्रो मैनाक उच्यते ॥ इति ब्रह्माण्डपुराणात् ॥

Notes.—Now begins the story. The Poet says here that Himalaya married Mena. This mention of Himalaya entering on a householder's life is necessary so that Parvati, the spouse of Siva and mother of our Kumara, may be born. Since Himalaya is both a sovereign and a god, he must marry according to his royal and divine status. Hence his marriage with Mena, the mind-begotten, and therefore no earthly, daughter of the Pitris, with her who is held in high respect even by the sages. **मेरुसखः**, *vide supra* sl. 10. One of the three daughters of the Pitris was given to मेरु in marriage. Therefore Meru was Himalaya's kinsman. **कुलस्य स्थितये**, 'for the continuity of the line.' Progeny *continues* the line and hence the word संतति means progeny, and अन्वय, with analogous development, means

a line. स्थितिज्ञ:, स्थितिं (tradition of his line) जानाति इति. उपयेमे, लिट् 3rd pers. sing. Pan. 1. 3. 56. उपाद् यमःस्वकरणे. Kas. पाणि. ग्रहणविशिष्टम् इह स्वकरणं गृह्यते न स्वकरणमात्रम्. √यम् preceded by उप takes Middle Voice in the sense 'to marry.'

Trans.—In order to maintain the continuity of his line, Himalaya who knew (full well) the tradition (of his family), and whose kinsman was Meru, duly married Mena, the mind-begotten daughter of the Pitris, and who was worthy of himself and honoured even by the sages.

अनुवाद—उस (श्रुतियों और स्मृतियों में लिखी हुई) मर्यादा को जानने वाले मेरु के मित्र हिमालय ने सर्वथा अपने अनुरूप और ऋषि-मुनियों भी से सम्मानित पितरों की मन से उत्पन्न हुई कन्या मेना के साथ विधिपूर्वक विवाह किया ॥ १८

कालक्रमेणाथ तयोः प्रवृत्ते
स्वरूपयोग्ये सुरतप्रसङ्गे ।
मनोरमं यौवनमुद्वहन्त्या
गर्भोऽभवद्भूधरराजपत्न्याः ॥ १९ ॥

कालक्रमेणेति ॥ **अथ कालक्रमेण** । गच्छता कालेनेत्यर्थः । **तयोः** मेनकाहिमवतोः **स्वरूपयोग्ये** सौन्दर्यानुगुणे । रूप्यते निश्चीयतेऽनेनेति रूपं ज्ञानं तद्योग्ये । शास्त्रानुसारिणीत्यर्थः । **सुरतप्रसङ्गे** सुरतकर्मणि **प्रवृत्ते** सति **मनोरमं यौवनमुद्वहन्त्याः भूधरराजपत्न्याः** मेनकायाः **गर्भः अभवत्** ॥

Notes.—**कालक्रमेण**, 'In course of time'. It is an adv. modifying the whole sentence. Anal. कालस्य क्रमः (lapse), तेन. **स्वरूपयोग्ये**, qualifies **सुरतप्रसंगे** (in connubial life) 'worthy of their own charms'. Anal. स्वयोः रूपं स्वरूपं (षष्ठी तत्०) तस्य योग्यः (सुरतप्रसंगः) स्वरूपयोग्यः, तस्मिन्. **यौवनम्**, n. acc. sing. 'youth' abstract noun formed from युवन् 'young' by Pan. 5. 1. 130. हायनान्तयुवादिभ्यो अण्. **भूधरराजपत्न्याः**, f. gen. sing. धरन्ति इति धराः, भुवो धराः भूधराः (षष्ठी तत्), भूधराणां राजा भूधरराजः, भूधरराजस्य पत्नी (षष्ठी तत्), तस्याः. The base पति, to form

its feminine gender, takes ई preceded by न् when 'participating in the sacrificial rites of her husband' is meant. Pan. 4. 1. 33. पत्युर्नो यज्ञसंयोगे. The use वृषलस्य पत्नी, however, is from analogy.

Trans.—In course of time when they were busy enjoying their connubial life worthy of their own charms, the wife of the Lord of the Mountains, who was possessed of youthful charms, became pregnant.

अनुवाद—कुछ समय पाकर जब अपनी युवावस्था का आनन्द भोग रहे थे तब मनोहर रूप वाली उस पर्वतों के राजा की धर्मपत्नी को गर्भ हुआ ॥ १९ ॥

असूत सा नागवधूपभोग्यं
मैनाकमम्भोनिधिबद्धसख्यम् ।
क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्रा-
ववेदनाज्ञं कुलिशक्षतानाम् ॥ २० ॥

असूतेति ॥ **सा** मेना **नागवधूपभोग्यम्** । नागकन्यापरिणेतारमित्यर्थः । **अम्भोनिधिना बद्धसख्यं** समुद्रकृतमैत्रीकम् । सख्यमूलं सूचयति—**पक्षच्छिदि** पक्षच्छेत्तरि ॥ सत्सूद्विष इत्यादिना क्विप्प्रत्ययः ॥ **वृत्रशत्रौ क्रुद्धे** कुपिते सति **अपि कुलिशक्षतानां** वज्रप्रहाराणाम् । संबन्धसामान्ये षष्ठी । (**अवेदनाज्ञं**) जानातीति ज्ञः ॥ इगुपधाज्ञा—इति कप्रत्ययः ॥ वेदनानां ज्ञः । अथवा वेदनां जानातीति वेदनज्ञः ॥ आतोऽनुपसर्गे कः इति कप्रत्ययः ॥ उपपदमतिङ् । इति समासः ॥ स न भवतीत्यवेदनाज्ञस्तम् । कुलिशक्षतवेदनानामिज्ञमित्यर्थः ॥ सापेक्षत्वेऽपि गमकत्वात्समासः ॥ पक्षच्छेदोद्यतशक्रात् त्राणाय शरणागमनमनयोः सख्यमूलमिति भावः । **मैनाकं** पुत्रम् **असूत** । सर्वपर्वतपक्षच्छेदेऽप्ययमच्छिन्नपक्ष एवेति मैनाकस्योत्कर्षः । तादृक्पुत्रवत्वं हिमाद्रेरिति सार्थकं मैनाकस्य वर्णनम् ॥ पिता न ज्ञायते यस्या भ्राता यदि न विद्यते । नोपयच्छेत्तु तां कन्यां धर्मलोपभयात्सुधीः ॥ इत्यभ्रातृककन्यापरिणयनिषेधात्प्रकृते पार्वती भ्रातृमत्येवेति सूचनार्थं मैनाकवर्णनमिति तात्पर्यार्थः ॥

Notes.—**असूत**, लङ् 3rd per. sing. from सू 2 A. 'to produce'. **नागवधूपभोग्यम**, m. acc. sing. qualifying मैनाकम् (Mainaka) 'who was to be enjoyed by a daughter of the king of the Nagas.' Anal. नागस्य वधूः नागवधूः, तया

उपभोग्यम्. Nagas are described as semi-divine fabulous beings having the face of a man and the tail of a serpent. They are said to inhabit the Patala, their chief town being known as भोगवती. Naga damsels are known for their beauty. **मैनाकम्**, 'the son of Menaka or Mena'. **अम्भोनिधिबद्धसख्यम्**, 'who contracted friendship with the Ocean.' Anal. अम्भसां (of waters) निधिः अम्भोनिधिः, तेन बद्धं सख्यं येन सः. When Indra was lopping off the wings of the mountains, Mainaka forthwith took shelter with the Ocean, over whose waters Indra had no power. He thus successfully escaped the effects of Indra's thunderbolt. The mention of Mainaka here is as much to show that Himalaya had such a son as to show that Parvati had a brother, for no one may marry a brotherless woman. **पक्षच्छिदि**, m. loc. sing. Anal. पक्षं छिनत्ति इति पक्ष+छिद्+क्विप् 'one who lops off the wings (of the mountains). **वृत्रशत्रौ**, *Vide infra* 2. 20. **अवेदनाज्ञम्**, qualifies Mainaka. Anal. जानाति यः सः ज्ञः, वेदनानां ज्ञः वेदनाज्ञः, न वेदनाज्ञः अवेदनाज्ञः (नञ् तत्पुरुष), तम् ; or वेदनां जानाति यः स वेदनाज्ञः, न वेदनाज्ञः अवेदनाज्ञः, तम्. **कुलिशक्षतानाम्**, 'of the cuts of the thunderbolt.'

Trans.—She (Mena) gave birth to Mainaka who made friends with the ocean; who, when the foe of Vritra who lopped off the wings (of the mountains) flew into rage (at seeing Mainaka escape unhurt), did not, (because of taking shelter with the ocean), experience the pain of the cuts of the thunder-bolt; and who married a Naga damsel (there in the netherworld).

अनुवाद—उस से मैनाक नाम का पुत्र उत्पन्न हुआ। (मैनाक के गौरव का अनुमान इस से हो सकता है) कि उस का नागों की कन्या से विवाह हुआ और समुद्र से उस की मित्रता थी। पश्चात् जब इन्द्र ने क्रोध में आकर सब पर्वतों के पक्ष काट लिये तो मैनाक को उस के पक्षघाती की खबर तक न हुई ॥ २० ॥

अथावमानेन पितुः प्रयुक्ता
दक्षस्य कन्या भवपूर्वपत्नी ।
सती सती योगविसृष्टदेहा
तां जन्मने शैलवधूं प्रपेदे ॥ २१ ॥

अथेति ॥ **अथ** मैनाकजननानन्तरं **दक्षस्य** प्रजापतेः **कन्या (भवपूर्वपत्नी)** भवस्य महादेवस्य पूर्वपत्नी पूर्वभार्या **सती** पतिव्रता ॥ सती साध्वी पतिव्रता इत्यमरः । **सती** नाम देवी **पितुः दक्षस्य** ॥ कर्तरि षष्ठी ॥ **अवमानेन** स्वभर्त्रवज्ञया **प्रयुक्ता** प्रेरिता (**योगविसृष्टदेहा**) योगेन योगमार्गेण विसृष्टदेहा त्यक्तदेहा सती । **जन्मने** पुनरुद्भवाय **तां शैलवधूं** मेनकां **प्रपेदे** । अत्र पुरा किल सती देवी दक्षाध्वरे तत्कृतां स्वभर्त्रवज्ञाम सहमाना पितरं प्रसूं चोपेत्य मत्कर्तव्यकार्यं त्वज्जामातैव करिष्यतीति निर्धार्य देवकार्याणि साधयितुं च योगाग्निना स्वशरीरं ददाहेति पुरावृत्तकथानुसंधेया ॥

Notes.—**दक्षस्य कन्या**, Daksha was one of the ten sons of Brahma and was the chief of patriarchs of mankind. Once he instituted a great sacrifice, but he did not send for his daughter Sati nor for her husband Siva. Sati, however, went uninvited, but no notice was taken of her. Burning with insult, she kindled fire by fixing her mind on this element and perished therein. When Siva heard this, he flew into rage, destroyed the sacrifice of Daksha, and decapitated him. **भवपूर्व पत्नी**, '(Sati), the former wife of Bhava *i. e* Siva.' पूर्वा च असौ पत्नी च पूर्वपत्नी, भवस्य पूर्वपत्नी भवपूर्वपत्नी. **सती सती**, 'chaste Sati,' the first सती being taken as a fem. formation from सत् 'pious, good' and the second as a Proper Noun. **योगविसृष्टदेहा**, 'who renounced her body through Yoga.' Anal. योगेन विसृष्टो देहो यस्याः सा. **प्रपेदे**, 'resorted'. लिट् 3rd per. sing. from प्र√पद 'to go'.

Trans.—Now, constrained by her father's insult, the daughter of Daksha, chaste Sati, the former wife of Siva, renouncing her body through yoga, resorted to the wife of the mountain-lord for re-birth.

अनुवाद—उस समय शिवजी की पहली पत्नी और दक्ष की कन्या सती जो पतिव्रत धर्म में दृढ़ थी पिता के अनादर के कारण योगद्वारा अपने शरीर को त्याग कर पुनर् जन्म के लिये (हिमालय पर्वत) की पत्नी के पास आई ॥ २१ ॥

सा भूधराणामधिपेन तस्यां
समाधिमत्यामुदपादि भव्या ।
सम्यक्प्रयोगादपरिक्षतायां
नीताविवोत्साहगुणेन संपत् ॥ २२ ॥

सेति ॥ **भव्या** कल्याणी **सा** सती **भूधराणामधिपेन** हिमवता **समाधिमत्यां** नियमवत्यां **तस्यां** मेनकायां **सम्यक्प्रयोगात्** साध्वाचरणाद्धेतोः **अपरिक्षतायाम** अभ्रष्टयां **नीतौ उत्साहगुणेन** उत्साहशक्त्या । कर्त्रा । **संपद् इव उदपादि** । उत्पादिता । उत्पद्यतेरण्यन्तात्कर्मणि लुङ् । चिण्भावकर्मणोः । इति चिण्प्रत्ययः । चिणो लुक् इति तस्य लुक् ॥

Notes.—**उदपादि,** is as construed by the Comm. लुङ्. 3rd pers. sing. from the *causal* of उद् √पद् "to be born" '(she) was begotten'. We get—इ (चिण्) from चिण् भावकर्मणोः . This formation is not to be confused with an identical form to be obtained in लुङ् by the application of चिण् ते पदः Pan. 3. 1. 60. **समाधिमत्यां तस्याम** । Note that loc is used in respect of the female of whom an offspring is born, corresponding to the Eng. 'of.' Cf....and David the king begat Solomon *of* her that had been the wife of Urias. Matt. 1. 6. **उत्साहगुणेन,** 'by the virtue of energy or ambition.' To realise the beauty and the force of the simile we must remember that उत्साहगुणेन is masc. and corresponds to भूधराणाम् अधिपेन, that अपरिक्षतायां नीतौ is fem. and corresponds to समाधिमत्यां तस्याम्, and that lastly, सा भव्या corresponds to संपत्. Further Ambition pairing with unfailing Policy necessarily begets Wealth. In the same way, Parvati's birth came as the blessed result of their pious lives.

Trans.—She who was auspicious was begotten by the Lord of the Mountains of her who was devoted to pious life, as Prosperity is begotten by Ambition of Policy unfailing because of being properly directed.

अनुवाद—जिस प्रकार उत्साह द्वारा भली भांति प्रयुक्त की हुई न बिगड़ी हुई नीति से ऐश्वर्य का उदय होता है इसी प्रकार उस कल्याणवती सती का नियमाचरण में तत्पर मेना से हिमालय के घर जन्म हुआ ॥

प्रसन्नदिक्पांशुविविक्तवातं
शङ्खस्वनानन्तरपुष्पवृष्टि ।
शरीरिणां स्थावरजङ्गमानां
सुखाय तज्जन्मदिनं बभूव ॥ २३ ॥

प्रसन्नेति ॥ प्रसन्ना निर्मला दिशो यस्मिंस्तत् **प्रसन्नदिक्** । (**पांशुविविक्तवातं**) पांशुविविक्ता रजोरहिता वाता यस्मिंस्तत्तथोक्तम् । (**शङ्खस्वनानन्तरपुष्पवृष्टि**) शङ्खस्य स्वनात्स्वनस्य वा अनन्तरं पुष्पवृष्टिर्यस्मिंस्तत्तथोक्तं । **तज्जन्मदिनं** । तस्याः पार्वत्या जन्मदिनम् । (**स्थावरजङ्गमाना**) स्थितिशीलाः स्थावराः शैलवृक्षादयः । स्थेशभासपिशकसो वरच् इति वरच्प्रत्ययः ॥ जङ्गम्यन्ते भृशं गच्छन्तीति जंगमा देवातिर्यङ्मनुष्यादयः । स्थावराश्च जङ्गमाश्च तेषां द्वयानामपि **शरीरिणां सुखाय** आनन्दाय **बभूव** ॥

Notes.—**प्रसन्नदिक्**, n. m. sing. qualifies **दिनं** (day) 'when all the quarters were bright' Anal. **प्रसन्नाः** (bright and clear) दिशो यस्मिन् (दिने), तत्. **पांशुविविक्तवातं**, similarly qualifies **दिनं** 'when winds blew all free from dust' Anal. पांशुभिः विविक्तः (free from, devoid of) वाताः यस्मिन् (दिने), तत्. And so also **शंखस्वनानन्तरपुष्पवृष्टि**. See comm. **शरीरिणां स्थावरजङ्गमानाम्** 'to embodied beings immovable and movable alike.' The moving embodied beings constitute the animate world; whereas trees, mountains conceived as beings presided over by their respective deities, and the like are meant by स्थावरशरीरिणां. Cf. दिशः प्रसेदुः पवनः सुखं ववौ ... निरधुद् ... तथा । पपात मौलौ

कुसुमाञ्जलिरतदा बभूव तज् जन्मदिनं सुखप्रदम् ॥ Siva P. Asvaghosha describes in similar language the birth of Budha in Budhacharitam.

Trans.—The day of her birth was a blessing to all embodied beings movable and immovable (alike). (It was a day) when the quarters were bright and clear, when breezes blew all free from dust, and when the blowing of conches was closely followed by showers of flowers.

अनुवाद—उस दिन सब दिशायें निर्मल थीं, वायु में धूलि नाम को न थी, बाजे बजते थे और पुष्पों की वृष्टि होती थी। स्थावर (न चलने वाले) और जङ्गम सभी शरीरधारियों को उस के जन्म से अधिक आनन्द हुआ ॥ २३

तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकासे ।
विदूरभूमिर्नवमेघशब्दा-
दुद्भिन्नया रत्नशलाकयेव ॥ २४ ॥

तयेति ॥ **स्फुरत्प्रभामण्डलया तया दुहित्रा सवित्री** जनयित्री। स्वरतिसूतिसूयतिधूञूदितो वा इतीडागमः। विदूरस्याद्रेः प्रान्तभूमिः **विदूरभूमिः**। अविदूरे विदूरस्य गिरेरुत्तुङ्गरोधसः। काकतालीयसीमान्ते मणीनामाकरो भवेत् ॥ इति बुद्धः ॥ **नवमेघशब्दादुद्भिन्नया रत्नशलाकया** रत्नाङ्कुरेण **इव सुतरां चकासे** रराज ॥

Notes.—**सुतराम्**, 'all the more'; adv. modifying **चकासे**, 'shone' (लिट् 3rd per. sing. from कास् 'to shine'). **सवित्री**, 'mother' from सू 'to produce'. **स्फुरत्प्रभामण्डलया**, f. instr. sing. goes with तया (by her) 'resplendent with a halo of light'. Great beings usually have a halo of lustre about them. Anal. प्रभायाः मण्डलम् प्रभामण्डलं (षष्ठी तत्पु०), स्फुरत् (quivering, shimmering) प्रभामण्डलं यस्याः सा (बहुव्रीहि), तया. **विदूरभूमिः** is a land of gems situated, as Malli. says, near the confines of Kakataliya (in

Ceylon). The peculiarity of this land of gems is that at the rumbling of clouds veins of jewels come up and send their shimmering light around. The land of gems, thus, acquires added lustre and looks unusually bright. **रत्नशलाकया,** 'because of shoots of gems, ribs of jewels'. Anal. रत्नस्य शलाका, तया.

Trans.—The mother looked all the more radiant (with happiness) by her daughter, who had (about her) a halo of shimmering light, as the Land of Gems shines with added lustre because of veins of gems having come up at the rumbling of the new clouds.

अनुवाद—प्रभामण्डल-धारिणी पुत्री से उस की माता की शोभा इस प्रकार बढ़ गई जिस प्रकार विदूर पर्वत के पास की भूमि की शोभा मेघ गर्जना से बाहर आई हुई रत्नों की पङ्क्ति के कारण बढ़ जाती है ॥ २४ ॥

दिने दिने सा परिवर्धमाना
लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान्विशेषा-
ञ्ज्योत्स्नान्तराणीव कलान्तराणि ॥ २५ ॥

दिन इति ॥ लब्ध उदयो यया सा **लब्धोदया** । उत्पन्नेत्यर्थः । अभ्युदितेत्यन्यत्र । **दिने दिने** प्रतिदिनम् ॥ नित्यवीप्सयोः इति वीप्सायां द्विरुक्तिः ॥ **परिवर्धमाना** उभयत्र समानमेतत् । **सा** बाला । चन्द्रमस इयं **चान्द्रमसी लेखेव** **लावण्यमयान्** कान्तिविशेषप्रचुरान् ॥ मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥ इति भूपालः ॥ **विशेषान्** अवयवान् ॥ विशेषोऽवयवे व्यक्तौ इत्युत्पलमालायाम् ॥ ज्योत्स्नायामन्तरमन्तर्धानं येषां तानि **ज्योत्स्नान्तराणि** ज्योत्स्नयान्तर्हितानि । तन्मयानीति यावत् । अन्याः कलाः **कलान्तराणि इव** ॥ सुप्सुपेति समासः । स्थानात्मीयान्यतादर्थ्यरन्ध्रान्तर्धिषु चान्तरम् । इति शाश्वतः । **पुपोष** उपचितवती ॥ इयं वाक्योपमेत्याह दण्डी । तल्लक्षणं तु—"वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते । एकानेकेवशब्दत्वात्सा तु वाक्योपमा द्विधा ॥

Notes.—दिने दिने, The iteration here is in the sense of 'every' (वीप्सा) **लब्धोदया,** having received her

birth (Parvati);' 'risen (the digit of moon)'. Anal. लब्धः उदयः यया सा (Bahu.). **चान्द्रमसी**, f. 'lunar'. चन्द्रमसः इयम् इति चन्द्रमस्+अण्+ङीप् by Pan. टिड्ढाण्० 4. 1. 15. **पुपोष**, 'developed'; लिट् 3rd per. sing. from पुष् 1 or 4 or 9 P. **लावण्यमयान्**, 'full of loveliness' लावण्य is an abstract noun formed from लवण. लावण्य, properly speaking is the quivering shade of pearls. See the comm. **विशेष**, m. 'a limb, a feature'. **ज्योत्स्नान्तराणि**, 'steeped in moonshine, Anal ज्योत्स्नायाम् in the moonshine) अन्तरं (disappearance) येषां, तानि. In **कलान्तराणि**, 'other digits' अन्तर combines in the sense of अन्य 'other'. अन्या कला कलान्तरं, तानि कलान्तराणि. In this stanza the Poet describes the lovely growth of the baby. She developed her loveliness as the moon develops her lovely digits.

Trans.—As days went by, she who had made her appearance (in the world), growing, developed lovely features as the lunar digit (*i. e.* the crescent moon) develops (each day since her first appearance) the other digits which have (hitherto) been steeped in her own lustre.

अनुवाद—जैसे उदित हुई चन्द्र-कला प्रतिदिन बढ़ती हुई अपनी अन्य चांदनी में ढँपी हुई कलाओं को पुष्ट करती है इसी तरह उत्पत्ति के पश्चात् उस के भी सुन्दर अङ्ग प्रतिदिन पुष्ट होने लगे ॥ २७ ॥

तां पार्वतीत्याभिजनेन नाम्ना
बन्धुप्रियां बन्धुजनो जुहाव ।
उ मेति मात्रा तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम ॥ २६ ॥

तामिति ॥ **बन्धुप्रियां तां** बालां **बन्धुजनः** पित्रादिः । अभिजनादागत इति काशिका ॥ **नाम्ना** । पर्वतस्यापत्यं स्त्री **पार्वती** । तस्यापत्यम् इत्यणप्रत्ययः ॥ — तेन **आभिजनेन** । पित्रादिपूर्वसंबन्धोपाधिकेनेत्यर्थः । अभिजनाः पूर्वबान्धवाः

इति जुहाव आहूतवान् ॥ ह्वयतेर्लिटि रूपम् । पर्वतजन्यत्वोपाधिना पार्वतीति नाम्ना प्रसिद्धिरिति भावः । **पश्चाद्** अभिजननामप्रवृत्त्यनन्तरं **मात्रा** जनन्या ॥ उ इति संबोधने ॥ उ इति वितर्कसंबोधनपादपूरणेषु इति गणव्याख्याने ॥ माशब्दो निषेधे ॥ **उ** हे वत्से **मा** मा कुरु **इति** एवं रूपेण । **तपसः** तपश्चर्यायाः ॥ वारणार्थानामीप्सितः इत्यपादानत्वात्पञ्चमी ॥ **निषिद्धा** निवारिता सती **सुमुखी** सा बाला उमेत्याख्यां नामधेयं **उमाख्यां जगाम** ॥

Notes—**पार्वती**, f. पर्वतस्य इयम् इति पर्वत + अण्, स्त्रियाम् पार्वती. The comm. derives the word by means of तस्यापत्यम् Pan. 4. 1. 92. But the application of अण् by this rule is barred by अत: इञ् 4. 1. 95. which says that after bases ending in short अ (i.e. अत्) the suffix इ (ञ्) is added when an offspring is meant. **आभिजनेन**, 'by the patronymic अभिजन means 'family, lineage.' Therefore **आभिजनेन नाम्ना** 'by the family (or patronymic) name.' **बन्धुप्रियां**, 'the darling of her relatives.' Anal. बन्धूनां प्रिया, तां. —**जन** often comes at the end of nouns to give them a plural sense. बन्धुजन thus simply means 'relatives'. **उमा इति.** The analysis of उमा into उ and मा (Oh don't) is followed by Siva P. 3 मा गच्छ, वनं घोरं सर्व-विघ्नाहरं सदा । Parvati being forbidden from practising austerities with the words 'oh do not (practise austerities)' came to be called by the same name (उमा 'oh do not'). **उमाख्यां**, —उमा इति आख्या (name), ताम्.

Trans.—Relatives called her who was their darling (child) by the patronymic name Parvati. Subsequently, when forbidden by her mother from (practising) penance with the words 'Oh don't,' the lovely-faced maiden acquired the name Uma.

अनुवाद—(हिमाचल के) बन्धु-जनों ने पितृ वंश के नाम पर उस का जो बन्धु-जनों को बहुत प्यारी थी पार्वती (अर्थात् पर्वत की कन्या) नाम रखा । परन्तु पीछे (देखो सर्ग ५ श्लोक ३) जब उसकी माता ने उस सुमुखी को तप से

रोकते समय 'ऐसा मत (कर)' यह कहा तो उस का नाम उमा भी पड़ गया। (संस्कृत भाषा से उमा का शब्दार्थ 'ओह नहीं' यह है)

महीभृतः पुत्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम्।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा ॥ २७ ॥

महीभृत इति ॥ पुत्राश्च दुहितरश्च पुत्राः ॥ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् इत्येकशेषः । तेऽस्य सन्तीति पुत्रवान् ॥ भूमार्थे मतुप् ॥ तस्य **पुत्रवतोऽपि** बह्वपत्यस्यापीत्यर्थः । **महीभृतः** हिमाद्रेः **दृष्टिः** चक्षुः **तस्मिन् अपत्ये** तोके। अपत्यं तोकं तयोः समे इत्यमरः ॥ तस्यां पार्वत्यामित्यर्थः । **तृप्तिं न जगाम**। तथा हि । **अनन्तपुष्पस्य** नानाविधकुसुमस्यापि **मधोः** वसन्तस्य संबन्धिनी **द्विरेफमाला** भृङ्गपङ्क्तिश्चूतस्य विकारे **चूते** चूतकुसुमे ॥ अवयवे च प्राण्योषधिवृक्षेभ्यः इति विकारार्थोत्पन्नस्याण्प्रत्ययस्य लुक्प्रकरणे पुष्पमूलेषु बहुलम् इति पठनाल्लुक् ॥ (**सविशेषसङ्गा**) सविशेषः सातिशयः सङ्गो यस्याः सा तथोक्ता। अत्यन्तासक्तेत्यर्थः ॥

Notes—महीभृतः, m. gen. sing. 'of the Mountain' महीं बिभर्ति यः सः महीभृत्, तस्य. मही + भृ + क्विप्. A number of names of the mountain are paraphrases of 'the supporter of the earth' *e.g.* भूभृत्, महीध्रः, क्ष्माभृत्, भूधरः, धराधरः etc. **पुत्रवतः अपि**, 'though blessed with many (other) children.' वत (मतुप्) expresses 'multitude.' Cf. sl. 7. 4. एकत्र सत्याम् अपि पुत्रपङ्क्तौ......उमा विशेषोच्छ्वसितं बभूव **अपत्ये.** The birth of a child continues the line and does not allow it to fall. Hence अ + पत् + यत्. **द्विरेफ–**, 'a bee', because the word भ्रमर contains two r's (रेफ). द्विरेफमाला f. in regard to मधोः corresponds to दृष्टिः महीभृतः. **सविशेषसङ्गा**, f. nom. sing. and विशेषेण सह वर्तमानः सविशेषः (particular; special), सविशेषः सङ्ग (attachment, fondness) यस्याः सा (bahuvr.)

Trans.—The eyes of the Mountain (Himalaya), although he had many other children, would have no satiation, (however long he looked) at his this child (Parvati). The rows of bees in spring exhibit special fondness for mango blossoms, although the season abounds in countless other varieties of flowers.

अनुवाद—पुत्रों के होते हुए भी पर्वत (हिमालय) की दृष्टि उस पुत्री को बार बार देख कर तृप्त न होती थी । ठीक है कि बसन्त-ऋतु में बहुत से पुष्पों के होते हुए भी आम की मञ्जरी ही में भ्रमर-माला का अधिक अनुराग होता है ॥ २७ ॥

प्रभामहत्या शिखयेव दीप-
स्त्रिमार्गयेव त्रिदिवस्य मार्गः ।
संस्कारवत्येव गिरा मनीषी
तया स पूतश्च विभूषितश्च ॥ २८ ॥

प्रभेति ॥ **प्रभामहत्या** प्रकाशाधिकया **शिखया** ज्वालया **दीपः इव** शिखादीपयोरवयवावयविभावाद्भेदेन व्यपदेशः॥ त्रयो मार्गा यस्यास्तया **त्रिमार्गया** मन्दाकिन्या । (**त्रिदिवस्य**) तृतीया द्यौर्लोकः इति त्रिदिवः स्वर्गः ॥ वृत्तिविषये त्रिशब्दस्य त्रिभागवत्पूरणार्थत्वम् । पृषोदरादित्वादिद्रुक्छन्दादकारागमः । पुंस्त्वं लोकात् । दीव्यतेर्घञर्थे कविधानम् । दीव्यन्त्यत्र जना इति दिव इति क्षीरस्वामी । तस्य मार्ग इव । (**संस्कारवत्या**) संस्कारो व्याकरणजन्या शुद्धिस्तद्वत्या **गिरा** वाचा । भद्रैषां लक्ष्मीर्निहिताधिवाचि इति श्रुतेरिति भावः ॥ मनस ईषा मनीषा सास्यास्तीति **मनीषी** विद्वान् **इव** ॥ शकन्ध्वादित्वात्साधुः ॥ **तया** पार्वत्या **स** हिमवान् **पूतः** शोधितश्च **विभूषितश्च** ॥ अत्र शिखागिरोराविशिष्टयोरुपमानानर्हत्वान्न विशेषणाधिक्यदोषः । इयं मालोपमा ॥

Notes.—**प्रभामहत्या**, f. instr sing. qualifies **शिखया** (by the flame) 'having excessive lustre.' Anal. प्रभया महती, तया (तृतीया तत्॰). **त्रिमार्गा,** f. the name of the celestial Ganges flowing in Heaven.' Bhagiratha, the great-grandson of Sagara brought it, by practising austere penance, to the Earth, and had it down to the nether-

world to purify the ashes of his 60,000 ancestors, sons of Sagara. It has thus a three-fold career, in Heaven (त्रिमार्गा) or (मन्दाकिनी), on the Earth (भागीरथी), and in the netherworld (भोगवती). **त्रिदिव,** (ending in अ) is Heaven, being the third world. (Anal तृतीया द्यौः इति त्रिदिवः). **संस्कारवत्या,** f. instr. sing. qualifying गिरा (by speech) 'marked by purity of diction and choiceness of expression (संस्कार).' **मनीषी,** 'a man of learning' मनीषा (*i.e.* मनस ईषा) 'wisdom' अस्य अस्ति इति. The three similes are the three touches which make the portrait of Parvati finished and perfect. Brilliance, purity and mental refinement are brought out in the three lines.

Trans.—He received (added) sanctity and glory by her (presence) as a candle by its exceedingly brilliant flame, or as the pathway of Heaven by the presence of the three-coursed Ganges, or as a man of learning by his refined speech.

अनुवाद—बहुत अधिक प्रकाश देने वाली ज्वाला जिस प्रकार दीपक को, तीनों लोकों में बहने वाली गङ्गा जिस प्रकार स्वर्ग के मार्ग को, और शुद्ध और पवित्र वाणी जिस प्रकार विद्वान पुरुष को सुभूषित करती है, इसी प्रकार पार्वती से उस (हिमालय) की शोभा और पवित्रता दोनों ही अधिक होगई ॥ २८ ॥

मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः कृत्रिमपुत्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्विशतीव बाल्ये ॥ २९ ॥

मन्दाकिनीति ॥ **सा** पार्वती **बाल्ये** वयसि क्रीडानां रसः स्वादः । रुचिरिति यावत् । तं **क्रीडारसम्** ॥ रसो गन्धे रसः स्वादे इति विश्वः ॥ **निर्विशतीव** भुञ्जानेव । निर्वेशो भृतिभोगयोः इति विश्वः ॥ आच्छीनद्योर्नुम् इति विकल्पान्नुमभावः । **सखीनां मध्यगता** सती (**मन्दाकिनीसैकतवेदिकाभिः**) मन्दाकिन्याः सैकतेषु पुलिनेषु वेदिकाभिः **कन्दुकैः** ॥ (**कृत्रिमपुत्रकैः**) क्रियया निर्वृत्तैः कृत्रिमैः । डि्वतः

क्त्रिः इति क्त्रिप्रत्ययः । क्त्रेर्मम्नित्यम् इति मबागमश्च ॥ पुत्रकैः पाञ्चालिकाभिः पाञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता । इत्यमरः ॥ संज्ञायां कन् इति कन्प्रत्ययः ॥ च मुहुः पुनः पुनः रेमे ॥

Notes.—मन्दाकिनीसैकतवेदिकाभिः, 'with (sandy) altars made on the sandbanks of the Ganges.' Anal. मन्दाकिन्याः सैकतानि (sandbanks), तेषु याः वेदिकाः (altars), ताभिः कृत्रिमपुत्रकैः, 'with dolls.' Anal. कृत्रिमाः (made by art, artificial) पुत्रकाः, तैः. For derivation of कृत्रिम see the Comm. मध्यगता, f. nom. sing. 'being in the midst of.' Anal. मध्यं गता मध्यगता (द्वितीया तत्०). निर्विशन्ती, f. nom. sing. 'enjoying.' विश् with निर् means 'to enjoy.' In this stanza we have the description of Parvati's pastimes. Girls, it is well-known, love playing with balls, building houses in the sands, and toys. The use of the word वेदिकाभिः (altars), however, points out her early religious leanings. रेमे, is लिट् 3rd per. sing. middle voice from √ रम् 'to sport.'

Trans.—In her childhood she played, in the midst of her friends, with altars built on the sands of the Ganges, with balls and with dolls, enjoying the very spirit of sport as it were

अनुवाद—जब कुछ बड़ी होने पर वह सखी सहेलियों के साथ गेंद खेलती, गुड़ियों से मन बहलाती और गङ्गा जी की रेत मे बालू की वेदियां बना कर प्रसन्न होती, तब ऐसा ज्ञात होने लगता था मानों वह खेल-कूद के रस का पूर्णतया स्वाद ले रही है ॥ २९ ॥

तां हंसमालाः शरदीव गङ्गां
महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले
प्रपेदिरे प्राक्तनजन्मविद्याः ॥ ३० ॥

तामिति ॥ (स्थिरोपदेशां : स्थिरः स्थेयानुपदेशः प्राग्भवीयो यस्यास्तादृशीम् ।

मघोविनीमित्यर्थः । **तां** पार्वतीम् **उपदेशकाले प्राक्तनजन्मविद्याः** । पूर्वजन्माभ्यस्तविद्या इत्यर्थः **शरदि गङ्गां हंसमालाः इव नक्तं** रात्रौ **महौषधिं** तृणविशेषम् **आत्मभासः** स्वदीप्तयः **इव प्रपेदिरे** ॥ उपमानसामर्थ्यादुपदेशमन्तरेणैवेति गम्यते ॥

Notes.—शरदि, 'In the autumn season'. Parvati soon mastered all the departments of knowledge, so soon, indeed, that the phenomenon could be explained only on the assumption that her impressions in matters of learning in the previous life were revived at the time of instruction in as natural a manner as the swans, though away elsewhere during the other seasons, return to the Ganges in autumn, or as lustre returns to the phosphorescent herbs at night. The doctrine of *karman* philosophy is referred to in this stanza. **नक्तम्**, indec. 'at night'. The word is the same as the German Nacht, the English night and Lat. noxctis. **आत्मभासः**, f. nom. pl. Anal. आत्मनः भासः आत्मभासः. **भास्**, f. means lustre. **स्थिरोपदेशाम्**, f. acc. sing. refers to तां (Parvati) 'who had an abiding impression of her (previous) learning'. Anal. स्थिरः उपदेशः यस्याः सा स्थिरोपदेशा, ताम्. **प्राक्तनजन्मविद्याः**, 'the lores of her former life'. Anal. प्राक्तनं जन्म प्राक्तनजन्म (कर्मधारय), प्राक्तनजन्मनः विद्याः प्राक्तनजन्मविद्याः. प्राक्तन (early) is formed from प्राच्+तन Pan. 4. 3. 23. Siva Purana closely imitates this stanza. Cf. गङ्गां यथा हंस खगा शरत्सु वै रात्रौ स्व भासस्तु यथा महौषधीः । गुरूपदेशाद् उपदेशपण्डितां तां पूर्वसंस्कारगणा ययुर् मुदा ॥ For impressions of previous lives. cf. Sak. 5. 2. **प्रपेदिरे**, 'resorted' लिट् 3rd per. plu. from प्र√पद्

Trans.—Like the rows of swans to the Ganges in autumn, or like their own lustre to the phosphorescent herbs at night, the lores (acquired) in her former life returned (as naturally) at the time of instruction to her who had abiding impression (of her previous learning).

अनुवाद—जैसे शरद् ऋतु में हंसों की पङ्क्तियां गङ्गा के तट पर स्वयम् आ जाती हैं, जैसे रात्रि के समय सञ्जीवनी आदि ओषधियों में ज्योति स्वयम् आ जाती है, वैसे ही विद्या-प्राप्ति के समय (पार्वती की) पूर्वजन्म की विद्यायें उस स्थिर संस्कारों वाली को स्वयम् प्राप्त हो गईं ॥ ३० ॥

असंभृतं मण्डनमङ्गयष्टे-
रनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं
बाल्यात्परं साथ वयः प्रपेदे ॥ ३१ ॥

असंभृतमिति ॥ **अथ सा** पार्वती । **अङ्गयष्टेः असंभृतम्** अयत्नसिद्धं **मण्डनं** प्रसाधनम् **अनासवाख्यम्** आसवाख्यारहितं **मदस्य करणं** साधनं **कामस्य पुष्पव्यतिरिक्तम् अस्त्रम्** अस्त्रभूतं **बाल्यात्** शैशवात् **परम्** अनन्तरभावि **वयः** यौवनं **प्रपेदे** प्राप ॥ यौवनेनैव हि युवतयः प्रसाध्यन्ते माद्यन्ते काम्यन्ते चेति भावः । अत्र द्वितीयपादे आसवरूपकारणाभावेऽपि तत्कार्यमदोक्तेर्विभावनालंकारः । तदुक्तम्—कारणाभावे कार्योत्पत्तिर्विभावना इति ॥ प्रथमतृतीययोस्त्वारोप्यमाणयोर्मण्डनमदनास्त्रत्वयोः प्रकृतोपयोगात्परिणामालंकारः । तल्लक्षणं तूक्तम् ॥

Notes.—असंभृतं, 'not acquired (by art).' Anal. न संभृतम् (सं √भृ 'to accumulate.') असंभृतम् (नञ् तत्०) **अङ्गयष्टेः**, 'to her slender frame.' Anal. अङ्गं यष्टिर् इव (उपमित कर्मधारय), तस्य. **अनासवाख्यम्**, 'whose name is not wine.' Anal. आसव इति आख्या (name) यस्य तद् आसवाख्यं (bahuvr.), न आसवाख्यम् अनासवाख्यम् (नञ्तत्०). **मदस्य**, 'of hilarity.' मद expresses here joyousness marked by excitement and tipsiness (पंजाबी — नवीं जवानी दा मस्तेवां). **पुष्पव्यतिरिक्तम्**, n. acc. sing. qualifies **अस्त्रम्** (a missile) 'other than the flowers.' Kama's five flower-arrows are given in the sl. अरविन्दम् अशोकं च चूतं च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥ The charming youth of a woman is often plied by Love as his sixth missile. **बाल्यात् परं वयः**, 'the age beyond childhood *i. e.* youth.' In Ragh. 5. 63. we have it said of अज that he बाल्यात् पराम् इव दशाम् अध्युवास. पर meaning

'beyond' governs the abl. Here the Poet describes Parvati's youth diffusing rare charm on her slender frame, producing hilarity in her mind, and supplying Love with an additional weapon.

Trans.—Then she reached the age succeeding childhood (*i. e.* youth), which was an adornment, not acquired (by art), of her slender frame, which produced hilarity (in her) (and the cause of hilarity) was not to be called wine, and which became a missile of Kama other than the (five) arrows.

अनुवाद—तदनन्तर (बाल्यावस्था के बीत जाने पर) उसे यौवन प्राप्त हुआ जो उस के अवयवों का नैसर्गिक भूषण था, जो मद्य न होता हुआ भी नशे के लाने का साधन था, और जो पांच पुष्प-बाणों से भिन्न कामदेव का अस्त्र था ॥ ३१ ॥

उन्मीलितं तूलिकयेव चित्रं
सूर्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरस्रशोभि
वपुर्विभक्तं नवयौवनेन ॥ ३२ ॥

उन्मीलितमिति ॥ **नवयौवनेन** प्रथमयौवनेन **विभक्तम्** अभिव्यञ्जितम् । पीनजघनादिसंस्थानमित्यर्थः ॥ **तस्याः** पार्वत्याः **वपुस्तूलिकया** कूर्चिकया । शलाकयेत्यर्थः । तूलिका कथिता लेख्यकूर्चिका तूलशय्ययोः । इति विश्वः ॥ **उन्मीलितं** रञ्जनद्रव्येणोद्भासितं समुत्कीर्णम् । रूपमिति यावत् । **चित्रम्** आलेख्यम् । **सूर्यांशुभिर्भिन्नं** विकसितम् **अरविन्दं** पद्मम् **इव** । चतस्रः अस्रयो यस्य तच् चतुरस्रमन्यूनातिरिक्तं यथा तथा शोभत इति **चतुरस्रशोभि** ॥ ताच्छील्ये णिनिः । **बभूव** चित्रारविन्दयोस्तूलिकातरणिकिरणसंबन्ध इव स्वतः सिद्धस्यैवाङ्गसौष्ठवस्य यौवनप्रादुर्भावोऽभिव्यञ्जको बभूवेत्यर्थः ॥

Notes.—उन्मीलितं, goes with चित्रं (a painting) 'wakening to' the painter's brush. उन्मीलनं as applied to a painting means the developing of a picture when it is being touched up by the artist. The word is opposed to निमीलितम्. तूलिका, i. e. a painter's brush'.

भिन्नम् इव अरविन्दम्, 'like a lotus unfolding' under the influence of the sunbeams. **चतुरस्रशोभि,** n. nom. sing. qualifies predicatively वपुः (body) 'charming in its symmetry. चतुरस्र primarily means four-cornered; then harmonious, symmetrical. Anal. चतुरस्र is an irregular bahuvrihi चतस्रः अस्रयः यस्य तत् चतुरस्रम् Pan. 5. 4. 120 सुप्रात॰. चतुरस्रं यथा तथा शोभते यत् तत्.

Trans.—Her person, charming in its symmetry, developed under the influence of fresh youth, as a portrait develops under (the artist's) brush, or as a lotus unfolds (itself) under the influence of the sunbeams.

अनुवाद—जिस प्रकार कूची द्वारा (रंग फेरने से) चित्र सुन्दर बन आता है, जिस प्रकार सूर्य की किरणों से कमल-पुष्प खिल उठता है इसी प्रकार नवप्राप्त यौवन से उस का शरीर सब अङ्गों में सौन्दर्य से परिपूर्ण हो गया ॥ ३२ ॥

देवतानां रूपं पादाङ्गुष्ठप्रभृति वर्ण्यते मानुषाणां केशादारभ्येति धार्मिकाः । संप्रति सप्तदशभिः श्लोकैः पार्वत्याः पादादिकेशान्तवर्णनमारभते—

> **अभ्युन्नताङ्गुष्ठनखप्रभाभि-**
> **र्निक्षेपणाद्रागमिवोद्गिरन्तौ ।**
> **आजह्रतुस्तच्चरणौ पृथिव्यां**
> **स्थलारविन्दश्रियमव्यवस्थाम् ॥ ३३ ॥**

अभ्युन्नतेति (**अभ्युन्नताङ्गुष्ठनखप्रभाभिः**) अभ्युन्नतयोरङ्गुष्ठनखयोः प्रभाभिर्निमित्तेन **निक्षेपणात्** निर्भरन्यासाद्धेतोः । **रागम्** अन्तर्गतं लौहित्यम् । रागः क्लेशादिके रक्ते मात्सर्ये लोहितादिषु । इति शाश्वतः ॥ **उद्गिरन्तौ** वमन्तौ । बहिर्निःसारयन्ताविव **इव** स्थितावित्यर्थः ॥ अत्रोद्गिरतेर्गौणार्थत्वान्न ग्राम्यतादोषः । प्रत्युत गुण एव । यथाह दण्डी—निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥ इति । तस्याश्चरणौ **तच्चरणौ** । **पृथिव्यामव्यवस्थां** व्यवस्थारहिताम् । स्थलनिवेशषणान्नियतलौसंचारिणीमित्यर्थः । **स्थलारविन्दश्रियम् आजह्रतुः** । स्थलारविन्दलौहित्यलाभः । अत्र सामुद्रिकाः—यस्या रक्ततलौ पादावुन्नताग्रौ तलस्पृशौ । निगूढगुल्फौ निहतौ सा स्यान्नृपतिवल्लभा ॥ इति । अत्रोपमानधर्मस्यारविन्दश्रियश्चरणयोरुपमेययोरसंभवादरविन्दश्रियमिव श्रियमिति प्रतिबिम्बीकरणाक्षेपान्निदर्शनालंकारः । सा च संबन्धेऽ-

संबन्धलक्षणातिशयोक्त्यनुप्राणिता । अव्यवस्थामित्यनेन स्थलारविन्दस्य स्थैर्यसंबन्धेऽप्यसंबन्धाभिधानात् । निदर्शनालक्षणं तु—असंभवद्धर्मयोगादुपमानोपमेययोः । प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना ॥ इति ॥

Notes.—The detailed and graphic description of the person of Parvati now follows. In accordance with the maxim that the description of gods and godesses should begin with the feet while that of human beings with the head, our Poet first describes the toe and the nail of Parvati. **अभ्युन्नताङ्गुष्ठनखप्रभाभिः**,—Anal. अभ्युन्नतौ अङ्गुष्ठौ अभ्युन्नाङ्गुष्ठौ (raised toes) तयोः नखौ (Tat.), अभ्युन्नताङ्गुष्ठनखयोः प्रभाः (Tat.), ताभिः. **उद्गिरन्तौ**, 'emitting', pres. part. from √गॄ 6. p. with उद्. **आजह्रतुः**, लिट् 3rd per. dual from आ √हृ 'to give. **स्थलारविन्दश्रियम्**, the beauty of the land-lotuses'. Anal. स्थलजम् अरविन्दं स्थलारविन्दं, तस्य श्रीः, ताम्. **अव्यवस्थाम्**, 'not being fixed to any particular locality'. Anal. नास्ति व्यवस्था यस्याः सा अव्यवस्था, ताम्. The idea is that the red glow, issuing from the nails of her toes lent to the place where she placed her feet the beauty of land-lotuses. But the moment she took another step, the red glow, and consequently the redness of the land-lotus left the original site and accompanied her to a new place. She scattered land-lotuses wherever she went. The land-lotuses, thus, kept changing place with her footsteps.

Trans.—As she trod (on the ground), her feet emitting redness, as it were, lent by the lustre of her raised toes and nails, the beauty of land-lotuses, which shifted (with her steps).

अनुवाद—उस के पैरों के अङ्गूठों के नख जो ऊपर उठे हुय थे, और जो (भूमि के ऊपर) पाँव पड़ने पर मानो लाली छिड़कते थे पृथ्वी को स्थल-कमलों की (पद पद पर) बदलने वाली शोभा दान करते थे ॥ ३३ ॥

सा राजहंसैरिव सन्नताङ्गी
गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धै-
रादित्सुभिर्नूपुरसिञ्जितानि ॥ ३४ ॥

सेति ॥ **प्रत्युपदेशलुब्धैः** ॥ गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा । अथवा विद्यया विद्या चतुर्थी नोपपद्यते ॥ इति न्यायादिति भावः । तदेव व्यनक्ति—**नूपुरसिञ्जितानि आदित्सुभिः** आदातुमिच्छुभिः । मञ्जीरसिञ्जितमञ्जुकूजितोपदेशमिच्छद्भिरित्यर्थः । **राजहंसैः सन्नताङ्गी** । कुचभारादिति भावः । सा पार्वती (**लीलाञ्चितविक्रमेषु**) लीलाभिर्विलासैरञ्चिताः पूजिता विक्रमाः पादन्यासा येषु तेषु । अञ्चेः पूजायाम् इतीडागमः । लीला विलासक्रिययोः इत्यमरः ॥ **गतेषु** विषयेषु **व्यनीयत** इव विनीता किमु । अन्यथा कथमस्या हंसगमनमित्युत्प्रेक्षा ॥

Notes.—सन्नाङ्गी, 'with a stooping frame' (because of the weight of her breasts). Anal. सन्नतानि (stooping) अङ्गानि यस्याः, सा (bahuvr.) **गतेषु**,—गत is used here as an abstract noun (भावे क्त). Cf. गतं तिरश्चीनम् अनूरुसारथेः 'Oblique is the course of the Sun'. Sisu. 1. 2. Also Raghu. 2. 18. उभाव् अलंचक्रतुः अंचिताभ्याम् तपोवनावृत्तिपथं गताभ्याम्. **लीलाञ्चितविक्रमेषु**, 'marked by steps charming with grace'. Anal. लीलाभिः (with gracefulness) अञ्चिताः (charming) लीलाञ्चिता (तृतीयातत०) लीलाञ्चिता विक्रमाः येषु तेषु (bahuvr.). **व्यनीयत**, 'was imparted instruction', लङ् 3rd per. sing. passive voice, from वि√नी 'to teach, to instruct'. **प्रत्युपदेशलुब्धैः**, (themselves) 'keenly desirous of receiving instruction in return'. The comm. commenting on this phrase says very happily that there are three ways of acquiring knowledge viz. (*i*) by serving the preceptors devotedly, (*ii*) by expending money in remunerating the teachers, (*iii*) by teaching in return and that there is no fourth way at all. Anal. प्रत्युपदेशे लुब्धाः, तैः **आदित्सुभिः**, 'who sought to acquire'. The base आदित्सु—is formed from the root आ√दा 'to

receive' with the suffix उ which is placed after the desiderative suffix सन्, आशंस् and भिक्ष् Pan. 3. 2. 168. सनाशंसभिक्ष उः. Note that the desid. base of आदा is आदित्स्—.

Trans.—She (Parvati), with her frame stooping (with the weight) of her breasts, was taught her gait marked by steps charming with grace by royal swans, who were themselves keenly desirous of receiving instruction in return, and who hoped to acquire (in their cackle) the (silvern) music of her ankle-ornaments.

अनुवाद—उस ने जिस का शरीर आगे को कुछ झुका हुआ था नूपुरों की मधुर ध्वनि में उपदेश लेने की कामना रखते हुए हंसों से लीलापूर्वक मनोहर (भूमि पर) पांव धरने में शिक्षा प्राप्त की ॥ ३४ ॥

वृत्तानुपूर्वे च न चातिदीर्घे
जङ्घे शुभे सृष्टवतस्तदीये ।
शेषाङ्गनिर्माणविधौ विधातु-
र्लावण्य उत्पाद्य इवास यत्नः ॥ ३५ ॥

वृत्तेति ॥ वृत्ते वर्तुले पूर्वमनुगते अनुपूर्वे । गोपुच्छाकारे इत्यर्थः । वृत्ते च ते अनुपूर्वे च **वृत्तानुपूर्वे न अतिदीर्घे च** । महाविभाषया न समासः । नञो विशेषणत्वं चशब्दप्रयोगादेव ज्ञेयम् । **शुभे** मङ्गले । तस्या : इमे **तदीये जङ्घे** प्रसृते ॥ जङ्घा तु प्रसृता इत्यमरः ॥ **सृष्टवतः** निर्मितवतो **विधातुः** स्रष्टुः **शेषाङ्गनिर्माणविधौ** । जङ्घाव्यतिरिक्तावयवनिर्माणार्थमित्यर्थः । **उत्पाद्ये** पुनः संपाद्ये **लावण्ये** कान्तिविशेषविषये । लावण्यलक्षणं तूक्तम् । **यत्नः आस इव** बभूवेवेत्युत्प्रेक्षा । उपादानमन्तरेण कार्यस्य दुष्करत्वात्तदङ्गानां च लावण्योपादानकत्वात्पूर्वसंपादितस्य च जङ्घार्थमेव कार्त्स्न्येन विनियोगात्पुनर्लावण्यसंपादने यत्नः स्यादेवेत्येतादृक्सौन्दर्ये तज्जङ्घे इति भावः । आसेति बभूवार्थे तिङन्तप्रतिरूपकमव्ययमित्याह शाकटायनः ॥ वल्लभस्तु—न तिङन्तप्रतिरूपकमव्ययम् अस्तेर्भूः इति भ्वादेशानियमात्ताहशतिङन्तस्यैवाभावात् । किंतु कवीनामयं प्रामादिकः प्रयोग इत्याह । वामनस्तु —अस गतिदीप्त्यादानेष्विति धातोर्लिटि रूपमिदमित्याह । अस इत्यनुदात्तेद्दीप्त्यर्थे । आस दिदीपे । प्रवृत्त इत्यर्थः ॥

Notes.—**वृत्तानुपूर्वे**, 'round and tapering'. अनुपूर्व is 'becoming regularly smaller and smaller'. वृत्तानुपूर्वे,

नातिदीर्घे (not very long), शुभे (beautiful)-all qualify जङ्घे f. acc. du. object to सृष्टवत. शेषाङ्गनिर्माणविधौ, 'when fashioning her other limbs'. Anal. शेषाणि अङ्गानि शेषाङ्गानि (कर्म्मधारय), तेषां निर्म्माणं (षष्ठी तत्०), तदेव विधिः, तस्मिन्. आस. The normal form in the Perfect is बभूव. But this solitary form has been used by writers of authority. Apparently it has no other warrant but the will of the poet. Vallabha sets down this use to poetic licence. Saktayana regards this as an indec. equivalent to बभूव. But Vamana seeks to make it a regular form, and derives it from the root अत् 'to go, to shine, to take'. The last attempt is, to say the least, unscientific. यत्न इव आस, the sense of the lines is this. or (:) All beauty was spent up in fashioning her thighs. But other limbs remained to be fashioned; and as beauty, the material, had been exhausted in creating her legs, the Creator had to make effort to get it for other limbs. The simple meaning is that the thighs of Parvati were extremely beautiful.

Trans.—The Creator had, after he had given shape to her thighs which were round and tapering and not very long, to make an endeavour, as it were, for the creation of (more) beauty when forming her other limbs.

अनुवाद—उस की गोल गोल, निचली और मुटाई में क्रम से घटती हुई और न बहुत लम्बी (और न बहुत छोटी) जङ्घायें बना चुकने के पश्चात उस के अन्य अङ्ग बनाने के लिये सौन्दर्यो त्पत्ति के विषय में विधाता को भी यत्न सा करना पड़ा। ३५ ॥

नागेन्द्रहस्तास्त्वचि कर्कशत्वा-
देकान्तशैत्यात्कदलीविशेषाः।
लब्ध्वापि लोके परिणाहि रूपं
जातास्तदूर्वोरुपमानबाह्याः ॥ ३६ ॥

नागन्द्रेति (नागेन्द्रहस्ताः) नागेन्द्राणामैरावतादीनां हस्ताः कराः त्वचि

चर्मणि **कर्कशत्वात् कदलीविशेषाः** राजरम्भादयः **एकान्तशैत्यात्** हेतोः **लोके परिणाहि** वैपुल्ययुक्तम् ॥ परिणाहो विशालता **इत्यमरः** । **रूपं लब्ध्वापि** । अपिशब्दात्करिकदलीमात्रस्य तादृक्परिणाहो नास्तीति भावः । तस्या ऊर्वोः **तदूर्वोः उपमानबाह्या** जाताः उपमानक्रियानर्हा बभूवुः । तदूर्वोर्न कार्कश्यं नाप्येकान्तशैत्यमिति भावः ॥

Notes.—In the previous stanza the thighs of Parvati have been described as superbly beautiful, but the usual standards of comparison, (*i*) the hand of an elephant and (*ii*) the plaintain-stem, have been purposely excluded for reasons given in this stanza. Elsewhere Kalidasa too makes use of these standards of comparison. Cf. अङ्के निधाय करभोरु यथा सुखं ते. Sak. 3. 19. वामश्चास्याः...यास्यत्यूरुः सरसकदलीस्तम्भगौरश् ('fair as some rich plaintain-stem') चलत्वम्. Megh. 2. 33. **नागेन्द्रहस्ताः**, 'the trunks of lordly elephants'. Anal. नागेषु इन्द्राः (सप्तमीतत्०), तेषां हस्ता. **एकान्तशैत्यात्**, 'because of extreme coldness'. Anal. एकान्तं शैत्यम् (abstr. from शीत 'cold') एकान्तशैत्यम्, तस्मात्. **परिणाहि**, n. acc. sing. qualifying **रूपं**. The base परिणाहिन् is formed from परिणाहः (expanse)+इन्, 'large, big, plump.' **उपमानबाह्याः** 'excluded from standards of comparison'. Anal. उपमानेभ्यः बाह्याः. Note that the object which is compared to another object is called उपमेय and the standard of comparison उपमान. In the expression: 'Her moon-like face' the moon is उपमान and her face उपमेय.

Trans.—The hands of lordly elephants on account of the roughness of the skin and the best of plaintain stems because of extreme coldness were, though possessing plump round form, excluded from (the list of) standards of comparison for her thighs.

अनुवाद—सुन्दर मुटाई रखते हुए भी (ऐरावत आदि) गजराजों की सूँडें अधिक कर्कश (खुरदरा) होने के कारण और केलों के स्कन्ध अधिक शीतल

होने के कारण पार्वती के उरुओं के सम्बन्ध में उपमानों की गणना से बाहर किये गये ॥ ३६ ॥

एतावता नन्वनुमेयशोभि
काञ्चीगुणस्थानमनिन्दितायाः ।
आरोपितं यद्गिरिशेन पश्चा-
दनन्यनारीकमनीयमङ्कम् ॥ ३७ ॥

एतावतेति ॥ **अनिन्दितायाः** अनवद्यायाः पार्वत्याः **काञ्चीगुणस्थानं** नितम्बबिम्बम् **एतावता ननु** एतावतैव । प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु । इत्यमरः शोभत इति शोभि ॥ अवश्यके णिनिः । ततस्त्वप्रत्ययः ॥ अनुमेयं शोभित्वं शोभा यस्य तद् **अनुमेयशोभि** । त्वप्रत्ययस्तु गतार्थत्वान्न प्रयुक्तः इत्याह वामनः ॥ **पश्चात्** । आदौ नैःस्पृह्येऽपि तपश्चर्यानन्तरमित्यर्थः । गिरौ शेते इति गिरिशः शिवः ॥ गिरौ डश्छन्दसि इति डप्रत्ययः ॥ भाषायामपि क्वचिदिष्यते । अथवा गिरिः कैलासोऽस्यास्ति गिरिशः ॥ लोमादित्वाच्छप्रत्ययः । तेन **गिरिशेन** (**अनन्यनारीकमनीयम्**) अन्यासां नारीणां कमनीयः कामयितुं शक्यो न भवतीत्यनन्यनारीकमनीयस्तम् **अङ्कं** निजोत्सङ्गम् **आरोपितम्** इति **यत्** । **एतावता** लिङ्गेनेति पूर्वेणान्वयः ॥ रोहते-र्ण्यन्तात्कर्मणि क्तः । रुहः पोऽन्यतरस्याम् इति हकारस्य पकारः । गत्यर्थविवक्षायां द्विक-र्मकत्वम् । प्रधाने कर्मणि क्तः । गिरिजानितम्बबिम्बं विश्वातिशायिसौन्दर्यं गिरिशाङ्कारू-ढत्वाद्व्यतिरेकेण नार्यन्तरनितम्बबिम्बवत् । विपक्षे हेत्वनुक्तिरेव बाधिका । दाक्षायणी-नितम्बबिम्बस्य तु पक्षसपक्षयोरन्यतरभावानतिवृत्तेर्निष्कलङ्कमनुमानमित्यलमस्थानसंरम्भेण

Notes.—एतावता, 'by this much'. अनुमेयशोभि, 'whose beauty was to be inferred'. Anal. अनुमेयं शोभित्वं यस्य तद् अनुमेयशोभि n. nom. sing. It is to be noted that although in the analysis शोभित्व with the affix त्व appears, the affix त्व is absent in the compound itself. See Malli. for the reason. Malli. constructs the following syllogism to show that the conclusion "Parvati's hips were superbly beautiful" is logically correct. All on-Siva's-lap-placed hips must needs be superbly beautiful (A.) Girijā's (*i. e.* Parvati's) hips were on-Siva's-lap-placed (1) ∴Parvati's hips were superbly beautiful. (1) The

truth of the Major Premiss is established negatively by the statement अनन्यनारीकमनीयम्, 'which was not to be aspired to by any other woman'. For anal. see the comm. **गिरिश**, 'Siva' is derived in the following two ways:—गिरौ शेते इति गिरिशः (*i. e.* गिरि+शी+suf. ड) (a), गिरिः (*i. e.* Kailasha mountain) अस्य अस्ति इति गिरिशः (*i. e.* गिरि+suf. श indicating possession) (b). **पश्चात्** 'subsequently *i. e.* when Siva accepted Parvati in marriage'.

Trans.—The superb beauty of the seat of the girdle-string of her faultless (form) may be inferred from this much that it was subsequently placed by Siva on his lap, which could not be aspired to by any other woman.

अनुवाद—पार्वती के नितम्ब-भाग के सौन्दर्य का अनुमान इतने ही से हो सकता है कि शङ्कर के जिस अङ्क (की प्राप्ति) की कामना तक और नारियां नहीं कर सकीं उन्हीं महादेव ने पार्वती को उस भाग के रखने का सौभाग्य प्रदान किया ॥ ३७ ॥

तस्याः प्रविष्टा नतनाभिरन्ध्रं
रराज तन्वी नवलोमराजिः ।
नीवीमतिक्रम्य सितेतरस्य
तन्मेखलामध्यमणेरिवार्चिः ॥ ३८ ॥

तस्या इति ॥ **नीवीं** वस्त्रग्रन्थिम् ॥ स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च । इत्यमरः ॥ **अतिक्रम्य** अतीत्य (**नतनाभिरन्ध्रं**) नतं निम्नं नाभिरन्ध्रं **प्रविष्टा** प्रविशन्ती **तन्वी** सूक्ष्मा **तस्याः** पार्वत्याः **नवलोमराजिः सितेतरस्य** असितस्य इन्द्रनीलस्येत्यर्थः । (**तन्मेखलामध्यमणेः**) तस्यापार्वत्या मेखला तन्मेखला । तस्या इत्यनुवृत्तौ पुनस्तच्छब्दोपादानं वाक्यान्तरत्वात्सोढव्यम् । यद्वा तस्या नीव्या मेखला तन्मेखला तत्र तदवस्थानात् । तस्या मध्यमणेः **अर्चिः** प्रभा **इव रराज** ॥ ज्वालाभासोर्नपुंस्यर्चिः । इत्यमरः ॥

Notes.—**नतनाभिरन्ध्रं**, 'the cavity of her navel which turned inwards'. Anal. नाभेः रन्ध्रं नाभिरन्ध्रं, नतं नाभिरन्ध्रं, नतनाभिरन्ध्रम्. **रराज**, 'shone'; लिट् 3rd per. sing. from राज्

'to shine' (रराज, रेजतुः, रेजुः). **तन्वी,** 'thin' a fem. formation from तनु. Pan. 4. 1. 44. वोतोगुणवचनात् *i. e.* after adjectives of quality ending in उ, the f. suffix ई (ङीप्) may be optionally used *e. g.* मृदुः, मृद्वी. **लोम(न्),** 'fine soft hair'; Panj. लूं. **नीवी,** f. 'the knot of the upper garment worn by a woman round her waist'. cf Kavya. 4. नीवीं प्रति प्रणिहिते तु करे प्रियेण. **सितेतरः,** 'other than white; black'. The central gem was a sapphire of beautiful dark-green colour. Anal. सिताद् इतरः सितेतरः (पञ्चमी तत्॰). **अर्चिः,** here fem. corresponding to राजिः.

Trans.—Passing beyond the knot of her upper garment, the thin line of her fresh soft hair entered the cavity of her navel which turned inwards, and shone like the glitter of the (beautiful) dark-green central gem of her zone,

अनुवाद—उस की नयी फुटी हुई रोमों की पङ्क्ति जो वस्त्र-ग्रन्थि से नीचे जाकर (अन्दर की ओर) मुड़ी हुई नाभि में प्रविष्ट थी उस की करधनी में जुड़े हुए इन्द्रनील की श्यामल कान्ति के समान चमक देती थी ॥ ३८ ॥

मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला ।
आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम् ॥ ३९ ॥

मध्येनेति ॥ वेदिः परिष्कृता भूमिः इत्यमरः ॥ **वेदिविलग्नमध्या** वेदिवत्कृशमध्या । तनुमध्येति यावत् । **सा बाला** पार्वती । **मध्येन** मध्यभागेन **चारु** सुन्दरं **वलित्रयं कामस्य आरोहणार्थं नवयौवनेन प्रयुक्तं** रचितं **सोपानमिव बभार** इत्युत्प्रेक्षा ॥

Notes.—**वेदिविलग्नमध्या,** 'with a slender waist like (the middle of) an altar'. Anal. विलग्नं (sticking; thin, slender) मध्यं (waist) यस्याः विलग्नमध्या वेदिः इव विलग्नमध्या वेदिविलग्नमध्या. **वलित्रयं,** 'three folds (on the skin)'. The

three folds above a woman's navel are considered a mark of beauty, cf. Bhartri. 1. 93. क्षामोदरोपरिलसत्त्रिवलीलतानाम्. **आरोहणार्थम,** 'to ascend'. Anal. आरोहणाय इति आरोहणार्थं (नित्यसमास). **सोपानम्** 'a flight of steps;' Cf. Ragh. 3. 69. समारुरुक्षुर् दिवम् आयुषः क्षये ततान सोपान-परम्पराम् इव. The three folds put on her waists by fresh youth were (so the Poet fancies) a series of steps for the God of Love to ascend.

Trans.—She who had a slender waist like (the middle of) an altar, carried three charming folds on her waist as if they were a flight of steps formed by fresh youth for the God of Love to ascend.

अनुवाद—वेदि के मध्य भाग के समान पतली कटि रखने वाली उस बाला के पेट पर त्रि-वली बनी हुई थी। ऐसा प्रतीत होता था मानो नये यौवन ने कामदेव के चढ़ने के लिये (तीन दण्डों की) सीढ़ी खड़ी कर दी है ॥ ३६ ॥

अन्योन्यमुत्पीडयदुत्पलाक्ष्याः
स्तनद्वयं पाण्डु तथा प्रवृद्धम् ।
मध्ये यथा श्याममुखस्य तस्य
मृणालसूत्रान्तरमप्यलभ्यम् ॥ ४० ॥

अन्योन्येति ॥ **अन्योन्यं** परस्परम् ॥ कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये इति द्विरुक्तिः ॥ समासवच्च बहुलम् इति बहुलवचनादसमासपक्षेऽपि पूर्वपदस्थस्य सुपः सुर्वक्तव्यः ॥ **उत्पीडयद्** उपरुन्धत् **पाण्डु** गौरम् **उत्पलाक्ष्याः स्तनद्वयम तथा** तेन प्रकारेण **प्रवृद्धम** ॥ कर्तरि क्तः ॥ **श्याममुखस्य** कृष्णचूचुकस्येति स्वरूपवर्णनं **तस्य** स्तनद्वयस्य **मध्ये यथा** येन प्रकारेण **मृणालसूत्रान्तरं** बिसतन्तुमात्रावकाशः **अपि अलभ्यं** लब्धुमशक्यम् ॥ अन्तरमवकाशावधिपरिधानान्तरविभेदतादर्थ्ये । त्यमरः ॥ अत्र संबन्धेऽसंबन्धरूपातिशयोक्त्यलंकारः । कुचयोः पीवरत्वातिशयार्थमवकाशसंबन्धेप्यसंबन्धाभिधानादिति ॥

Notes.—**अन्योन्यम,** 'mutually, each against the other'. The iteration expresses reciprocity of action. The character of the word as a whole is not that of a com-

pound. See Malli. **उत्पीडयत्**, 'pressing' qualifies स्तनद्वंय (the two breasts). **उत्पलाक्ष्याः**, 'of the lotus-eyed one'. Anal. उत्पले (lotuses) इव अक्षिणी यस्याः सा उत्पलाक्षी (bahuvr.), तस्याः **श्याम-मुखस्य**,—मुख is 'the nipple of a breast'. It is darkish in colour. Cf. Ragh. 3. 8 ...तदीयम् आनीलमुखं स्तनद्वयम् । Anal. श्यामे मुखे यस्य तत् श्याममुखं (स्तनद्वयम्), तस्य. **मृणालसूत्रान्तरम्**, 'the space of a lotus-fibre'. So Malli. मृणालसूत्रं occurs in Sak. 6. 18. न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे and the word means there a necklace of lotus-fibres *i. e.* a "lotus-chain" (Ryder). If the same meaning is here intended, the phrase means 'the space for a necklace of lotus-fibres'. The idea is that her breasts had developed so round and plump that she could not even put on a necklace of lotus-fibres.

Trans.—The two dark-nippled white breasts of the lotus-eyed one pressing tight each against the other had developed so plump that space even for a necklace of lotus-fibres could not be found between them.

अनुवाद—परस्पर उपरोध करते हुए उस कमल-नयन पार्वती के दोनो कुच जिन के मुख श्याम वर्ण के थे इस प्रकार उपचित और गोरे थे कि उन के मध्य मे बिस-तन्तु मात्र का अवकाश नहीं था ॥ ४० ॥

लोके सुकुमारत्वमेव कुसुमास्त्रस्य साधकत्वामिति स्थिते सत्याह—

शिरीषपुष्पाधिकसौकुमार्यौ
बाहू तदीयाविति मे वितर्कः ।
पराजितेनापि कृतौ हरस्य
यौ कण्ठपाशौ मकरध्वजेन ॥ ४१ ॥

शिरीषेति । तस्या इमौ **तदीयौ बाहू** (**शिरीषपुष्पाधिकसौकुमार्यौ**) शिरीषपुष्पादधिकं सौकुमार्यं मार्दवं ययोस्तथोक्तौ **इति मे वितर्कः** ऊहः । कुतः । **यौ** बाहू **पराजितेनापि** पूर्वं निर्जितेनापि **मकरध्वजेन** कामेन **हरस्य कण्ठ-**

पाशौ कण्ठबन्धनरज्ज्वौ **कृतौ** । कण्ठालिङ्गनं प्रापिताविव्यर्थः । तदसाध्यसाधनात्त आधिक्यमिति भावः ॥ अत्र बाह्वोरारोपितकण्ठपाशत्वस्य प्रकृतवैरनिर्यातनोपयोगात्परिणामालंकारः ॥

Notes.—शिरीषपुष्पाधिकसौकुमार्यौ, m. nom. dual, goes with **बाहू** (arms) 'more delicate than the siris-blossom'. The softness of a siris-blossom (Panj. शरीं दा फुल) is well-known. Anal. शिरीषाणां पुष्पाणि शिरीषपुष्पाणि (*i*) अधिकं सौकुमार्यम् ('delicateness,' from its adj. सुकुमार) अनयोः अधिकसौकुमार्यौ (*ii*) शिरीषपुष्पेभ्यः अधिकसौकुमार्यौ शिरीषपुष्पाधिकसौकुमार्यौ. **पराजितन अपि**, 'though discomfited' refers to the discomfiture and death of love. *Vide infra* Canto III. The simple idea is that Kama failing with every other weapon, with all the flower-arrows, relied for success on the most delicate arms of Parvati. Though reduced to ashes for that wanton display of audacity by Siva, Kama succeeded in the end in achieving his object. Siva did marry Parvati. Thus Parvati's arms were thrown round the neck of the god. Hence the conclusion that they were extremely delicate and beautiful.

Trans.—Methinks her arms were more delicate than the siris-blossom, inasmuch as they were thrown by the shark-emblemed god (*i. e.* Cupid), although discomfited, (successfully) as nooses round the neck of Siva.

अनुवाद—मेरा विचार है कि उस के बाहु सिरस के फूल से भी अधिक कोमल थे जो परास्त होकर भी कामदेव ने उन्हीं को महादेव के कण्ठ में फाँसी डाली। ४१।

कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद्बभूव
साधारणो भूषणभूष्यभावः ॥ ४२ ॥

कण्ठस्येति ॥ **स्तनबन्धुरस्य** स्तनाभ्यां बन्धुरस्योन्नतस्य **तस्याः** पार्वत्याः

कण्ठस्य गलस्य **निस्तलस्य** वर्तुलस्य **मुक्ताकलापस्य** मुक्ताभूषणस्य **च** । वर्तुलं निस्तलं वृत्तं बन्धुरं तून्नतानतम् । कलापो भूषणे बर्हे तूणीरे संहतावपि । इति चामरः ॥ **अन्योन्यशोभाजननाद् भूषणभूष्यभावः** अलंकारालंकार्यभावः **साधारणः** समानो **बभूव** । उभावप्यन्योन्यस्य भूष्यौ भूषणे च बभूवतुरित्यर्थः ॥ अत्र कण्ठमुक्ताकलापयोः शोभाक्रियाद्वारेणान्योन्यभूषाजनकत्वादन्योन्यालंकारः । तदुक्तम्—परस्परक्रियाजननमन्योन्यम् । इति ॥

Notes.—**स्तनबन्धुरस्य,** qualifies **कण्ठस्य** (of the neck) 'beautifully developed over her breasts'. Anal. स्तनाभ्यां बन्धुरः (well-built; graceful, charming.) तस्य. **निस्तलः,** 'round'; anal. निर्गतं तलं यस्मात् (which lacks flat surface *i. e.* round), स निस्तलः (मुक्ताकलापः), तस्य. For **अन्योन्य** *vide supra* sl. 4. **बभूव साधारणो भूषणभूष्यभावः,** 'their being the adorner and the adorned was undefined (lit. common to both)'. The idea is that the pearl-necklace encircling the neck of Parvati as much added to the beauty of her neck as the neck of Parvati added to it. The necklace appeared more beautiful on her neck than it really was. Hence it could not be definitely said which was the adorner and which the object adorned.

Trans.—In the case of her neck beautifully developed over her breasts and the pearl-necklace that went round (it) their being the adorner and the adorned was undefined (lit. held in common) because of each adding to the beauty of the other.

अनुवाद—कुचों से ऊंचा वह सुन्दर कण्ठ और उस में पड़ा हुआ वह गोल मोतियों का हार परस्पर एक दूसरे की शोभा बढ़ाते थे, और भूषण और भूष्य-भाव में भेद जाता रहा, (अर्थात यह निर्णय करना कठिन हो गया कि पार्वती के सुन्दर कण्ठ ने उस माला की शोभा बढ़ाई अथवा उस माला के योग से उस के कण्ठ की शोभा बढ़ी ।) ॥ ४२ ॥

इदानीं पार्वतीवदनं चन्द्रकमलसदृशमित्येतदेव वचोभङ्ग्याह—

चन्द्रं गता पद्मगुणान्न भुङ्क्ते
पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला
द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥ ४३ ॥

चन्द्रमिति ॥ लोला चपला । परिभ्रमणशीलेत्यर्थः । लक्ष्मीः कान्त्यभिमानिनी देवता चन्द्रं गता प्राप्ता सती पद्मगुणान् सौगन्ध्यादीन् न भुङ्क्ते नानुभवति । पद्माश्रिता सती चन्द्रमस इमां चान्द्रमसीम् अभिख्यां शोभाम् ॥ अभिख्या नाम शोभयोः । इत्यमरः । अमृतवदानन्दिनीं न भुङ्क्ते । उमामुखं प्रतिपद्य तु द्वे चन्द्रपद्मे संश्रयः कारणं यस्यास्तां द्विसंश्रयां प्रीतिम् आनन्दम् अवाप । तत्रोभयगुणसंभवादितिभावः ॥ अत्रोपमानभूतचन्द्रपद्मापेक्षयोपमेयस्योमामुखस्याधिकगुणवत्त्वोक्त्या व्यतिरेकालंकारः ॥ तदुक्तम् —भेदप्राधान्येनोपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकः इति ॥

Notes.—भुङ्क्ते, 'does not enjoy'. By Pan 1. 3. 66. भुजो अनवने the root भुज् of the 7th conjugation is used in Atmanepada in all senses except 'to protect, to rule, to govern'. Of course भुज् 6 P. 'to bend' is used in Paras. विभुजति पाणिम् (He bends his hand). *Vide vritti* on 1. 3. 66. **पद्माश्रिता,**—पद्मम् आश्रिता (द्वितीया तत्०). **चान्द्रमसीम्,** *Vide supra* sl. 25. **अभिख्याम,** 'charm'. **द्विसंश्रयाम,** qualifies प्रीतिम् (delight) 'obtainable in both'. **अवाप,** 'received, obtained'. लिट् 3rd per. sing. from √आप् 5. p. preceded by the prep. अव. In this stanza the Poet describes the beauty of Parvati's face. The Goddess of Beauty missed the beauty of the lotus when she passed her night with the moon; she missed the beauty of the moon when she stayed with the lotus. But she missed neither the attractiveness of the moon nor the fragrance of the lotus when she resided with Parvati's face. Her face possessed the charms of both and excelled either.

Trans.—The Goddess of Beauty, who loves to shift her place, misses, when gone to the moon, the enjoyment of the qualities peculiar to the lotus (*i. e.* fragrance and the like) and when staying with the lotus, of lunar charm, but when she repaired to the face of Parvati, she experienced delight obtainable in both.

अनुवाद—चांद में (निवासार्थ) गयी हुई लक्ष्मी देवी कमल के गुणों से वञ्चित रहती है और (ऐसे) कमल पुष्प में गयी हुई चांद की अमृतमय किरणों से, परन्तु पार्वती के मुख में जा कर वह दोनों प्रदेशों में मिलने वाले आनन्द को अनुभव करती है ॥ ४३ ॥

पुष्पं प्रवालोपहितं यदि स्या
न्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद्विशदस्य तस्या-
स्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ॥ ४४ ॥

पुष्पमिति ॥ **पुष्पं** पुण्डरीकादिकं (**प्रवालोपहितं**) प्रवाले बालपल्लव उपहितं निहितं **स्याद्यदि** । प्रवालो वल्लकीदण्डे विद्रुमे बालपल्लवे । इति विश्वः ॥ **मुक्ताफलं वा** स्फुटे निर्मले विद्रुमे तिष्ठतीति **स्फुटविद्रुमस्थं स्याद्यदि** । **ततः** तर्हि **विशदस्य** शुभ्रस्य **ताम्रोष्ठपर्यस्तरुचः** ताम्रे अरुणे ओष्ठे पर्यस्ता प्रसृता रुक्कान्तिर्यस्य तथोक्तस्य **तस्याः** पार्वत्याः **स्मितस्य अनुकुर्यात्** । स्मितमनुकुर्यादित्यर्थः । अत्र माषाणामश्नीयात् इतिवत् संबन्धमात्रविवक्षया षष्ठी । अत्र पुष्पप्रवालयोर्मुक्ताविद्रुमयोश्चासंबन्धेऽपि संबन्धोक्त्या अतिशयोक्तिः । सा च संभावना इत्यलंकारसर्वस्वकारः । विशेषतस्तु पुष्पमुक्ताफलयोरुपमानयोः प्रकृतोत्कर्षार्थमुपमेयताकल्पनात्प्रतीपालंकारः । तदुक्तम्—उपमानस्याक्षेप उपमेयताकल्पनं वा प्रतीप इति । स च पूर्वोक्तातिशयोक्त्यनुप्राणित इति ॥

Notes.—**प्रवालोपहितं**, 'placed on a leaf which has newly sprouted'. A new leaf is red in colour. Anal. प्रवाले उपहितं प्रवालोपहितं (सहसुपा इति समासः). **स्फुटविद्रुमस्थम्**, qualifies predicatively **मुक्ताफलं** (a pearl) '(be) resting on a spotless coral'. Anal. स्फुटः विद्रुमः स्फुटविद्रुमः, तस्मिन् तिष्ठति तत् स्फुटविद्रुमस्थम् (मुक्ताफलम्). **ताम्रौष्ठपर्यस्तरुचः**, gen. sing. quali-

fies, as also **विशदस्य** (pure, clear, white), **स्मितस्य** (smile) 'with its white lustre diffused on her rosy lips'. ताम्र is the same as Panj. तरामा 'copper' and means here 'having coppery hue'. रुच्. f. means 'lustre, brightness'. Anal. ताम्रे ओष्ठे पर्यस्ता रुक् यस्य तत् ताम्रौष्ठपर्यस्तरुक् (स्मितं), तस्य. The vowel of पर्य्यस्त is short. In certain Vedic formations, however, the preceding vowel is lengthened when the second member is a *Kvip.* formation from the roots नह्, वृत्, वृष्, व्यध्, रुच् (*'to shine'*), सह्, and तन्. Pan. 6. 3. 116. Some of these forms and others formed on their analogy are used in classical sanskrit as well. The simple meaning of the stanza is that a bright innocent smile played upon her rosy lips. The Poet compares this radiant smile of Parvati diffusing its brilliance on her rosy lips to a white flower shedding its lustre on a red new leaf. But feeling that this comparison expresses conspicuously the fragrance of breath which too, he desires to express, and the brightness of smile adorn in her rosy lips only less so, the Poet brings out the idea of brilliance in another striking simile. Suppose a pearl laid on a spotless (red) coral and this, says the Poet, will give you some idea of the gay radiance of her smile.

Trans.—If a (white) flower be placed on a (red) new leaf, or a pearl laid on a (red) spotless coral, then will the either imitate her pure smile diffusing its radiance on her rosy lips.

अनुवाद—यदि (सफ़ेद वर्ण का) फूल नये निकले हुए लाल लाल कोमल पत्ते पर रखा जाय अथवा यदि चमकता हुआ मोती निर्मल मूंगे पर धरा जाय, तो शायद ये उस के लाल लाल होंठ पर कान्ति फैलाती हुई उस की सुन्दर मुसकान की बराबरी कर सकें ॥ ४४ ॥

स्वरेण तस्याममृतास्रुतेव
प्रजल्पितायामभिजातवाचि ।
अप्यन्यपुष्टा प्रतिकूलशब्दा
श्रोतुर्वितन्त्रीरिव ताड्यमाना ॥ ४५ ॥

स्वरेणेति ॥ **अभिजातवाचि** मधुरभाषिण्यां **तस्यां** पार्वत्याम् **अमृतस्रुता** अमृतस्राविणा इव ॥ क्विप् ॥ **स्वरेण** नादेन **प्रजल्पितायाम्** आलपन्त्याम् । कर्तरि क्तः ॥ अन्यैः काकादिभिः पुष्टा **अन्यपुष्टा** कोकिला **अपि** ॥ मुख्यया वृत्त्या जातिवचनत्वाभावाद्ङीबभावः ॥ **ताड्यमाना** वाद्यमाना विषमबद्धा तन्त्रीः **वितन्त्री इव** ॥ अवितृस्तृतन्त्रिभ्य ईः इति तन्त्रीधातोरौणादिक ईप्रत्ययः । ङीबभावान्न हल्ङ्याब्भ्यः—इति सुलोपः । तदुक्तम्—अवीलक्ष्मीतरीतन्त्रीह्रीधीश्रीणामुणादितः । स्त्रीलिङ्गानाममीषां तु न सुलोपः कदाचन इति । एते ङीबन्ता न भवन्तीत्यर्थः ॥ **श्रोतुः** जनस्य **प्रतिकूलशब्दा** कर्णकठोरनादा भवतीति शेषः ॥

Notes.—**अमृतस्रुता**, m. instru. sing. qualifies स्वरेण (in a voice) 'pouring forth nectar'. Anal. अमृतं स्रवति (pours down) इति अमृतस्रुत (*i. e.* अमृत+स्रु+क्विप्), तेन. **अभिजातवाचि**, f. loc. sing. qualifies तस्याम्, (as she) 'who was sweet-tongued' (spoke). Anal. अभिजाता वाक् अस्याः इति सा अभिजातवाक्, तस्याम्. It is to be observed that अभिजात is taken here to mean 'sweet (of tongue)' because sweetness of speech is supposed to be a gift of all *high-born* ladies. *Vide supra* sl. 26. **अन्यपुष्टा**, 'a cuckoo'. The word lit. means 'one reared by another' and this refers to the idea that the eggs of a cuckoo are laid in the nests of crows to be hatched there. Webster in his Dictionary confirms the idea in the following words: "The European species builds no nests of its own, but lays its eggs in the nests of other birds, to be hatched by them". Cf. another name अन्यभृता and note that a crow is consequently called अन्यभृत् ('one who rears others'). **प्रतिकूलशब्दा**, discordant, whose notes jarred

(on the ears)'. Anal प्रतिकूलः शब्दः यस्याः सा प्रतिकूलशब्दा, वितन्त्रीः, 'a lute out of tune'. It is to be noted that the word वितन्त्री is fem. but not because of any of the fem. suffixes ङीप्, ङीष् or ङीन्. Hence it *retains* the स् of the nom. sing. See the comm.

Trans.—When she who was sweet-tongued spoke in a voice pouring nectar as it were, the listener felt even the cuckoo become discordant like a jangled lute when (a tune is) struck up (by the singer).

अनुवाद—जब मधुर भाषण करने वाली वह (पार्वती) अपने अमृत (कि धारा) बहाने वाले शब्दों में कुछ बोलती तो सुनने वालों को कोयल (का मधुर स्वर) भी बिगड़ी हुई सतार के अनभिज्ञ स्वर के समान करखत (कर्कश) प्रतीत होता ॥ ४५ ॥

प्रवातनीलोत्पलनिर्विशेष-
मधीरविप्रेक्षितमायताक्ष्या ।
तया गृहीतं नु मृगाङ्गनाभ्य-
स्ततो गृहीतं नु मृगाङ्गनाभिः ॥ ४६ ॥

प्रवातेति ॥ **प्रवातनीलोत्पलनिर्विशेषम्** प्रवाते प्रभूतवातस्थले यन्नीलोत्पलं ततो निर्विशेषं निर्भेदम् । तत्सदृशमित्यर्थः । **अधीरविप्रेक्षितं** चकितविलोकितम् **आयताक्ष्या** विशालनेत्रया **तया** पार्वत्या **मृगाङ्गनाभ्यः** हरिणीभ्यः **गृहीतम्** अभ्यस्तं **नु** ॥ अथवा **मृगाङ्गनाभिः ततः** तस्याः पार्वत्याः ॥ पञ्चम्यास्तसिल् ॥ **गृहीतं** ॥ अत्र विप्रेक्षितस्य परस्परग्रहणस्योत्प्रेक्षणादुत्प्रेक्षेति केचित् । तदुपजीविसन्देहालंकार इत्यन्ये । उभयोः सङ्कर इत्यपरे ॥

Notes.—**प्रवातनीलोत्पलनिर्विशेषम्**, 'not differing from a blue lotus (playing) in the breeze'. Anal. प्रवाते (in a windy place) नीलोत्पलं (*i. e.* नीलम्-उत्पलं) प्रवातनीलोत्पलं, तस्मात् निर्विशेषम्. **अधीरविप्रेक्षितम्**, 'a quivering or timid glance'. Anal. अधीरं (unsteady, timid), विप्रेक्षितम् (glance) इति. **आयत**, 'elongated'. Elongated eyes are a mark of beauty. The eyes of deer are regarded as being typically

beautiful. See Ragh. 1. 40. परस्पराक्षिसादृश्यम्...मृगद्वन्द्वेषु पश्यन्तौ. Cf. the compounds मृगाक्षी, मृगदृश्, मृगेक्षणा etc.

Trans.—Did she who had elongated eyes steal her quivering glance resembling a blue lotus (playing) in the breeze from the female deer, or did the female deer steal it from her ?

अनुवाद—उस की वह दृष्टि जो पवन में खेलते नीले रङ्ग के कमल-फूल के समान चञ्चल थी क्या उस दीर्घ नयनों वाली ने वह हरिणियों से सीखी है अथवा हरिणियों ने उस से सीखी है (पार्वती के सुन्दर नेत्रों को देखकर यह शङ्का मन में उठती है) ॥ ४६ ॥

> तस्याः शलाकाञ्जननिर्मितेव
> कान्तिर्भ्रुवोरायतलेखयोर्या ।
> तां वीक्ष्य लीलाचतुरामनङ्गः
> स्वचापसौन्दर्यमदं मुमोच ॥ ४७ ॥

तस्या इति ॥ **आयतलेखयोर्** दीर्घरेखयोः **तस्याः** पार्वत्या **भ्रुवोः** संबन्धिनी (**शलाकाञ्जननिर्मिता**) शलाकयाञ्जनेन निर्मिता इव स्थिता **या कान्तिः लीलाचतुरां** विलासचतुरां **तां कान्तिं वीक्ष्य अनङ्गः स्वचापसौन्दर्यमदं** स्वचापसौन्दर्येण यो मदः तं **मुमोच** ॥ इह सौन्दर्यातिशयोक्तिः ॥

Notes.–**शलाकाञ्जननिर्मिता**, ' traced with a paint-brush in black paint'. Anal. शलाका च अञ्जनं च शलाकाञ्जनं (द्वन्द्व, by the rule जातिरप्राणिनाम्), तेन निर्मिता **आयतलेखयोः**, ' (of) long-curved, long-arched '. Anal. आयता (long, extended) लेखा (line, curve) ययोः भ्रुवोः ते आयतलेखे (भ्रुवौ), तयोः. **लीलाचतुराम्**, '(all the more) bewitching for its sportiveness '. Anal. लीलाभिः चतुराम्. **स्वचापसौन्दर्यमदम्**, ' pride in the beauty of his bow '. The idea of the lines is that Parvati's eye-brows were long and arched. So was also Kama's bow. But Parvati's eye-brows were more bewitching, far more than Cupid's arched bow, inasmuch as they put on new fascination by their graceful sportiveness. Hence Kama abandoned his pride in his bow.

Trans.—Remarking the charms, bewitching for their sportive grace of Parvati's long arched eye-brows, which seemed to be traced in black with an (artist's) pencil, the limbless (god *i. e.* Cupid) abandoned his pride in the beauty of his bow.

अनुवाद—सलाई से कज्जल की खींची दो रेखाओं के समान पार्वती की भौंहों का जो सौन्दर्य था उस को—और उस की विलास के समय कुछ अनोखी ही शोभा थी—देख कर काम देव ने भी अपने धनुष की वक्रता और सुन्दरता का घमण्ड छोड़ दिया ॥ ४७ ॥

> **लज्जा तिरश्चां यदि चेतसि स्या-**
> **दसंशयं पर्वतराजपुत्र्याः ।**
> **तं केशपाशं प्रसमीक्ष्य कुर्यु-**
> **र्वालप्रियत्वं शिथिलं चमर्यः ॥ ४८ ॥**

लज्जेति ॥ **तिरश्चां** तिर्यग्जातीनां **चेतसि लज्जा स्याद्यदि** । संशयाभावः **असंशयम्** । सन्देहो नास्तीत्यर्थः । **पर्वतराजपुत्र्याः** । शार्ङ्गरवाद्यञो ङीन् इति ङीन् ॥ **तं** प्रसिद्धं **केशपाशं** केशकलापम् ॥ पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः ॥ **प्रसमीक्ष्य** दृष्ट्वा **चमर्यः** मृगीविशेषाः बालाः प्रिया यासामिति विग्रहे बालप्रियास्तासां भावो **बालप्रियत्वम्** । प्रियबालत्वमित्यर्थः । आहिताग्न्यादिपाठाद्वा परनिपातः । त्वतलोर्गुणवचनस्येति पुंवद्भावः । **शिथिलं कुर्युः** । निर्लज्जत्वान्न शिथिलयन्तीत्यर्थः ॥ अतएवात्र निर्लज्जत्वकारणहेतोराद्यपादे वाक्यार्थत्वेनोक्त्या काव्यलिङ्गाख्यालंकारः । तदुक्तम्—हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् । इति ॥

Notes.—तिरश्चां, 'of lower animals'. तिर्यच् means 'transverse, oblique, horizontal'. Then it came to mean an animal as moving horizontally and not walking like a man. *Vide* Capp p. 203. Cf. also Ak. स तिर्यङ् यस् तिरोऽञ्चति. तिरि replaces तिरस् when the nasal of अञ्च is not dropped. **तं केशपाशं.**—The pronominal base तद् is often used to express that the object referred to is well-known. The translation will thus be: 'her well-known beautiful tresses'. शिथिल (Panj. ढिला 'loose, relaxed') means 'relaxed'. The idea

is that Chamris still retain their love for their hair which shines with mild and subdued lustre, even after they have seen the beautiful glistening tresses of Parvati This is only because the lower animals are devoid of all sense of shame. Had they any, the Chamris would have grown lukewarm in fondness for their hair. For Chamris and the beauty of their hair *vide supra* sl. 13.

Trans.—If there be any shame in the hearts of lower animals, the yaks will, then, the moment they have seen her well-known (glistening) tresses, grow lukewarm in their love for their own hair.

अनुवाद—यदि चतुष्पदों में (अर्थात पशुजाति में) लज्जा का भाव होता तो निसन्देह शैल-राजपुत्री (पार्वती) के सुन्दर केशों को देख कर के चमरी-गायें अपने बालों के प्रेम में मन्द हो जाती ॥ ४८ ॥

सर्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्यदिदृक्षयेव ॥ ४९ ॥

सर्वोपमेति ॥ किंबहुना **सा** पार्वती **विश्वसृजा** विधात्रा **एकस्थसौन्दर्यदिदृक्षया** एकत्र तिष्ठतीत्येकस्थं तस्य सौन्दर्यस्य । सर्ववस्तुगतस्येत्यर्थः । दिदृक्षया **इव प्रयत्नात् यथाप्रदेशं** क्रमाद् **विनिवेशितेन** स्थापितेन **सर्वोपमाद्रव्यसमुच्चयेन** सर्वेषामुपमाद्रव्याणां चन्द्रारविन्दाद्युपमानवस्तूनां समुच्चयेन समाहारेण **निर्मिता** ॥ दिदृक्षयेवेति फलोत्प्रेक्षा दर्शनार्थिन्व द्विश्वसृज इति ॥

Notes.—**सर्वोपमाद्रव्यसमुच्चयेन**, 'by bringing together all the standards of comparison (in beauty)'. उपमा here means 'the standard of comparison' *i. e.* उपमान. The standards of comparison in respect of beauty are the moon, the lotus and the like. Anal. उपमायाः द्रव्यम् उपमाद्रव्यम्, सर्वाणि च उपमाद्रव्यानि सर्वोपमाद्रव्याणि, तेषां समुच्चयेन. **यथाप्रदेशं**, indec. 'in their proper places'. Anal. प्रदेशम् अनतिक्रम्य इति यथाप्रदेशम

Pan. 2. 1. 6. **विश्वसृजा**, instr. sing. 'by the Creator of the Universe'. **दिदृक्षा**, f. 'desire to see' from the desiderative form of दृश्. The idea is that the Creator of the Universe had a desire to see in a single form all the beauty of the world, put together. So he created Parvati. But it was only after a great effort that he succeeded. Cf. with these lines the equally beautiful lines in Sak. 2.9. चित्रे निवेश्य परिकल्पितस- त्वयोगारूपोच्चयेन मनसा विधिना कृता नु । स्त्रीरत्नसृष्टिर् अपरा प्रति भाति सा मे धातुर् विभुत्वम् अनुचिन्त्य वपुश्च तस्याः ॥

Trans.—She was fashioned after a great effort by the Creator of the Universe with a desire, as it were, to see all beauty compactly put in a single form by bringing and placing in their proper places all the standards of comparison (of beauty).

अनुवाद--(सृष्टि के) सौन्दर्य को एक ही स्थान में देखने की इच्छा से विधाता ने उपमा देने योग्य सब पदार्थों को एकत्र कर के उन को अपने अपने स्थान पर रख कर बडे प्रयत्न से सर्वसुन्दरी पार्वती को रचा ॥ ४६ ॥

तां नारदः कामचरः कदाचि-
त्कन्यां किल प्रेक्ष्य पितुः समीपे ।
समादिदेशैकवधूं भवित्रीं
प्रेम्णा शरीरार्धहरां हरस्य ॥ ५० ॥

तामिति ॥ कामेनेच्छया चरतीति **कामचरः नारदः कदाचित्** पितुः हिमवतः **समीपे कन्यां तां** पार्वतीं **प्रेक्ष्य किल प्रेम्णा** न त्वन्यथा **हरस्य** शिवस्यार्धं हरतीत्यर्धहरा ॥ हरतेरनुद्यमनेऽच् इत्यच्प्रत्ययः ॥ शरीरस्यार्धहरां **शरीरार्धहराम्** । कुलधुरन्धरादिवदवयवद्वारा समुदायविशेषकत्वात्समासः । अन्यथा त्वर्धस्य समप्रविभाग-वचनत्वादर्धशरीरेति स्यात् ॥ **एकवधूम्** असपत्नीकां भार्याम् । पूर्वकालइत्यादिना समासः ॥ **भवित्रीं** भाविनीं **समादिदेश** । हरस्यार्धाङ्गहारिण्येकपत्नी भविष्यतीत्यादिष्टवानित्यर्थः ॥

Notes.—**नारदः**. Narada was one of the ten mind-born sons of Brahma. He is represented in literature as

being very lustrous in appearance, with eyes like the sun when just risen, and clad in white lawn as if in a texture of moonbeams. His descent to the earth is very graphically described in the opening slokas of Sis. He carries a lute (महती Sis 1. 10.) with him, and travels about from world to world singing the praises of the Lord everywhere. He is a bearer of news from the gods to men and *vice versa*, and loves promoting quarrels. कामचरः, 'wandering at will'. For anal. see the comm. समादिदेश,—लिट् 3rd per. sing. from √दिश् preceded by preps. सम् and आ; 'announced beforehand, foretold'. एकवधूम् 'the one spouse (of Hara) *i.e.* having no co-wife'. भवित्रीम्, 'who would be' fem. from भवितृ 'about to become, future'. शरीरार्धहरां, 'the sharer of half the person', Malli. splits the comp. into शरीर and अर्धहराम्, pointing out that the rule अर्धं नपुंसकम् (Pan. 2. 2. 2.) gives us अर्धशरीर—, which we do not want and not शरीरार्ध, which we want. Hence he analyses thus: अर्धं हरति इति (अर्ध + हृ + अच्) स्त्रियाम् अर्धहरा, शरीरस्य अर्धहरा, ताम्. The connection of अर्ध from अर्धहरा and शरीर is to be understood in the same way as that of कुल and धुर् in कुलधुरन्धर, 'the bearer of the yoke of the race'. In this way we are to note that half of the body is meant and not the 'half-sharer'. The simple meaning of the stanza is that once while wandering at will Narada saw—and it was only by chance—Parvati with her father and declared that she would become the wife of Siva.

Trans.—Once, so we are told, Narada, wandering at will, remarked that girl with her father and announced beforehand that she would be the one wife of Siva sharing a half of his person through love.

अनुवाद—एक दफे यथेच्छ विहार करने वाले नारदमुनि कन्या को पिता के पास देख कर कहने लगे कि तुम्हारी यह कन्या महादेव जी की असपत्नीका पत्नी होगी और यह अपने प्रेम से उन की अर्द्धाङ्गिनी बनेगी ॥ ५० ॥

गुरुः प्रगल्भेऽपि वयस्यतोऽस्या-
स्तस्थौ निवृत्तान्यवराभिलाषः ।
ऋते कृशानोर्न हि मन्त्रपूत-
मर्हन्ति तेजांस्यपराणि हव्यम् ॥ ५१ ॥

गुरुरिति ॥ **गुरुः** पिता । गुरुर्गीष्पतिपित्राद्यौ इत्यमरः । **अतः** नारदवचनाद्धेतोः **अस्याः** पार्वत्याः **प्रगल्भे वयसि अपि** यौवने सत्यपि (**निवृत्तान्यवराभिलाषः**) निवृत्तोऽन्यस्मिन्वरे जामातर्यभिलाषो यस्य स तथोक्तः सन् । वरो ना रूपजामात्रोः इति वैजयन्ती । **तस्थौ** । वरान्तरं नान्विष्टवानित्यर्थः ॥ ननु कुतोऽसौ निर्बन्ध इत्यत आह—ऋत इति ॥ तथाहि (**मन्त्रपूतं**) मन्त्रैः पूतं संस्कृतं हूयत इति **हव्यम** आज्यादिकं **कृशानोः** पावकाद् **ऋते** कृशानुं विना ॥ अन्यारादितर-इत्यादिना पञ्चमी ॥ **अपराणि तेजांसि** सुवर्णादीनि **नार्हन्ति** । न भजन्तीत्यर्थः । ईश्वरादन्यस्य तद्योग्यस्याभावादुपेक्षेति भावः ॥

Notes.—**गुरु**, 'father'. **प्रगल्भे**, 'in mature' qualifies वयसि 'in age'. **निवृत्तान्यवराभिलाषः**, 'with all desire of (seeking) another bridegroom suppressed'. Anal. अन्यः वरः अन्यवरः. तस्मिन् अभिलाषः अन्यवराभिलाषः, निवृत्तः (ceased) अन्यवराभिलाषः यस्य, सः. **ऋते**, 'without, except' governs the ablative. **कृशानुः**, 'fire' because it rarifies (कृश् 'to thin') oblations offered to it. Here fire is referred to as receiving sacrificial offerings. Hence such names as हव्यवाट्, हव्यवाह, हव्यवाहन. The meaning of the lines is that the Mountain, now that he knew that Parvati was to be the future wife of Siva, abandoned all idea of seeking a bridegroom for her. Siva alone was fit to receive her as fire alone is fit to receive oblations.

Trans.—Therefore, although she was of mature (*i. e.* marriageable) age, her father remained (calm)

suppressing all desire of seeking another bridegroom (for her); for no other lustrous objects but fire are fit to receive obligations.

अनुवाद—इसी कारण से युवावस्था के प्राप्त होने पर भी उस के पिता ने और कोई वर ढूंढने की अभिलाषा न की क्योंकि परम तेजस्वी अग्नि के सिवा अन्य तेज मन्त्रों से पवित्र किये गये हव्य के अधिकारी नहीं होते ॥ ५१ ॥

तर्हि तमेवाहूय दीयतामित्याशङ्क्याह—

> अयाचितारं नहि देवदेव-
>
> मद्रिः सुतां ग्राहयितुं शशाक ।
>
> अभ्यर्थनाभङ्गभयेन साधु-
>
> र्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे ॥ ५२ ॥

अयाचितारमिति ॥ **अद्रिः** हिमवान् **अयाचितारम्** अयाचमानं **देवदेवं** महादेवं **सुतां** पार्वतीं **ग्राहयितुं** स्वयमाहूय परिग्राहयितुं **न शशाक** नोत्सेहे। ग्रहेर्द्विकर्मकत्वम्। तथा हि **साधुः** सज्जनः ॥ साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्। इति विश्वः। **अभ्यर्थनाभङ्गभयेन** याच्ञावैफल्यभीत्या **इष्टेऽप्यर्थे** विषये **माध्यस्थ्यम्** औदासीन्यम् **अवलम्बते** ॥

Notes.—**अयाचितारं**,—न याचिता अयाचिता, तम्. **देवदेवम्**, 'the Great God'. Siva is called Mahadeva and he is referred to here as देवदेव. **ग्राहयितुम्**, infin. from the causal of ग्रह 'to receive, to accept'; governs two accusatives, (*i*) देवदेवम्, and (*ii*) सुतां (the daughter). The verbs that govern two accusatives in their causal form are given in the two aphorisms गति-बुद्धि-प्रत्यवसानार्थ शब्दकर्माकर्मकाणाम् अणिकर्ता स णौ (*i. e.* verbs of going, knowing, eating, and reciting place their *logical* subject in the accusative when used causally. *E g.* रामः ग्रामं गच्छति. Rama is here the logical subject of the verb 'to go'. Causally, the sentence would become रामं ग्रामं गमयति Pan. 1. 4. 52. (1), and हृक्रोरन्यतरस्याम् (verbs हृ and कृ optionally) Pan. 1. 4. 53. The verb ग्रह is also meant to be included in the above. **शशाक**,—लिट् 3rd per. sing. from

शक् 'to be able', (शशाक, शक्नुः, शेकुः etc.) **अभ्यर्थनाभङ्गभयेन**, 'through fear of the request being refused'. Anal. अभ्यर्थनायाः (of the request) भङ्गः अभ्यर्थनाभङ्गः, तस्मात् भयं (Pan. 2. 1. 37. पञ्चमी भयेन), तेन. **माध्यस्थ्यम्**, 'neutrality, unconcern' abstr. noun from मध्यस्थ. The meaning of the lines is that the Mountain could not himself propose her daughter's hand to Siva, for he feared lest his proposal should be snubbed. Siva as yet had not preferred any request nor hinted any desire for marriage. The Mountain therefore, fearing refusal, observed reticence.

Trans.—The Mountain could not make the Great God, who was no suitor, accept his daughter (in marriage). A wise man assumes unconcern even in a matter in which he is interested for fear of his request being met with a refusal.

अनुवाद—हिमालय महादेव जी को, जिन्हों ने (पार्वती के सम्बन्ध में) अभी तक कोई प्रार्थना नहीं की थी, स्वयम् बुलाकर कन्या दान करनेका उत्साह न कर सका। ठीक है कि साधु-स्वभाव सज्जन पुरुष प्रार्थना के स्वीकृत न होने के भय से निज के अभीष्ट विषय में भी मध्यस्थ ही रहता है. ॥ ५२ ॥

न च तथैव स्थितः किं तूपायान्तरं चिन्तितवानिति वक्तुं प्रस्तौति—

> यदैव पूर्वे जनने शरीरं
> सा दक्षरोषात्सुदती ससर्ज ।
> तदा प्रभृत्येव विमुक्तसङ्गः
> पतिः पशूनामपरिग्रहोऽभूत् ॥ ५३ ॥

यदेति ॥ शोभना दन्ता यस्याः सा **सुदती** ॥ वयसि दन्तस्य दतृ इति दत्रादेशः ॥ उगितश्च इति ङीप् । **सा** पार्वती **पूर्वे जनने** पूर्वस्मिञ्जन्मनि ॥ पूर्वादिभ्यो नवभ्यो वा इति स्मिन्नादेशाविकल्पः ॥ पूर्वे ज्वलने इति पाठे पूर्वं दाक्षायणीत्वे ज्वलने योगाग्नौ । **यदा** यस्मिन्काले **दक्षरोषात् शरीरं** देहं **ससर्ज** तत्याज । **तदाप्रभृत्येव** तदाद्येव यथा तथा **पशूनां पतिः** शिवः **विमुक्तसङ्गः** त्यक्तविषयासङ्गः सन् ।

अपरिग्रहः अपत्नीकः **अभूत्** । स्त्र्यन्तरं न परिजग्राहेत्यर्थः ॥ पत्नीपरिजनादानमूलशापाः परिग्रहाः । इत्यमरः ॥

Notes.—दक्षरोषात्, 'because of (her) indignation with Daksha'. *Vide supra* sl. 21. **सुदती**, f. 'having beautiful teeth'. दत् is substituted for दन्त by Pan. 5. 4. 141. वयसि दन्तस्य दतृ (*i. e.* after a numeral and सु दत् replaces दन्त when the compound indicates age). ई is added to form the fem. **ससर्ज**,—लिट् 3rd. per. sing. from सृज् 'to renounce, to leave'. **विमुक्तसङ्गः**, 'who had withdrawn from all attachment (to worldly enjoyments)'. Anal. विमुक्तः सङ्गः येन सः. *In a* बहुव्रीहि *compound a past passive participle is placed first*. Pan 2. 2. 36. निष्ठा. **अपरिग्रहः**, 'without a wife'. Anal. नास्ति परिग्रहः यस्य सः. The Mountain finds that Siva observing celibacy is practising penance somewhere near him, and he sees that there is no harm in suffering Parvati to wait upon the god. Herein he hopes to find an indirect avenue to accomplish his end.

Trans.—From the very moment when that lady (Sati) having beautiful teeth renounced her body in her previous birth (Siva,) the lord of beings, withdrawing (himself) from all attachment (to sensual pleasures), went without a wife.

अनुवाद—जब से पूर्व जन्म में अपने पिता दक्ष से रुष्ट हो कर उस सुन्दर दांतों वाली ने अपना शरीर त्यागा तब से ही पशुपति महादेव जी सांसारिक विषयों से मन हट कर (विरक्त हो) बिना किसी पत्नी के दिन व्यतीत करने लगे ॥ ५ ॥

स कृत्तिवासास्तपसे यतात्मा
गङ्गाप्रवाहोक्षितदेवदारु ।
प्रस्थं हिमाद्रेर्मृगनाभिगन्धि
किंचित्क्वणत्किन्नरमध्युवास ॥ ५४ ॥

स इति ॥ **कृत्तिवासाः** चर्माम्बरः । अजिनं चर्म कृत्तिः स्त्री इत्यमरः । **यतात्मा** नियतचित्तः **स** पशुपतिः **तपसे** तपोऽर्थं (**गङ्गाप्रवाहोक्षितदेवदारु**) गङ्गाप्रवाहेणोक्षिताः सिक्ता देवदारवो यस्मिंस्तत्तथोक्तम् । **मृगनाभिगन्धि** कस्तूरीगन्धवत् । कस्तूरीमृगसंचारादिति भावः । मृगनाभिर्मृगमदः कस्तूरी चाथ कोलकम् । इत्यमरः । (**क्वणत्किन्नरं**) क्वणन्तो गायन्तः किन्नरा यस्मिंस्तत्तथोक्तम् । **किंचित्** किमपि **हिमाद्रेः प्रस्थं** सानुम् **अध्युवास** । कुत्रचित्प्रस्थ उवासेत्यर्थः । उपान्वध्याङ्वसः इत्याधारस्य कर्मत्वम् ॥ प्रस्थोऽस्त्री सानुमानयोः इत्यमरः ॥

Notes.—कृत्तिवासाः, 'clothed in the elephant's skin'. गजासुर, son of महिषासुर, met his death at the hands of Siva. A few moments before his death the victim begged a boon of the god that he should from that moment onward put on his skin (कृत्तिः) and be known as Krittivasas. The god granted the boon. Anal. कृत्तिः (elephant's skin) वासः (garment) अस्य, सः. **यतात्मा**, 'with mental activity (fully) restrained'. यतः आत्मा यस्य or येन सः. **गङ्गाप्रवाहोक्षितदेवदारु**, n. acc. sing. qualifying प्रस्थम् (to a peak) 'where the deodar trees were washed by the current of the Ganges'. Anal. गंगायाः प्रवाहः, तेन सिक्ताः देवदारवः यस्मिन्, तत् (प्रस्थम्). **मृगनाभिगन्धि**, n. acc. sing. qualifying प्रस्थम्, 'full of the fragrance of musk'. Anal. मृगनाभेः गन्धः मृगनाभिगन्धः, सो ऽस्ति अस्य, तत् मृगनाभिगन्धि. The base is here thus मृगनाभिगन्धिन्. We cannot, it seems, interpret the compound to be a bahuvrihi and assume the base to be मृगनाभिगन्धि, as of the three rules Pan. 5. 4. 135, 136, 137. the first गन्धस्येदुत्-पूति-सु-सुरभिभ्यः Pan. 5. 4. 135. has a restricted application giving us the four bahuvr. compounds उद्गन्धि, पूतिगन्धि, सुगन्धि, and सुरभिगन्धि; the second अल्पाख्यायाम् 136. is not applicable, since the peak is anything but poor in fragrance and गन्ध in the compound before us is not a synonymn of 'little'; and the third उपमानाच्च 5. 4. 137. has scope only when the compound compresses a simile (*e. g.* पद्मस्येव गन्धो ऽस्य, पद्मगन्धिः),

which is not the case here. **कणत्किन्नरम्**, n. acc. sing. qualifying प्रस्थम् . For anal. see the comm. **अध्युवास**,— लिट् 3rd per. sing. from वस् 'to dwell' preceded by the prep. अधि. The root वस् 'to dwell' preceded by अधि governs the acc. Pan. 1. 4. 48.

Trans.—He who wore the elephant's skin and whose self was (fully) under restraint, fixed, for the purpose of practising austerities, his abode somewhere on a peak of the Snowy Range, where the deodar trees were washed by the current of the Ganges, where there was everywhere the fragrance of musk, and where the Kinnaras were singing loudly.

अनुवाद—इस घटना के कुछ समय पीछे, हाथी की खाल ओढ़े हुए जितेंद्रिय महादेव जी तपस्या करने के लिये हिमालय की उस चोटी पर आये जहां गङ्गा का सुन्दर जल देवदार वृक्षों को सींच कर पास से गुजरता है, जहां वह सारा प्रदेश कस्तूरी (की सुगन्ध) से सुगन्धित होता है, और जहां किन्नर अपना मधुर गान करते हैं ॥ ५४ ॥

गणा नमेरुप्रसवावतंसा
भूर्जत्वचः स्पर्शवतीर्दधानाः ।
मनः शिलाविच्छुरिता निषेदुः
शैलेयनद्धेषु शिलातलेषु ॥ ५५ ॥

गणा इति ॥ **गणाः** प्रमथगणाः ॥ गणाः प्रमथसंख्यौघाः इति वैजयन्ति ॥ **नमेरुप्रसवावतंसाः** सुरपुन्नागकुसुमशेखराः ॥ नमेरुः सुरपुन्नागः इति विश्वः । **स्पर्शवतीः** सुखस्पर्शाः । मृद्वीरित्यर्थः । प्रशंसायां मतुप् ॥ **भूर्जत्वचः** भूर्जवल्कलानि । **दधानाः** । वसाना इत्यर्थः (**मनःशिलाविच्छुरिताः**) मनःशिलाभिर्धातुविशेषैर्विच्छुरिता अनुलिप्ताश्च सन्तः । (**शैलेयनद्धेषु**) शिलायां भवं शैलेयं गन्धौषधिविशेषः । शिलायाः ढ्रीम्यो ढक् इति भावार्थे ढक् ॥ शिलाजतु च शैलेयम् इति यादवः । तेन नद्धेषु व्याप्तेषु **शिलातलेषु निषेदुः** । उपविविशुरित्यर्थः ॥

Notes.—**गणाः**,—गण primarily means 'a collection, a group'. Here it refers to the troop of demigods (प्रमथs),

described as the attendants of Siva and under the special superintendence of गणेश. **नमेरुप्रसवावतंसाः**, m. nom. plu. 'who put on the flowers of Nameru trees for ear-ornaments'. Anal. नमेरूणाम् प्रसवाः (flowers) नमेरुप्रसवाः, ते अवतंसाः येषां, ते. **स्पर्शवतीः**, fem acc. plu. qualifying **भूर्ज-त्वचः** (the barks of birch trees) 'which felt soft (like lawn)'. **मनःशिलाविच्छुरिताः**, 'smeared all over with the red arsenic paint'. **शैलेयनद्धेषु**,—शैलेय is storax, a tree yielding a resinous and scented balsam. The phrase means 'overgrown with the storax'. **निषेदुः**,—लिट् 3rd per. plu. from सद् with prep. नि. This stanza describes how his attendant troops waited upon their Siva as he practised austerities.

Trans.—Siva's attendant troops, wearing Nameru-blossoms for ear-ornaments, smeared (all over) with the redarsenic paint, and clothed in barks of birch trees, sat on rocks overgrown with the storax.

अनुवाद—भोज वृक्ष की कोमल छाल पहने हुए और अङ्गों पर मनःशिला (का लेप) लगाये हुए नमेरु वृक्ष के फूलों से सुभूषित (महादेव जी के) प्रथम शिलाजातु से ढाँपी हुई शिलाओं पर बैठ गये ॥ ५५ ॥

तुषारसङ्घातशिलाः खुराग्रैः
समुल्लिखन्दर्पकलः ककुद्मान् ।
दृष्टः कथंचिद्गवयैर्विविग्नै-
रसोढसिंहध्वनिरुन्ननाद ॥ ५६ ॥

तुषारेति ॥ (**तुषारसङ्घातशिलाः**) तुषारसङ्घाता हिमघनास्त एव शिलास्ताः **खुराग्रैः समुल्लिखन्** विदारयन्दर्पेण कलो मधुरध्वनिर्यस्य स **दर्पकलः** **विविग्नैः** भीतैः **गवयैः** गोसदृशमृगविशेषैः **कथंचित्** कृच्छ्रेण **दृष्टः** ककुदमस्यास्तीति **ककुद्मान्** वृषभः असोढः सिंहानां ध्वनिर्येन सः (**असोढसिंहध्वनिः**) सिंहध्वनिमसहमानः सन् । **उन्ननाद** उच्चैः [illegible]र्जेत्यर्थः । स्वभावोक्तिरलंकार । तदुक्तम्—स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् । इति ॥

Notes.—**तुषारसंघातशिलाः**, 'rocks of hardened ice'. *Vide supra* **मार्गे शिलीभूतहिमे** sl. 11. Anal. तुषाराणां संघाताः (compressed piles), ते एव शिलाः, ताः. **समुल्लिखन्**, 'digging or turning up.' **ककुद्मान्**. Lit. 'possessed of a big hump' (ककुदम् अस्य अस्ति इति); hence 'a bull'. Here the white bull of Siva. Cf. Megh. 1. 52. वक्ष्यसि अध्वश्रमविनयने तस्य शृङ्गे निषण्णः, शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ **गवय**,–the Gayal. (Panj. गोंद). **असोढसिंहध्वनिः**, impatient of the lion's roar'. Anal. असोढः (not tolerated,) सिंहानां ध्वनिः येन, सः. **उन्ननाद**, 'roared' (of bulls). लिट् 3rd per. sing. from नद् with prep. उद्. In the last sloka we had the description of Siva's Pramaths. Here we have the description of his white bull.

Trans.—The bull bellowing proudly as he turned up ice hardened into rocks, and at whom the dismayed Gayals, to their pain, sometimes cast (furtive) glances, roared mightily, impatient of the lion's roar.

अनुवाद—बर्फ के दब जाने से बनी हुई शिलाओं को अपने खुरों के अग्र-भाग से खोद रहे मधुर शब्द करने वाले (महादेव जी के) वृषभ ने जिसे गवय भी डर कर देखा करते थे, सिंह की गंज न सह कर भयङ्कर शब्द किया ॥५६॥

तत्राग्निमाधाय समित्समिद्धं
स्वमेव मूर्त्यन्तरमष्टमूर्तिः ।
स्वयं विधाता तपसः फलानां
केनापि कामेन तपश्चचार ॥ ५७ ॥

तत्रेति ॥ **तपसः फलानाम्** इन्द्रत्वादीनां **स्वयं विधाता** जनयिता। दातेत्यर्थः। अष्टौ मूर्तयो यस्य सः **अष्टमूर्तिः** ईश्वरः। भूतार्कचन्द्रयज्वानो मूर्तयोऽष्टौ प्रकीर्तिताः। इति ॥ तत्र प्रस्थे **स्वं** स्वकीयम् **एव मूर्त्यन्तरं** मूर्तिभेदं **समित्समिद्धं** समिद्भिः समिद्धं दीपितम् **अग्निम् आधाय** प्रतिष्ठाप्य **केनापि कामेन** कयापि फलकामनया **तपश्चचार** चक्रे ॥ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति न्यायात्कामेनेत्युक्तम्। तस्यावाप्तसमस्तकामत्वात्केनापीत्युक्तम् ॥

Notes.—**आधाय,** √धा preceded by the prep. आ means to 'kindle' (sacrificial fire). **समित्समिद्धम,** 'kept burning or fed with sacrificial wood'. **समिध्,** f. means sacrificial wood, as पलाश, खदिर, पिप्पल etc. √इध् (by itself or preceded by सम्) means 'to light (a fire)'. समिध् f. itself is formed from the same verb. The verb and its derivatives occur frequently in Rigveda and Yajurveda and the sacrificial literature. Rv. 10. 55. 13 a विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः. **स्वम एव मूर्त्यन्तरम,** 'only another form of himself'. Anal. अन्या मूर्तिः मूर्त्यन्तरम. Siva has eight forms,—(i) the *five* elements आकाश, वायु, अग्नि, आप्, पृथिवी, (ii) the *sixth* the sun, (iii) the *seventh* the moon, and (iv) the *eigth* the sacrificer. See the comm. and the benedictory stanza of Sak. Fire (अग्नि) is thus only another manifestation of Siva himself. अष्टमूर्तिः 'Siva'. See above. **केनापि कामेन,**—'with some unknown aim'. Siva himself rewards the austerities of ascetics and nothing is unattainable to him. Yet no sane being undergoes trouble for the sake of nothing. Hence the Poet says **केनापि कामेन.**

Trans.—(The god) of eight forms, himself the ordainer of the fruits of austerities, lit up (the holy) fire fed with sacrificial wood, which was another manifestation of his own self, and commenced austerities with some unknown desire.

अनुवाद—उस स्थान पर स्वयम् तपस्या का फल देने वाले अष्टमूर्ति महादेव जी ने समिधाओं से प्रज्वलित किये जा रहे अपने ही रूपान्तर अग्नि को सम्मुख स्थापित कर के किसि अज्ञात कामना से तपस्या आरम्भ की ॥ ५७ ॥

अनर्घ्यमर्घ्येण तमद्रिनाथः
स्वर्गौकसामर्चितमर्चयित्वा ।
आराधनायास्य सखीसमेतां
समादिदेश प्रयतां तनूजाम् ॥ ५८ ॥

अनर्घ्येति ॥ अद्रीणां नाथः **अद्रिनाथः** हिमवान्। अर्घं मूल्यमर्हतीत्यर्घ्यः। मूल्ये पूजाविधावर्घः इत्यमरः ॥ दण्डादिभ्यो यत् इति यत्प्रत्ययः ॥ अर्घ्यो न भवतीत्यनर्घ्यस्तम् **अनर्घ्यम्**। अमूल्यमित्यर्थः। स्वर्ग ओकः स्थानं येषां तेषां **स्वर्गौकसां** देवानाम् **अर्चितम्**। देवैः पूज्यमानमित्यर्थः। मतिबुद्धिपूजार्थेभ्यश्च इति वर्तमाने क्तः ॥ क्तस्य च वर्तमाने इति षष्ठी ॥ **तम्** ईश्वरम् **अर्घ्येण** पूजार्थोदकेन। पादार्घाभ्यां च इति यत्प्रत्ययः। षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि। इत्यमरः। **अर्चयित्वा** पूजयित्वा **अस्य** ईश्वरस्य **आराधनाय** सखीभ्यां जयाविजयाभ्यां समेतां (**सखीसमेतां**) **प्रयतां** नियतां **तनूजां** सुतां **समादिदेश** आज्ञापयामास ॥

Notes.—**अनर्घ्यम्,—अर्घ** means 'worth, value'. By Pan. 5. 1. 66. दण्डादिभ्यो यः in the sense अर्हन् अर्हति it makes अर्घ्यः. Then by prefixing the negative अन् we get अनर्घ्य 'invaluable, of great worth'. **अर्घ्येण** 'with materials of worship'. **स्वर्गौकसाम्**, 'of gods'. Anal. स्वर्गः ओकः (residence) येषां ते स्वर्गौकसः, तेषाम्. Cf. दिवौकस् and दिविषद्. **सखीसमेतां**,—' accompanied by her female friends' qualifies **तनूजाम्**, '(his) daughter'. Anal. सखीभ्यां समेतां सखीसमेतां. Two female friends जया and विजया accompanied her. **समादिदेश**, 'ordered, bade'. In sl. 50 समादिदेश seems to have the same sense which आदेश has in the sentence सिद्धादेशो ऽयम्, that of foretelling. **प्रयतां**, 'self-restrained, pure'.

Trans.—Having worshipped with materials of worship him, whose worth could not be appraised (so great was it), and who received the worship of the gods of Heaven, the Lord of the Mountains bade his self-restrained daughter along with her two friends wait upon him.

अनुवाद—उस समय जब हिमालय उन महान् और देवताओं के भी पूज्यस्थान महादेव जी की पूजा कर चुका, तब उस ने यम-नियमों का अभ्यास कर रही अपनी कन्या को समेत सहेलियों के उन की आराधना के लिये आज्ञा दी ॥ ५८ ॥

प्रत्यर्थिभूतामपि तां समाधेः
शुश्रूषमाणां गिरिशोऽनुमेने ।
विकारहेतौ सति विक्रियन्ते
येषां न चेतांसि त एव धीराः ॥ ५९ ॥

प्रत्यर्थीति ॥ **गिरिशः** शिवः **समाधेः प्रत्यर्थिभूतां** प्रतिपक्षभूताम् । सुप्सुपेति समासः । **अपि** श्रोतुमिच्छन्तीं **शुश्रूषमाणां** सेवमानाम् । सेवका हि सेव्ये दत्तकर्णा भवन्ति । इच्छार्थे सन्प्रत्ययः । ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदम् । **तां** पार्वतीम् **अनुमेने** अङ्गीचकार । न प्रतिषिद्धवानित्यभिप्रायः । न चैतावता धीरस्य कश्चिद्विकार इत्याशयः ॥ धीरत्वमेवार्थान्तरन्यासेनाह—विकारेति ॥ (**विकारहेतौ**) विकारस्य प्रकृतेरन्यथात्वस्य हेतौ स्त्रीसन्निधानादिकारणे **सति** विद्यमाने अपि **येषां चेतांसि न विक्रियन्ते** न विकृतिं नीयन्ते **त एव धीराः** । विक्रियन्ते इति कर्मणि लट् ।

Notes.—**प्रत्यर्थिभूताम् अपि**, qualifies **तां** (her) 'who was verily like an enemy to (his) trance'. प्रत्यर्थिन् is derived from प्रत्यर्थ् 10. A 'to challenge'. सुष्ठु प्रत्यर्थयते इति, 'one who challenges, an enemy'. Anal. प्रत्यर्थिनी भूतां (or even प्रत्यर्थि भूतम् प्रत्यर्थिभूतम्, without any reference to gender; fem. acc. sing. प्रत्यर्थिभूताम्). Mac. 188. 1. c. "The past part. भूत...is often added, in the sense of 'being', to an appositional substantive (which is thus turned into an adj.)". We have treated the compound as karmadharaya. Malli. treats it as a सुप्सुपा. In that case भूत may be taken to mean सम and explained by Pan. 2. 1. 31. **समाधिः**, 'trance'. The definition of समाधिः as given in Pat. 3. 3. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव **समाधिः**, '*smadhi* is but continued meditation in which the subject loses its own identity and only the object of meditation is visible'. **शुश्रूषमाणाम्**, fem. acc. sing. from the present part. of the desiderative of श्रु 'to hear' in the sense of 'waiting upon, attending, serving'. **अनुमेने**, 'allowed, permitted', लिट् 3rd per. sing. mid. voice

from मन् 4. A. preceded by the prep. अनु. In this sloka the Poet says that the grandness of a trance is best seen in the face of seductive factors. Siva's smadhi proved its worth because Parvati's beauty had no effect on it.

Trans.—Siva allowed her, though she was veritably like an obstacle to his trance, to wait upon him. For those alone are firm-minded whose minds know no change in the midst of tempting conditions.

अनुवाद—पर्वत पर रहने वाले महादेव जी ने भी उस को यद्यपि वह तपस्या में एक प्रकार का विघ्न ही थी तपस्या करने की अनुज्ञा दी। सच है कि वे ही धीर होते हैं जिन के मन विकृति-कारक कारणों के समुपस्थित होते हुए भी नहीं डोलते ॥ ५९ ॥

शुश्रूषाप्रकारमेवाह—

> अवचितबलिपुष्पा वेदिसंमार्गदक्षा
>
> नियमविधिजलानां बर्हिषां चोपनेत्री ।
>
> गिरिशमुपचचार प्रत्यहं सा सुकेशी
>
> नियमितपरिखेदा तच्छिरश्चन्द्रपादैः ॥ ६० ॥

अवचितेति। **सुकेशी** शोभनमूर्धजा ॥ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति ङीष् ॥ **सा** पार्वती अवचितानि लूनानि बलिपुष्पाणि पूजाकुसुमानि यया सा (**अवचितबलिपुष्पा**) (**वेदिसंमार्गदक्षा**) वेदेर्नियमवेदिकायाः संमार्गे संमार्जनेदक्षा। (**नियमविधिजलानां**) नियमविधेर्नित्यकर्मानुष्ठानस्य यानि जलानि तेषां **बर्हिषां** कुशानां **चउपनेत्री** आनेत्री सती (**तच्छिरश्चन्द्रपादैः**) तस्य गिरिशस्य शिरसि चन्द्रस्य पादैररश्मिभिः। पादा रश्म्यङ्घ्रितुर्यांशाः इत्यमरः। **नियमितपरिखेदा** निवर्तितपरिश्रमा सतीअहन्यहनि **प्रत्यहम्**। अव्ययं विभक्तिसमीपसमृद्धि—इत्यादिना नियतार्थेऽव्ययीभावः। नपुंसकादन्यतरस्याम् इत्यच्प्रत्ययः। **गिरिशम् उपचचार** शुश्रूषांचक्रे ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया
संजीवनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ
कुमारसंभवे महाकाव्ये
उमोत्पत्तिः नाम प्रथमः सर्गः।

Notes.—अवचितबलिपुष्पा, 'who plucked flowers for offerings'. Anal. बलेः पुष्पाणि बलिपुष्पाणि (षष्ठीतत्॰. The connexion that is meant to be expressed is that of तादर्थ्य i. e. 'purpose'); अवचितानि बलिपुष्पाणि यया, सा (बहुव्रीहि॰). √चि preceded by अव means 'to pluck, gather, cull (flowers etc.)', **नियमविधि—**, '(for) the performance of daily rites'. A नियम is a rite enjoined by religion to be observed scrupulously every day, for example सन्ध्योपासन. **उपनेत्री** fem. nom. sing. from उपनेतृ (*i. e.* उप+नी 'to carry'+तृच्) 'one who fetches'. **वेदिसंमार्गदक्षा,** 'who was prompt in sweeping clean the holy altar'. संमार्ग is from सम् √मृज् 'to clean'. Anal. वेदेः संमार्गः वेदिसम्मार्गः, तस्मिन् दक्षा vide दोहदक्षः *supra* sl. 2. **प्रत्यहं,** 'daily'. Anal. अहनि अहनि इति प्रत्यहम्. See the comm. **नियमितपरिखेदा,** 'whose fatigue was removed'. Anal. नियमितः परिखेदः यस्याः, सा. √यम् preceded by नि means 'to check, to remove; to allay'. **—पादैः,** पाद here means 'a ray, a beam' (considered as the foot of a heavenly body). Cf. कर m. which means both 'a hand' and 'a ray'.

Trans.—She of fine tresses, who plucked flowers for worship, who was prompt in sweeping clean the holy altar, and who fetched water and kuśa grass for the performance of daily rites, waited upon Siva day after day, refreshed in her toil by the rays of the crescent moon on his head.

अनुवाद—सुन्दर केशधारिणी पार्वती वेदी साफ़ करने में (सदैव) तत्पर रहती थी, वह पूजा के लिये फूल तोड़ने जाया करती थी, और नित्यकर्म के अनुष्ठान निमित्त जल और कुशा लाया करती थी—(इस प्रकार, वह शैलकन्या दिन पर दिन महादेव जी की सेवा में लगी रहती थी और सेवा समय उसे जो श्रम होता था वह महादेव जी के सिर की चन्द्र-कला से आ रही किरणों से दूर हो जाता था॥६०॥

द्वितीयः सर्गः ॥

तस्मिन्विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ॥ १ ॥

तस्मिन्निति ॥ **तस्मिन्काले** पार्वतीशुश्रूषाकाले **तारकेण** तारकनाम्ना वज्रणाखपुत्रेण केनचिदसुरेण **विप्रकृताः** उपप्लुता दिवमोकः स्थानं येषां ते **दिवौकसः** देवाः । दिवं स्वर्गेऽन्तरिक्षे च इति विश्वः । द्यौरोके इति पक्षे पृषोदरादित्वात्साधुः । तुरं त्वरितं साहयत्यभिभवतीति तुराषाट् । साहयतेश्छंरादिकात्क्विप् । नहिवृतिवृषि—इत्यादिना पूर्वपदस्य दीर्घः । प्रकृतिग्रहणे प्रातिपादिकस्यापि ग्रहणात् । मुग्धबोधकारस्तु तुराशब्दष्टावन्त इत्याचष्टे ॥ तं **तुरासाहं** देवेन्द्रम् । अजादिषु साड्रूपत्वाभावात् सहेः साडः सः सः इति षत्वं न भवति ॥ **पुरोधाय** पुरस्कृत्य । स्वयंभुवो ब्रह्मण इदं **स्वायंभुवम्** । संज्ञापूर्वकविधेरनित्यत्वात् ओर्गुणः इति गुणो न । **धाम** स्थानं **ययुः** ब्रह्मलोकं जग्मुरित्यर्थः ॥

Notes.—तस्मिन् काले. Just at the time when Parvati was waiting upon Siva, gods no longer able to tolerate the tyranny of Taraka, a mighty demon, placed Indra at their head and went in a body to Brahman to complain of their distress. **विप्रकृताः**, 'oppressed, harassed'. दिवौकसः 'gods'. Malli. gives two derivations. (i) दिवम् ओकः (abode) येषां, ते; (ii) द्यौः ओकः येषां, ते. In the latter formation we are, however, to assume the augment of अ between the ending consonant of दिव् f. 'heaven' and the initial vowel ओ of ओकस् n. 'an abode'. **तारक** was a mighty demon. By practising austere penance he secured a boon from Brahman that he should not be killed by any one except by a child seven days old. Relying on this boon, he commenced oppressing the gods very much. The gods bore the tyranny of the demon until they could bear it no more. They, then, betook themselves to Brahman, who disclosed to the gods that the offspring of Siva alone could slay the demon. Kartikeya (Kumara of the poem) was born

and slew the demon on the seventh day of his birth. **तुरासाहम**, Oldenberg in his 'Exegetical and Critical Notes on Rig-veda' says that we may not assume a base *tura* ending in short *a*. In his opinion all formations containing *tur*-or *tura*-(and तुराषाट् occurs in Rigveda several times) should be explained by assuming *only* the base *tur*—. Then we may analyse the word as तुरा (instr. adv.) साहयति इति 'who overcomes (his enemies) speedily'. **पुरोधाय**, 'placing at their head'. पुरस् is here regarded as a prep. (गति). Hence पुरोधाय and *not* पुरोहित्वा. Pan. 1. 4. 67. पुरो ऽव्ययम्. **स्वायंभुवं**, qualifies **धाम** 'abode' (n. acc. sing. from धामन्) and means 'relating or belonging to the self-existent god *i. e.* Brahman'. It is to be noted that भु of स्वयंभु does not take *guna*. See the comm.

Trans.—At that time harassed by (the demon) Taraka, the gods, placing Indra at their head, proceeded to the abode of the self-existent God (Brahman).

अनुवाद—उस समय तारक के हाथों अति क्लेश को प्राप्त हुए देवता इन्द्र को अग्रणी कर के ब्रह्म लोक में गये ॥ १ ॥

तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम् ।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥ २ ॥

तेषामिति ॥ (**परिम्लानमुखश्रियाम्**) परिम्लाना परिक्षीणा मुखश्रीः मुखकान्तिः येषां तथोक्तानां **तेषां** देवानां **ब्रह्मा सुप्तपद्मानां** मुकुलितारविन्दानां **सरसां प्रातः दीधितिमान्** सूर्यः **इव आविरभूत्** । प्रकाशोऽभूदित्यर्थः । प्रकाशे प्रादुराविः स्यात् इत्यमरः ॥ सूर्योपमानेन तेषां म्लानिहरणत्वं सूचितम् । अत्रोपमालंकारः । तल्लक्षणं तु—स्वतःसिद्धेन भिन्नेन संमतेन च धर्मतः । साम्यमन्येन वर्ण्यस्य वाच्यं चेकपदोपमा ॥ इति ॥

Notes.—**आविरभूत**, 'appeared, became visible'. आविस् adv. 'openly, before the eyes' (usually prefixed to the roots अस्, भू, and कृ). **परिम्लानमुखश्रियाम्**, m. gen. plu.

'(to the gods) the lustre of whose faces had grown dim'. Anal. परिम्लाना मुखस्य श्रीः येषां, तेषाम्. On account of the tyranny of the demon, the gods were full of sorrow. Sadness was depicted in every face and a cloud sat on every brow. No wonder, then, that the immediate appearance of Brahman as betokening the success of gods' enterprise was highly welcome. दीधितिमान्, 'the Sun'. दीधिति, f. means 'lustre'. सुप्तपद्मानाम्,—When the sun rises in the morning, the lotuses regain their bloom. Ruddy colour came back to the faces of the gods too, at the sight of Brahma. The simile is very expressive. *Vide infra* the equally expressive simile in sl. 19.

Trans.—Brahman showed himself to them, from whose faces the bloom had disappeared as the sun in the morning to the lotuses in the lakes steeped in sleep.

अनुवाद—उन देवताओं पर जिन के मुखों की कान्ति क्षीण हो गयी थी ब्रह्मा इस प्रकार प्रकट हुए जिस प्रकार प्रातः समय सूर्य भगवान कमलाये कमल की झीलों पर प्रकट होता है ॥ २ ॥

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥ ३ ॥

अथेति ॥ **अथ** आविर्भावानन्तरं **सर्वे ते** देवाः सर्वतः समन्ततो मुखानि यस्य तं **सर्वतोमुखम्** । चतुर्मुखमित्यर्थः । (**वागीशं**) वाचां विद्यानामीशं **सर्वस्य** जगतः **धातारं** स्रष्टारं ब्रह्माणं **प्रणिपत्य** नमस्कृत्य । अर्थादनपेताभिः **अर्थ्याभिः** । अर्थयुक्ताभिरित्यर्थः । धर्मपथ्यर्थन्यायादनपेते इति यत्प्रत्ययः । **वाग्भिः उपतस्थिरे** । तुष्टुवुरित्यर्थः । उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यम् इत्यात्मनेपदम् ॥

Notes.—सर्वस्य धातारम्, m. acc. sing. 'the creator of every thing'. The creation of the universe is attributed to Brahma. For an account of the creation of the universe see Manu, Chap. 1. सर्वतोमुखम्, 'who has a face on every side'. Brahma has four

faces, one for each one of the four directions. Cf. Ragh. 10. 22. त्वत्तः सर्वं चतुर्मुखात्. **वागीशम्**, 'the lord of speech'. Inasmuch as the four Vedas came from the mouths of Brahma, he is the source of all speech. **अर्थ्याभिः**, 'appropriate, true in their application'. The word अर्थ्य (fem. अर्थ्या) is formed from अर्थ in accordance with Pan. 4. 4. 92. धर्मपथ्यर्थन्यायाद् अनपेते. After धर्म, पथिन्, अर्थ, न्याय comes the suffix यत्, when the sense is 'not disjoined (from)'. The word अर्थ्य, thus, literally means 'not disjoined from sense'. **उप√स्था** is in the middle voice when it means 'to worship a deity'. **उपतस्थिरे** is लिट् 3rd per. plu.

Trans.—Then they all made an obeisance to him who is the creator of every thing, who has a face on every side, and who is the lord of speech, and worshipped him with appropriate prayers thus:—

अनुवाद—तब उन सब (देवताओं) ने जगत् के स्रष्टा वेद-विद्याओं के पति चतुर्मुख (ब्रह्मा) को प्रणाम किया और युक्त वचनों से इस प्रकार स्तुती करने लगे ॥ ३ ॥

स्तुतिप्रकारमाह नमः इत्यादिभिर्द्वादशभिः श्लोकैः—

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ ४ ॥

नम इति ॥ हे भगवन्नित्यध्याहार्य व्याख्येयम् । **सृष्टेः प्राक्** ॥ अन्यारात्– इत्यादिनाऽन्यत्तरपदयोगे पञ्चमी ॥ **केवलात्मने** एकरूपाय ॥ आत्मा वा इदमेक एवाग्र आसीत् इति श्रुतेः ॥ निर्णीते केवलमिति त्रिलिङ्ग त्वेककृत्स्नयोः । इत्यमरः । **पश्चात्** सृष्टिप्रवृत्तिकाले । विभज्यतेऽनेनेति विभागः । (**गुणत्रयविभागाय**) गुणानां सत्त्वादीनां त्रयमेव विभागो यस्य तस्मै । गुणाः सत्त्वं रजस्तमः इत्यमरः ॥ **भेदम्** उपाधिम् । स्रष्टृत्वादिकमित्यर्थः । **उपेयुषे** प्राप्तवते । उपेयिवाननाश्वाननूचानश्च इति निपाताः अतएव **त्रिमूर्तये** ब्रह्माविष्णुरुद्ररूपिणे **तुभ्यं नमः** । नमः स्वस्ति–इत्यादिना चतुर्थी । उक्तं च—नमो रजोजुषे सृष्टौ स्थितौ सत्त्वमयाय च । तमोरूपाय संहारे त्रिरूपाय स्वयंभुवे ॥ इति ॥

Notes.—*Slokas 4-15* give the gods' prayer. नमस् तुभ्यम् 'all praise to thee'. It is to be noted that नमस् governs the dative case. Cf. the usual form of addressing each other नमस्ते. त्रिमूर्तये. The Vedant philosophy which claims to embody the truth as taught in the Vedas draws a distinction between Brahman (neu.) and Brahman (masc.). (*a*) Brahma (neu.) represents the idea of the Supreme Being regarded as impersonal and absolute, the embodiment of abstract God. Rigveda 10. 129. 1-2. describes with rare unambiguity and pictorial power the abstract Supreme Being. The later *Trinity*, Brahman (masc.), Visnu and Siva is Brahman (neu.) again, considered in relation to the universe. (*b*) This, however is illusion. "Maya, under the guidance of the Lord modifies itself by a progressive evolution into all the individual existences (भेद), distinguished by special names and forms; from it there spring in due order and succession the different material and the whole bodily apparatus belonging to sentient beings. In all those apparently individual forms of existence the one indivisible Brahman is present, but, owing to the particular adjuncts into which Maya has specialised itself, it appears to be broken up—it is broken up, as it were—into a multiplicity of intellectual or sentient principles, the so called जीवs (individual or personal souls)". Thib. The Vedant Sutras, Introduction. प्राक् सृष्टेः केवलात्मने, 'the one soul before the creation'. *Brahma before the creation* is निर्गुणं ब्रह्म, the Absolute, impersonal God. Cf. Rigveda 10. 129. 2. आनीद् अवातं स्वधया तद् एकं ('The only one breathed breathless by itself' Maxmuller).

आत्मा वा इदमेवाग्रे आसीद् नान्यत् किञ्चिन् मिषत् Ait. Ar. 2. 4. 1. 1. **पश्चाद् भेदम् उपेयुषे**, 'who afterwards discoveredst a variety of forms' qualifies तुभ्यम्. Creation is not real. It is phenomenal; it is Brahman only conditioned by Maya. Vide the note on त्रिमूर्तये (b). **उपेयुषे**, m. dat. sing. The base is उपेयिवस् perf. part. from √इ 'to go' preceded by उप. Pan. 3. 2. 109. उपेयिवान्--अनाश्वान्-अनूचानश्च.

Trans.—All praise to thee, the *one soul* before the world (was made), but who later becamest *the Trinity* (*i. e.* as creator, preserver, and dissolver of the universe), discovering multiplicity of form as thou revealedst thyself in the triple substance (*i. e.* as *sattva*, *rajas* and *tamas*).

अनुवाद—(हे भगवन्) सृष्टि से पहले आप ही एक मात्र आत्मा थे। पीछे आप ही से सत्त्वादि तीनों गुणों का आविर्भाव हुआ और नाना प्रकार की सृष्टि प्रकट हुई। (हे भगवन) आप ही त्रिमूर्ति हैं, आप को हमारा नमस्कार हो॥ ४॥

यदमोघमपामन्तरुप्तं बीजमज त्वया।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे॥ ५॥

यदिति॥ न जायत इत्यजः। हे **अज**। **अपां** जलानाम् **अन्तः त्वया यद् अमोघम्** अवन्ध्यं **बीजं** वीर्यम् **उप्तं** निक्षिप्तम्। मुक्तम् इति पाठे विसृष्टमित्यर्थः। शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च। इत्यमरः॥ **अतः** ते बीजात् **चराचरं** स्थावरजङ्गमात्मकम्॥ समाहारे द्वन्द्वैकवद्भावः॥ **विश्वं** जगत्। उत्पन्नमिति शेषः। **तस्य** विश्वस्य। प्रभवत्यस्मादिति **प्रभवः** कारणं **गीयसे**॥ अदश्चराचरं विश्वं प्रसवस्तस्य गीयते इति पाठे अद इदं चराचरं विश्वं तस्य बीजस्य प्रसवो गीयते। लोक इति शेषः॥ अत्र मनुः—अप एव ससर्जादौ तासु बीजमवासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्॥ इति॥

Notes.—अमोघम्, 'not barren; fruitful, prolific'; so, because the world sprang from it. **अपाम् अन्तर्**, 'in (the body of) the waters'. Cf. Rigveda 10. 82. 6. तमिद् गर्भं प्रथमं दध्र आप; also Manu 1. 8. सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु बीजम् अवासृजत॥ अतः

'from that *i. e.* from your seed'. **प्रभवः गीयसे** 'glorified as the primeval cause (of the universe)'. For instance in Rigveda 10. 121. 9. प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। See also Ved. S. 1. 1. 2. जन्माद्यस्य यतः "Brahman is he from whom this world originates, by (whom it is maintained and in whom it enters at the time of dissolution)" S. C. Vidyarnava.

Trans.— O unborn one! from the fruitful seed which was deposited by thee in waters have sprung all things that move and that move not. (Hence) art thou glorified as their cause.

अनुवाद—हे अजन्मन्, जो निश्चित रूप से फल लाने वाला बीज आप ने जलों के बीच में बोया था उस से चराचर जगत् उत्पन्न हुआ। इस लिये ऋषिमुनि लोग आप को सृष्टि का मूलकारण मन्त्रों में मानते आये हैं॥ ५॥

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥ ६ ॥

तिसृभिरिति ॥ **एकः** सृष्टेप्राक्केवलस्त्वं **तिसृभिः अवस्थाभिः** त्रैगुण्यमयीभिर्हरिहरब्रह्मस्वरूपाभिः **महिमानं** निजशक्तिम् **उदीरयन्** विजृम्भयन् **प्रलयस्थितिसर्गाणाम्** अन्तस्थित्युत्पत्तीनां **कारणतां गतः**। इदं पश्चाद्भेदमुपेयुषे (२।४) इत्यस्य विवरणमतो न गतार्थत्वदोषः ॥

Notes.—**तिसृभिः अवस्थाभिः**, 'by (or in) your three capacities'.; that is, as creator, preserver, and dissolver of the universe. **उदीरयन्**, 'proclaiming, manifesting'. **प्रलय**, means literally, 'absorption'. 'It signifies the state when the universe will dissolve and return to the condition in which it was before it came into being. **स्थिति**, 'preservation' means the state of continuance of the universe. **सर्ग**, means 'creation'. **एकः**, is used with emphasis, '(thou) alone *and none else*'. **कारणतां गतः**, 'hast become the cause'.

Cf. Ragh. 10. 16. नमो विश्वसृजे पूर्वं, विश्वं तदनु बिभ्रते। अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥

Trans.—Proclaiming thy majesty in thy three capacities, thou alone art the cause of the creation, preservation, and absorption of the universe.

अनुवाद—ब्रह्मा, विष्णु और शिव इन तीन स्वरूपों में अपनी महिमा का प्रकाश कर रहे आप सृष्टि की उत्पत्ति, स्थिति और प्रलय का एक मात्र कारण हो ॥ ६ ॥

भूतसृष्टिकर्तृत्वमुक्त्वा मिथुनसृष्ट्यर्थं मूर्तिमतो ब्रह्मणो भेदमाह—

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥ ७ ॥

स्त्रीपुंसाविति ॥ स्त्री च पुमांश्च **स्त्रीपुंसौ** ॥ अचतुर—इत्यादिनाच्प्रत्ययान्तो निपातः। **सिसृक्षया** स्रष्टुमिच्छया **भिन्नमूर्तेः** द्विधाकृतविग्रहस्य **ते** तवात्मनो देहस्य भागौ **आत्मभागौ**। आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि। इति विश्वः। **तावेव** भागौ **प्रसूतिभाजः** उत्पत्तिभाजः। (**सर्गस्य**) सृज्यत इति सर्गस्तस्य। निजसृष्टेरित्यर्थः। माता च पिता च **पितरौ** ॥ पिता मात्रा इत्येकशेषः। **स्मृतौ**। वृद्धैरिति शेषः ॥ अत्र मनुः—द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्। अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः ॥ इति ॥

Notes.—**स्त्रीपुंसौ**, 'man and woman'. Anal. स्त्री च पुमान् च. Short अ terminates the compound. Pan. 5. 4. 77. अचतुर-विचतुर-सुचतुर-स्त्रीपुंस—. **आत्मभागौ**, 'parts of thy body'; *vide* Manu. 1. 32. द्विधा कृत्वा आत्मनो देहम् अर्धेन पुरुषोऽभवत्। अर्धेन नारी, तस्यां स विराजम् असृजत् प्रभुः ॥ Anal. आत्मनः (of (thy) body) भागौ. **भिन्नमूर्तेः**, (of thee) who cuttest thy person (in twain). **सिसृक्षया**, 'with a desire to create'. सिसृक्षा f. is formed from the desiderative of सृज् 'to create'. **प्रसूतिभाजः**, m. gen. sing. lit. 'sharing birth'. Anal. प्रसूतिं भजते इति यः (सर्गः) स प्रसूतिभाक्, तस्य. Pan. 3. 2 .62. भजेर्ण्विः. **स्मृतौ**, 'are remembered in the smritis'. The word is, thus, used in the technical sense. The meaning of the sl. is that the first man and woman who

continued their race further by sexual union were made by thee.

Trans.--Man and woman are parts of thy body, who being desirous of creating the universe dividedst thy person (in twain). The same are remembered in the Smritis as parents of the creation (*i. e* man and woman) continuing (*i, e.* their race) by birth.

अनुवाद—हे भगवन्, सृष्टि उत्पन्न करने की इच्छा से आपने अपने आप के दो भाग किये। (इस प्रकार) आदि स्त्री और आदि पुरुष आप ही के शरीर के दो खण्ड थे और वे हि मैथुनी सृष्टि के माता पिता कहे गये हैं॥ ७॥

स्वकालपरिमाणेन व्यस्तरात्रिंदिवस्य ते।
यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ॥ ८॥

स्वकालेति॥ (**स्वकालपरिमाणेन**) स्वकालस्य परिमाणेन चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते इत्युक्तरूपेण। (**व्यस्तरात्रिंदिवस्य**) व्यस्तं विभक्तं रात्रिंदिवं राज्यहनी यस्य तस्य। यद्यपि अचतुरेत्यादिसूत्रेण रात्रौ च दिवा च रात्रिंदिवमिति सप्तम्यर्थे वृत्तौ द्वन्द्व इत्युक्तं तथापि दोषामन्यमहः दिवामन्या रात्रिः इत्यादौ कर्मवदत्रापि प्रातिपदिकार्थवृत्तित्वं कथंचित्प्रयोगबलादाश्रयणीयम्॥ **ते** तव **यौ तु स्वप्नावबोधौ तौ एव भूतानां प्रलयोदयौ** संहारसृष्टी। यदाहुः—यदा स देवो जागर्ति तदेदं चेष्टते जगत। यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते॥ इति॥ एतच्च दैनंदिनसृष्टिप्रलयाभिप्रायकं महाप्रलयस्य ब्रह्मणो वर्षशतान्ते भावित्वात्॥

Notes.—**व्यस्तरात्रिंदिवस्य,** m. gen. sing. goes with **ते** (of thee) 'who hast divided thy day and night'. Anal. व्यस्तं रात्रिंदिवं यस्य सः Pan. 5. 4. 77 enumerates certain compounds which take the suffix अ (च्). **रात्रिंदिव—,** 'day and night' is enumerated as the noun-base of such a compound. Vrittikara, however, remarking the solitary case रात्रिंदिवम् formed from the base रात्रिंदिव— and its use exclusively in the loc. sense allows the compound only in the loc. But the sense of the base is that of two nominatives considered in a copulative

relation. See the defence by the Comm. प्रलयोदयौ, '(lengths in time of the continuance of) the creation and dissolution (of the universe)'. Manu. 1. 69-72. चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम् । तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ॥ 69. इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु । एकापायेन वर्तन्ते सहस्राणि शतानि च ॥ 70. यदेतत् परिसंख्यातम् आदावेव चतुर्युगम् । एतद् द्वादशसाहस्रं देवानां युगम् उच्यते ॥ 71. दैविकानां युगानां तु सहस्रं परिसंख्यया । ब्राह्मम् एकम् अहर् ज्ञेयं तावती रात्रिरेव च ॥ 72. If we work out the duration of a day of Brahman from the above we get 4,320,000,000 human years. This is the length of the period of creation; and the period of dissolution is equally long.

Trans.—The sleeping and waking of thee, who hast measured off thy night and day by a measuring-unit referring to thine own time, are the periods of dissolution and continuation of the universe.

अनुवाद—आपने अपने रात और दिन अपने ही काल के माप से विभक्त किये हैं। जो आप का जागना है वह प्राणियों की सृष्टि का स्थिति-काल और जो आप का सोना है वह उन का प्रलय-काल है ॥ ८ ॥

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥ ९ ॥

जगदिति ॥ हे भगवन् । त्वं **जगद्योनिः** जगत्कारणं स्वयम् **अयोनिः** अनादित्वादकारणकस्त्वम् । (**जगदन्तः**) अन्तयतीत्यन्तः । पचाद्यच् । जगतोऽन्तो जगत्संहर्ता स्वयं **निरन्तकः** नित्यत्वादन्तरहितः । त्वं जगतामादिः **जगदादिः** । सृष्टेः प्रागपि सन्नित्यर्थः । अतएव त्वम् **अनादिः** आदिरहितः । त्वं (**जगदीशः**) जगतामीशो नियन्ता स्वयं **निरीश्वरः** । अनियम्य इत्यर्थः । यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुतिरेवात्र प्रमाणम् ॥ अत्रायोनिरित्यादौ नञ्तत्पुरुषाश्रयणे विरोधः । बहुव्रीहिणा तु तत्परिहार इति विरोधाभासालंकारः । यथाहुः—विरोधाभासत्वे विरोधः इति ॥

Notes.—जगदन्तो, m. '(though) the end of (all) universe'. All things meet their end in Brahman and he thus finally absorbs everything. See above. निरन्तकः,

'without any end'. अन्तकः is 'one who ends; death; god of death'. जगदादिः, 'existing before the universe'.

Trans.—Though the origin of the universe, thou art without origin; though the end of (all) universe, thou hast no end; though beginning the universe, thou hast no beginning; though the lord of all things, none is thy lord.

अनुवाद—हे भगवन्; आप जगत के कारण हैं परन्तु आप का कोई कारण नहीं, आप सृष्टि के संहर्ता हैं परन्तु आप का कोई संहरता नहीं। आप सृष्टि के भी पहले थे परन्तु आप से पहले कोई नहीं। आप जगत के स्वामी हैं परन्तु आप का कोई स्वामी नहीं।

तव तु न प्रपञ्चस्येव जन्मतिरोधानज्ञानेषु परापेक्षेत्याह—

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे॥ १०॥

आत्मानमिति॥ हे भगवन्। **त्वमात्मानं** लोकानुग्रहार्थं ब्रह्मरूपेणोत्पिपादयिषितं स्वस्वरूपम् **आत्मना एव वेत्सि** जानासि। सर्वापि क्रिया कर्तव्यार्थज्ञानपूर्विकेति भावः। तथा **आत्मानमात्मना एव**। आत्मन्येवेत्यत्रापि संबध्यते। स्वस्मिन्नेव **सृजसि**। अधिष्ठानमपि स्वयमेवेत्यर्थः। स्वे महिम्नि प्रतिष्ठितम् इति श्रुतेः॥ **कृतिना** समर्थेन। इदं सर्वत्र संबध्यते। **आत्मना** स्वेनैव **आत्मन्येव प्रलीयसे** स्वस्मिन्नेव प्रलीनो भवसि॥ लीयतेर्दैवादिकात्कर्तरि लट्। प्रकृत्यादिभ्य उपसंख्यानम् इति वार्तिकात्सर्वत्रात्मनेति तृतीया। न हि ते प्रपञ्चस्येव ज्ञानोत्पत्तिलयेषु परापेक्षेति फलितार्थः॥

Notes.—**आत्मानम् आत्मना वेत्सि**, 'thou knowest thyself in thine own self'. The plain meaning is that since all is Brahman and there is nothing other than him it follows that what is to be known is identical with the knower. In other words the subject and the object are the same: Brahman is the knower, Brahman (for the entire universe is Brahman) is the matter to be known. **त्वम् आत्मन्येव प्रलीयसे**, 'thou art absorbed in thine own self'. Ultimately, at the time of dissolution, all things disappear unto Brahman whence they arose.

कृतिना. कृतिन् means 'competent; mighty'. Anal. कृतम् अस्यास्ति 'one who has competence (for some action)'. Cf. the text from Brahmopanisad which beautifully elucidates सृजस्यात्मानम्...प्रलीयसे : ऊर्णनाभिर् यथा तन्तून् सृजते संहरत्यपि। जाग्रत्स्वप्ने तथा जीवो गच्छत्यागच्छते पुनः ॥ Brahman is often compared to ऊर्णनाभिः ('spider'; lit. wool-navel) in the Brahmanas.

Trans.—Thou knowest thyself thine own self, thou createst thyself thine own self and thou art absorbed in thyself by thy great self.

अनुवाद—हे भगवन् आप (अपेन स्वरूप) ईश्वर को अपने ही में जान लेते हैं, आप (अपने स्वरूप) जगत् को आप ही उत्पन्न करते हैं, आप के सामर्थ्य द्वारा (सृष्टि जो) आप (ही का स्वरूप है प्रलय के समय) आप में ही लीन हो जाती है ॥ १० ॥

द्रवः संघातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥ ११ ॥

द्रव इति ॥ त्वमित्यनुषज्यते । हे भगवन् । त्वं **द्रवः** सरित्समुद्रादिवद्रसात्मकोऽसि। (**संघातकठिनः**) संघातेन निबिडसंयोगेन कठिनो महीधरादिवत । **स्थूलः** इन्द्रियग्रहणयोग्यो घटादिवत् । **सूक्ष्मः** अतीन्द्रियः परमाणवादिवत् । **लघुः** उत्पतनयोग्यस्तूलादिवत् । **गुरुः** हेमाद्रिवदचलनीयः । **व्यक्तः** कार्यरूपोसि । **व्यक्तेतरः** कारणरूपः **च असि** । एवं **विभूतिषु** अणिमादिषु **ते** तव । प्रकामस्य भावः **प्राकाम्यं** यथाकामत्वम् ॥

Notes.—संघातकठिनं, 'solid through union (of atoms)'. Here we have a reference to the atomism of Kanada. परमाणुs or atoms unite by twos to form द्व्यणुकs, by threes to form त्र्यणुकs. So all substances are formed by a process of evclution. संघातकठिनः is opposed to द्रवः (fluid). The simple sense is that Brahman is all things. The opposition of such terms as solid and fluid is reconciled in him. He is as much the flowing river as the solid rock. व्यक्तो व्यक्तेतरः, 'perceptible

yet otherwise'. Senses can only know Brahman as revealed in the world of matter, but as detached from the material world he is not the subject of sensation. **प्राकाम्यम्**, 'freedom of will'; abstr. from प्रकाम. **विभूतिषु.**—विभूतिs are uncommon powers acquired by practising *yoga*. *Vide supra* Canto 1. sl. 5 on सिद्धाः.

Trans.—Thou art fluid, thou art solid as (floating) atoms combine; thou art gross, thou art subtle; thou art light, thou art heavy; thou art perceptible, thou art otherwise. Thus freedom of will is thine in (the revelation of) uncommon powers.

अनुवाद—हे भगवन् आप (नदियों और समुद्रों की नाईं) द्रव हैं और (पर्वतों की नाईं) परमाणुओं के (आभ्यन्तरिक) संयोग से कठिन है , आप स्थूल हैं और आप सूक्ष्म हैं , आप कारण हैं और आप कार्य्य हैं , आप की अणिमादि विभूतियों के विषय में स्वच्छन्दता है ॥ ११ ॥

उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम् ।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम् ॥ १२ ॥

उद्घात इति ॥ हे भगवन् । **यासां** गिरां वाचाम् **उद्घातः** उपक्रमः **प्रणवः** ओङ्कारात्मकः ॥ ओङ्कारप्रणवौ समौ इति । स्यादभ्यादानमुद्घात आरम्भः इति चामरः । इदमुपसंहारस्याप्युपलक्षणम् ॥ ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वतः । दहत्येनः कृतं पूर्वं परस्ताच्च विशेषतः ॥ इति निरुक्तपारीशिष्ट्योर्यास्कः ॥ नीयन्त एभिरर्थविशेषा इति न्यायाः स्वराः । उक्तं च—स्वरविशेषादर्थप्रतिपत्तिः । यथेन्द्रशत्रुः स्वरतोऽपराधात् इति ॥ यासां गिरां । **त्रिभिः न्यायैः** उदात्तानुदात्तस्वरितैः स्वरैः **उदीरणम्** उच्चारणम् । **यासां कर्म** । प्रतिपाद्यमित्यर्थः । **यज्ञः** ज्योतिष्टोमादिः । न तु चैत्यवन्दनादिरिति भाः **फलं स्वर्गः** । कर्मद्वारेति शेषः । कर्मस्वर्गौ ब्रह्मापवर्गयोरप्युपलक्षणे । **त्वं तासां गिराम्** । वेदानामित्यर्थः । प्रभवत्यस्मादिति **प्रभवः** कारणम् । प्रणेता स्मर्ता वा मतभेदेन ॥

Notes.—**उद्घातः प्रणवो, यासां** 'whose beginning is *Pranava*..' The recitation of Vedic hymns commences with the recitation of the sacred syllable Om. ओमभ्यादाने Pan. 8.2.87. This sacred syllable, not altogether free

from the taint of mystery is understood to be the equivalent of another equally sacred and mysterious syllable प्रणवः. प्रणव signifies the Supreme Being—(तस्य वाचकः प्रणवः. Pat. 1.27.) and whether it means 'one worthy of praise or 'one who impels' the word has acquired more meaning than is warranted or indicated by its derivation. So too the syllable Om. The word appears to have meant originally only 'a protector'. न्यायैः त्रिभिर् उदीरणम्, 'the recital (of which) is by the three accents' न्याय here means an accent. The three accents were उदात्त 'acute', स्वरित 'circumflex', and अनुदात्त 'grave'. It appears that the Vedic accent concerned the modulation of tone and not stress. It was musical. The main accent of the word was उदात्त. But in some cases they had also independent स्वरितs. Accents have been differently marked in different texts, the system of Rigveda being that स्वरित and अनुदात्त are marked by a small vertical line above and a small horizontal line below the particular syllable respectively. Correct pronunciation was a religious duty of the Vedic people. It was far more valued then than now, though we boast of our knowledge of phonetics and philology. (*Vide* Pan. Siksa मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तम् अर्थम् आह etc.). Apte, however criticises the interpretation of Malli. in the following words :—" Malli. takes न्याय to mean स्वर: but it is quite open in our opinion to take न्याय in the sense of 'a system' or 'way' (which are manifested in three systems *i. e.* ऋक्, यजुस् and सामन्) कर्म यज्ञः 'the rite (enjoined by which hymns) is sacrifice'. Here we have a reference to the philosophy of the Purvamimansa. According to this school of philosophy there is no other way to heaven but that of sacrifice,

rites, and ceremonies. The Purvamimansa is consequently named Karmamimansa. फलं स्वर्गः, 'the reward (promised to the performer of sacrifices) is Paradise.' त्वं प्रभवो गिराम् 'thou art the origin of (those) Vedic hymns', cf. परावरेब्रह्मणि यं सदाहुर वेदात्मानं वेदनिधिं मुनीन्द्राः । तं पद्मगर्भं त्वादिदेवं प्रणम्यार्चां लक्षणमाह शौनकः ॥ (After bowing to the first god, the lotus-born one, him whom the great seers from the beginning of the Vedas to their end have always proclaimed *as the breather of the Vedas* and *the treasure-house of the Vedas*, he, Saunaka, explains the form of Riks.) Rig.—Prati. 1. 1.

Trans.—Thou art the origin of (Vedic) speeches of which the beginning is (the sacred syllable) Om, of which the chanting is (governed) by the three accents, the rite (enjoined) by which is sacrifice, and the reward (promised) by which is Paradise.

अनुवाद—जिनका आरम्भ ओ३म् शब्द से होता है, जिन का उच्चारण तीन स्वरों में किया जाता है, जिनमें यज्ञ (विहित) कर्म है और स्वर्ग (प्राप्य) फल है, उन मन्त्रों के आप निकास हैं ॥ १२ ॥

सांख्यमतेन स्तुवन्ति—

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥ १३ ॥

त्वामिति ॥ हे भगवन् । त्वां पुरुषस्यार्थो भोगापवर्गरूपस्तदर्थं प्रवर्तत इति तां **पुरुषार्थप्रवर्तिनीं प्रकृतिं** त्रैगुण्यात्मकं मूलकारणम् ॥ प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारणे । इति यादवः ॥ **आमनन्ति** कथयन्ति ॥ म्ना अभ्यासे इति धातोर्लट् । पाघ्राध्मास्थाम्ना—इत्यादिना मनादेशः ॥ प्रकृतिपुरुषभेदाग्रहणात्प्रकृतिपुरुषभेदव्यपदेशः । **त्वामेव** तां प्रकृतिं साक्षित्वेन पश्यतीति **तद्दर्शिनम् उदासीनं** कूटस्थं **पुरुषं विदुः** विदन्ति ॥ विदो लटो वा इति झेर्जुसादेशः । अजामेकां लोहितशुक्लकृष्णाम्

Notes.—**आमनन्ति,** '(they) pronounce'. म्ना preceded by आ means 'to hand down traditionally, to mention; to pronounce' (म्ना अभ्यासे). **प्रकृति** is 'nature' in the Sankhya-

yoga school. The doctrine of *Prakriti* seems to have been originally the special property of the Sankhya philosophy. Before the evolution of the *cosmos* its constituents सत्व, रजस् and तमस् were in a state of poise, the resultant being marked by uniformity and sameness. सत्वरजस्तमसां साम्यावस्था प्रकृतिः Sam. 1. 61.) These सत्व, रजस्, and तमस् are described as गुणs ; The word गुण in this connection, however, seems to be synonymous with 'substance'. *Vide* comm. on Sam. 1. 61. 'लघुत्वादिगुणयोगात् सत्वादि त्रयं द्रव्यम्'. महत् (the principle of intellect) etc. seven in number are considered to have been formed from प्रकृति. Sixteen other products are enumerated in addition to the seven above. These are the twentyfour categories which together with the twentyfifth category 'the soul (of man)' are the twenty-five तत्वs or principles, which if properly understood lead a man to final emancipation. The founder of this philosophy was Kapila. Though Kapila admits plurality of souls he makes no mention of Brahman or any all-pervading soul. This realistic philosophy came in sharp contrast to the idealistic philosophy of the Vedanta. The result was a mixture of the two. Hence in later Vedanta प्रकृति is regarded as the shadow of Brahman, something illusory (माया). The plurality of souls was as easily adapted by the Vedant philosophy as Prakriti itself. पुरुषार्थप्रवर्तिनीम्, 'operating in the interest of the soul'. Brahman has extended this world of perception everywhere in order that men may realise their true nature and be happier for the same. तद्-दार्शिनमुदासीनम् ... ..पुरुषं, 'the Great Soul viewing nature from on high with unconcern'. उदासीनं combines here both the sense of 'unconcerned' and seated on a lofty seat'. Malli.

paraphrases it by कूटस्थं ; and Ralph T H. Griffith renders the second line thus :—

Hail Thee the stranger spirit, unimpressed,
Gazing on Nature from thy lofty rest.

पुरुषे—In the first line पुरुष signifies 'a human soul' which though identical with the world-soul has not yet realised its true nature. In the second line पुरुष is Brahman.

Trans—(Scriptural texts) pronounce thee as *Prakriti* operating in the interest of the soul; and thee alone they understand as the (Great) Soul viewing nature with unconcern from on high.

अनुवाद—हे भगवन् ऋषि-मुनि आप ही को पुरुष के हित के निमित्त प्रवृत्त हुई प्रकृति मानते हैं और उस प्रकृति के उदासीन द्रष्टा पुरुष भी आप ही को मानते हैं ॥ १३ ॥

त्वं पितॄणामपि पिता देवानामपि देवता ।
परतोऽपि परश्चासि विधाता वेधसामपि ॥ १४ ॥

त्वमिति ॥ हे भगवन् । त्वं **पितॄणाम्** अग्निष्वात्तादीनाम् **अपि पिता** । तेषामपि तर्पणीय इत्यर्थः । **देवानाम** इन्द्रादीनाम् **अपि देवता** । तेषामपि यजनीय इत्यर्थः । **परतोऽपि परश्चासि** । सर्वोत्तरोऽसीत्यर्थः ॥ इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसश्च परा बुद्धिर्बुद्धेरात्मा महांस्ततः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥ इति सर्वोत्तरत्वाभिधानात् ॥ **वेधसां** दक्षादीनाम् **अपि विधाता** स्रष्टा असि ॥

Notes.—पितॄणाम् अपि पिता, 'father of even the manes'. **देवानाम् अपि देवता**, 'god of even the gods' *i. e.* Indra and other gods offer their prayers to thee. **परतोऽपि परः**, 'more removed than the remotest'. Malli. quotes the following : इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसश्च परा बुद्धिर् बुद्धेरात्मा महांस्ततः ॥ महतः परम् अव्यक्तम् अव्यक्तात् पुरुषः परः । पुरुषान् न परं किञ्चत् सा काष्ठा सा परा गतिः ॥ पर 'beyond' governs the abl. परतः is an abl. formed by putting the abl. suffiix

तस् after पर. **विधाता वेधासाम् अपि**, 'the creator of even the progenitors'. *Vide* Manu. 1. 35. मरीचिम् अत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् । प्रचेतसं वसिष्ठं च भृगुं नारदमेव च. Both विधातृ and वेधस् are derived from the root वि √धा 'to create'.

Trans.—Thou art father of even the manes, god of even the gods, more removed than even the remotest, the creator of even the progenitors.

अनुवाद—हे भगवन् आप पितरों के भी पिता हैं, आप देवताओं के भी देवता हैं, आप दूरस्थ वस्तुओं से भी अधिक दूर हैं, और आप प्रजापतियों के भी स्रष्टा हैं ॥ १४ ॥

त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः ।
वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परम् ॥ १५ ॥

त्वमेवेति ॥ शश्वत्सिद्धः शाश्वतः । शाश्विकोऽणप्रत्ययः । यद्यपि कालाट्ठञ् इति ठञपवादः अतएव सूत्रकारस्यापि प्रयोगः—येषां च विरोधः शाश्वतिक इति । तथापि प्रयोगवशात्साधुरिति वामनः । शाश्वत इति प्रयुक्तेः इति । **शाश्वतः त्वमेव** । हूयत इति **हव्यं** हविराज्यादिकम् । जुहोतीति **होता** यजमानः **च असि** । **भोज्यम्** अभ्यवहार्यमन्नम् । भोज्यं भक्ष्ये इति निपातनात्कुत्वाभावः । **भोक्ता** अन्नादः **चासि**। **वेद्यं** साक्षात्कार्यं वस्तु **वेदिता** साक्षात्कर्ता **चासि** । **ध्याता** स्मर्ता च **यत्परं** वस्तु **ध्येयं** तत् **चासि** । साक्षात्कारसाधनभूतप्रत्ययविशेषप्रवाहो ध्यानम् ॥

Notes.—**त्वमेव हव्यं होता च**, 'thou art the priest, thou art his oblation'. Cf. ब्रह्मार्पणं ब्रह्महविर् ब्रह्माग्नौ ब्रह्मणा हुतम् ॥ Bhag. Gita. **भोज्यम् भोक्ता च**, 'thou art food, thou art the eater (of the food)'. Cf. Tait. Up. 3. 10. 6. अहम् अन्न। अहम् अन्नादः 'I am food, I am the eater of the food.' **शाश्वतः**, 'the enternal one'. शाश्वत is to be explained as having been formed, by the suffix अण् from शश्वत् an indec. of time and meaning 'always'. A regular formation is शाश्वतिक Pan. 4. 3. 11. Panini himself uses the regular form.—येषां च विरोधः शाश्वतिकः Pan. 2. 4. 9. But the other form too has the sanction of good usage behind it. **वेद्यं वेदिता च**, 'thou art the known, thou the

knower'. Both the words are formations from √ विद् 'to know.' **ध्याता** 'meditator'. ध्यान is continued contemplation (Pat. 3. 2. तत्र प्रत्ययैकतानता ध्यानम्). The object of meditation is the ध्येय. The style of the slokas 4-15 which embody the gods' prayer is felicitously laconic, incorporating the language of scriptural texts.

Trans.—Thou, the eternal one, art the priest, thou art his oblation; thou art the (holy) feast, thou art the eater (of the feast); thou art knowledge, thou art the knower; thou art the meditator, thou art the supreme object of meditation.

अनुवाद—आप ही आहुति की सामग्री और आप ही होता हैं, आप ही भोजन हैं और आप ही सदा से भोजन के भोग करने वाले हैं, आप ही ज्ञान हैं और आप ही ज्ञाता हैं, आप ही सर्वोत्तम ध्येय वस्तु हैं और आप ही ध्यानकर्ता हैं ॥ १५ ॥

इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥ १६ ॥

इतीति । **वेधाः** ब्रह्मा **इति तेभ्यः** देवेभ्यः । आख्यातोपयोगे इत्यपादानत्वात्पञ्चमी ॥ **यथार्थाः** सत्या अतएव हृदयं गच्छन्तीति **हृदयंगमाः** मनोहराः । खच्प्रकरणे गमेः सुप्युपसंख्यानम् इति खच्प्रत्ययः । अरुर्द्विषदजन्तस्य मुम् इति मुमागमः । **स्तुतीः** स्तोत्राणि **श्रुत्वा प्रसादाभिमुखः** अनुग्रहप्रवणः सन् । **दिवौकसः** देवान् **प्रत्युवाच** ॥

Notes.—**स्तुतीः** f. acc. pl., 'song of praise'. **यथार्थाः**, 'appropriate'. Anal. अर्थम् अनतिक्रम्य वर्तते इति यथार्थम्; यथार्थवर्तनं यासाम् ताः यर्थाथाः (*i.e.* यथार्थ + अच्); द्वितीयायां बहुवचनं यर्थाथाः. **हृदयंगमाः** 'lit. going (straight) to the heart'.; pleasing to the heart'. Anal. हृदयं गच्छति इतीदृशी स्तुतिः हृदयंगमा स्तुतिः, ताः. खच् प्रकरणे गमेः सुप्युपसंख्यानम् (supplementary remark on Pan. 3. 2. 38). There is an augment of the nasal because the suffix खच् has the indicatory letter ख्. **प्रसादाभिमुखः** (*i*) 'inclined to show favour', or (*ii*) 'turning his radiant face'. Anal. (*i*) प्रसादस्य

अभिमुखः; (*ii*) प्रसादेन (*i. e* प्रसन्नत्वेन) अभिमुखः. **दिवौकसः** acc. pl. For derivation *vide supra* sl. 2. 1.

Trans.—Hearing from them (*i. e.* gods) this song of praise, truthful and (therefore) going (straight) to the heart, the creator, looking favourably, spoke in reply as follows.

अनुवाद--उन (देवताओं) से ये यथार्थ और मनोहर स्तुति-वचन सुनकर ब्रह्मा जी देवताओं से प्रसन्न मुख हो इस प्रकार बोले ॥ १६ ॥

अथ कविराह—

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥ १७ ॥

पुराणस्येति ॥ द्रव्यगुणक्रियाजातिभेदेन चत्वारोऽवयवा यस्या इति **चतुष्टयी** चतुर्विधा ॥ संख्याया अवयवे तयप् ॥ इति तयप् । टिड्ढाणञ्द्वयसज्—इत्यादिना ङीप् ॥ **शब्दानां प्रवृत्तिः** वैखरीप्रमुखा वाग्वृत्तिः । उक्तं च-वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा । द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनी ॥ इति । **पुराणस्य** पुरातनस्य ॥ पृषोदरादित्वात्साधुः ॥ **कवेः** कवयितुः **तस्य** ब्रह्मणः (**चतुर्मुखसमीरिता**) चतुर्भिर्मुखैः समीरिता सती । तद्धितार्थ–इत्यादिनोत्तरपदसमासः । समाहारे चतुर्मुखीति स्यात् ॥ **चरितार्था** अन्वर्था **आसीत्** । चतुर्मुखोचारणाचातुर्विध्यं सफलमासीदित्यर्थः ॥

Notes.—**पुराणस्य**, 'of (that) ancient' (minstrel). The word is formed from पुरा 'formerly'. **कवेः**, 'of the minstrel'. The word is derived from √कु 2 P. 'to warble,' and means primarily 'a warbler'. Malli. correctly paraphrases it by कवयितुः. It is to be noted that the thought of the Vedas is handed down to us almost wholly in verse. Brahman, from whose four mouths the Vedas proceeded, is therefore rightly called कविः and पुराणः कविः. **चतुर्मुखसमीरिता**, Malli. points out that we cannot take चतुर् and मुख as forming a द्विगु, for we will in that case have चतुर्मुखी f. He analyses it thus : चतुर्भिर् मुखैः समीरिता, understanding that by the rule तद्धितार्थोत्तरपदसमाहारे च 2. 1. 51. a numerical quantity may stand as the initial

member in a compound to form a *taddhita*. **चतुष्टयी प्रवृत्तिः**, 'the fourfold progression' (of sounds uttered from the mouth). The four stages of a sound uttered from the mouth are (*i*) वैखरी 'articulate utterance,' (*ii*) मध्यमा 'the intermediate (stage)' as speech cutting its way through the air comes to the ear of the listener. (*iii*) पश्यन्ति 'perception' *i. e.* when the listener receives the impression of the speech, and (*iv*) सूक्ष्मा 'subtle' *i. e.* when it is lost in the ethereal region. See the comm. **चरितार्था** 'that has accomplished its end.'

Trans.—The fourfold progression of speech which came from the four mouths of that ancient minstrel was a (signal) success.

अनुवाद—उस प्रचीन कवि के चार मुखों से निकल रहा (द्रव्य, गुण, क्रिया और जाति के भेद से) चार प्रकार के शब्दों का प्रवाह सफल हुआ ॥ १७ ॥

भगवानाह—

स्वागतं स्वानधीकारान्प्रभावैरवलम्ब्य वः ।
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ॥ १८ ॥

स्वागतमिति ॥ हे **प्राज्यविक्रमाः** प्रभूतपरक्रमा देवाः ॥ प्राज्यं भूरि प्रभूतं च इति यादवः । **स्वान्** स्वकीयान् (**अधीकारान्**)नियोगान् ॥ उपसर्गस्य घञि—इति वा दीर्घः ॥ **प्रभावैः** सामर्थ्यैः **अवलम्ब्य** आस्थाय । यथाधिकारं स्थित्वापीत्यर्थः । **युगपत्** समकालं **प्राप्तेभ्यः** । युगपत्प्राप्त्या महत्कार्यमनुमीयते इति भावः । **युगबाहुभ्यः** । दीर्घबाहुभ्य इत्यर्थः । आजानुबाहुत्वं भाग्यलक्षणम् । **वः** युष्मभ्यम् । बहुवचनस्य वस्नसौ इति वसादेशः । कर्मणा यमभिप्रैति इत्यत्र कर्मपदेन क्रियाग्रहणात्संप्रदानत्वम् ॥ **स्वागतं** शोभमानमागमनम् । काकुरत्रानुसन्धेया ॥

Notes—**स्वागतं**, 'welcome'. **अधीकार**, the same as अधिकार 'post of authority; sovereignty'. Prepositions are seen optionally lengthening the quantity of their final vowels in certain formations *e. g.* प्रतिघात (also प्रती—), प्रतिकार (प्रति—), etc. **युगपत्**, 'simultaneously' *i. e.* in a body. **युगबाहुभ्यः**, '(to you) who have arms

like the yoke-pole (of a cart or chariot), *i. e.* who are long-armed'. Arms reaching as far down as the knees indicate sovereign power and prosperity. **प्राज्यविक्रमाः**, m. voc. pl. 'possessing great power'. The matter must needs be serious to the extreme, inasmuch as mighty gods possessed of great valour have approached me with fallen countenances. As Brahman reflects so, he cannot help expressing his anxiety by his changed voice.

Trans.—Welcome! glad welcome to you, (O gods) of mighty power, (to you) who are possessed of long arms, who hold your sovereignties by your puissance, (and yet) who have approached me in a body (so woefully).

अनुवाद—बहुबाहुबल-सम्पन्न देवताओ, अपने राज्यों में शक्ति से शासन करते हुए और जुए के समान दीर्घ बाहें रखते हुए तुम जो मेरे पास आये हो तुम को (मेरी ओर से) स्वागत हो ॥ १८ ॥

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा ।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥ १९ ॥

किमिति ॥ वत्सा: इत्युत्तरश्लोकीयं (श्लो० २८) संबोधनमत्राप्यनुषञ्जनीयम् । हे **वत्सा:** पुत्रकाः । (**हिमक्लिष्टप्रकाशानि**) हिमेन नीहारेण क्लिष्टप्रकाशानि मन्दप्रभाणि **ज्योतींषि** नक्षत्राणि **इव** ॥ दीप्तिताराहुताशेषु ज्योतिः इति शाश्वतः ॥ वः युष्माकं **मुखानि पुरा यथा** पूर्वमिव **आत्मीयां द्युतिं न बिभ्रति** । **इदं किम्** । किंनिबन्धनमित्यर्थः । किमिदमित्यनेन वाक्यार्थः परामृश्यते ॥

Notes.—**द्युतिम् आत्मीयां न बिभ्रति**, 'do not bear their native lustre'. बिभ्रति is लट् 3rd per. plu. from √भृ 3. U. 'to bear, to carry'. (बिभर्ति, बिभृतः, बिभ्रति—3rd. per. sing., d., and plu.). **आत्मीयां**, is आत्मनः इमाम् (suffix छ). **हिमक्लिष्टप्रकाशानि**, n. nom. plu. qualifies, **ज्योतींषि** (light of the heavens, stars) 'with their brightness dimmed by mist'. Anal. क्लिष्टः प्रकाशः यस्य तत् क्लिष्टप्रकाशं ज्योतिः,

तानि क्लिष्टप्रकाशानि; हिमेन क्लिष्टप्रकाशानि हिमक्लिष्टप्रकाशानि (ज्योतींषि). The simile is very apt.

Trans — Why is it that your countenances no longer bear their native lustre as formerly like lights of the heavens when their gleam is obscured by mist ?

अनुवाद—क्या बात है कि धुन्द आ जाने से मन्दप्रकाश नक्षत्रों के समान तुम्हारे मुखों पर पूर्व की भांति तेज नहीं रहा ॥ १६ ॥

उक्तमेव प्रपञ्चयति सप्तभिः श्लोकैः—

प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम् ।
वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते ॥ २० ॥

प्रशमादिति ॥ **अर्चिषां** तेजसां **प्रशमात्** निर्वाणाद **अनुद्गीर्णसुरायुधम्** अनुदितचित्रप्रभमित्यर्थः । **एतद् वृत्रस्य हन्तुः** इन्द्रस्य **कुलिशं** वज्रम् । कुण्ठिताः अश्रयो यस्य तत् **कुण्ठिताश्रि** कुण्ठितकोटि **इव लक्ष्यते** दृश्यते ॥

Notes.—प्रशमात् अर्चिषाम्, 'on account of the loss of (its) glitter'. अर्चिस् originally neu, later also fem., means 'a beam, a flame'. अनुद्गीर्णसुरायुधम्, n. nom. sing. qualifies कुलिशम् (Indra's thunderbolt) 'with its variety of colours undisplayed.' The phrase is, in some measure, difficult. उद् √गॄ 'to vomit; to emit' is seen used in connection with 'colour, lustre, etc'. Vide sl. 1. 33. रागम् इवोद्गिरन्तौ. सुरायुधम् means 'a rainbow considered as the weapons of gods; secondarily, the *colours* of a rainbow' and perhaps paraphrases स्फुरत्प्रभामण्डलम् of Ragh. 3. 60. Doubtless अनुद्गीर्णसुरायुधम् cannot be the description of Indra's bow, described in Ragh. 3. 53. नवाम्बुदानीकमुहूर्तलाञ्छने धनुष्यमोघं समधत्त सायकम्. since, as Malli. rightly understands, it qualifies **कुलिशं. वृत्रस्य हन्तुः**, 'of Indra. (Lit. of the slayer of वृत्र)'. वृत्र is the demon of cloudy darkness and is described as having the form of a serpent and stretching over the entire earth. यनो ह वा ऽइदᳩ

सत्रं वृत्वा शिश्ये । यादिदम् अन्तरेण द्यावापृथ्वी स यदिद ७ सर्वं वृत्वा शिश्ये तस्माद् वृत्रो नाम । श० १ । २ । ३ । ४ ॥ The demon was killed by Indra. Cf. Rig. 3. 3. 33. इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् । "Of the individual atmospheric demons by far the most important and the most frequently mentioned is Vritra, who is the chief adversary of Indra and for whose slaughter that deity is said to have been born or grown (8, 78[5], 10, 5[5]). Hence the most distinctive epithet of Indra is Vritrahan, 'Vritra-slayer'." (Mac. Ved. Myth. 68.). कुण्ठताश्रि n. nom. sing. qualifies कुलिशं and means 'with its edge dulled'. Anal. कुण्ठता: अश्रयो (अश्रि f. 'edge, corner') यस्य, तत्.

Trans.—Of the slayer of Vritra, the thunder-bolt with its variety of colours undisplayed because of the disappearance of its dazzle, looks as if its edges are dulled.

अनुवाद—वृत्र का वध करने वाले (इन्द्र) का वज्र तेज के नष्ट हो जाने से अब नाना प्रकार के प्रकाश नहीं दिखाता । इस से ज्ञात होता है कि इस का फल कुण्ठित हो गया है ॥ २० ॥

किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः ।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥ २१ ॥

किं चेति ॥ **किं च अयम् अरिदुर्वारः** रिपुदुष्प्रधर्षः **प्रचेतसः** वरुणस्य । प्रचेता वरुणः पाशी इत्यमरः ॥ **पाणौ पाशः** रज्ज्वायुधविशेषः । **मन्त्रेण** गारुडेन **हतवीर्यस्य** प्रतिबद्धशक्तेः **फणिनः** सर्पस्य **दैन्यं** शोच्यत्वम् **आश्रितः** ॥ अत्र फणिनिष्ठदैन्यस्य पाशेऽसंभवाद्दैन्यमिव दैन्यमिति कल्पनादसंभवद्वस्तुसंबन्धो निदर्शनालंकारः ॥

Notes—**किं च**. Brahman is obviously distressed at the impotence to which the gods, Varuna among them, have been reduced by the oppressive tyranny of Taraka. **अरिदुर्वारः**, 'irresistible by the enemies.' Anal.

दुःखेनवार्यते (is repelled, as attack etc.) इति दुस् + वृ + णिच + खल् Pan. 3. 3. 126. अरिभिर् दुर्वारः इति अरिदुर्वारः. प्रचेतस्, 'god Varuna.' Lit. 'knowing, wise.' Varuna is the regent of the ocean and of the western quarter. He is represented with a noose in his hand. The character of the Vedic god has more of dignity and sovereignty about it. हतवीर्यस्य, 'whose power has been crushed by an incantation.' Anal. हतं वीर्यं यस्य तस्य. फणिन्, 'a serpent' is formed from फण 'a hood', as from भोग 'a hood' we get भोगिन् 'a serpent.' दैन्यम् is abstr. from दीन 'wretched, miserable.'

Trans.– O what (a fall), that this noose in the hand of Varuna which was wont to be irresistible by the enemy, has been reduced to the pitiable state of a serpent whose power has been controlled by an incantation.

अनुवाद—और देखो वरुण के हाथ में जो पाश (पं० फाही) है और जिस का वार शत्रु से पहले कभी नहीं रुका अब मन्त्रद्वारा नष्ट हुए बल वाले फणियर सांप की नाईं शोच्यावस्था को प्राप्त हुआ है ॥ २१ ॥

कुबेरस्य मनःशल्यं शंसतीव पराभवम् ।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः ॥ २२ ॥

कुबेरस्येति ॥ अपविद्धा त्यक्ता गदा येन सः **अपविद्धगदः** । अतएव **भग्नशाखः द्रुम इव** स्थितः **कुबेरस्य बाहुः मनःशल्यम्** । दुःखहेतुत्वान्मनसः शल्यप्रायमित्यर्थः । **पराभवम्** शत्रुकृतमिति शेषः **शंसतीव** कथयतीव । लक्षणयानुमापयतीत्यर्थः ॥ बाहौ मुख्यकथनस्यासंभवादिवशब्दोऽप्यत एव ॥

Notes.—**कुबेरस्य**. Kubera, in later mythology, is the god of riches. He is the regent of the northern quarter, the lord of the Yakshas and Kinnaras and a friend of Rudra. His abode is Kailasa. **मनःशल्यं**, lit. 'a shaft in the heart' and the sentence **मनःशल्यं पराभवं शंसति इव** may be translated 'proclaims, as it were, his discomfiture

piercing his heart deeply'. **अपविद्धगदः** 'by which the mace has been put aside.' Anal अपविद्धा गदा येन सः अपविद्धगदः बाहुः. **भग्नशाखः**, 'of which the branches have been lopped off' qualifies द्रुमः 'a tree'. Anal. भग्नाः शाखाः यस्य सः॥

Trans.—The arm of Kubera which has laid aside the mace (*i. e.* which no more wields the mace) and which, therefore, appears like a tree with its branches lopped off, proclaims, as if it were, his discomfiture which sticks his heart like a dart.

अनुवाद—कुबेर की बांह जो गदा त्याग चुकी है और जो अब टूटी हुई शाखों वाले वृक्ष के सदृश है मानो उसके मन पर बरछी की तरह लगने वाली (शत्रुओं के हाथों) पराजय को कह रही है ॥ २२

यमोऽपि विलिखन्भूमिं दण्डेनास्तमितत्विषा ।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम् ॥ २३ ॥

यम इति ॥ (**अस्तमितात्विषा**)अस्तं नाशमितः प्राप्तः ॥ अस्तमिति मकारान्तमव्ययम । तस्य द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इति समासः । अस्तमितास्त्विषो यस्य तेन निस्तेजस्केन **दण्डेन यमोऽपि भूमिं विलिखन् अमोघेऽपि**। प्रागिति भावः **अस्मिन्** दण्डे (**निर्वाणालातलाघवम्**) निर्वाणालातस्य शान्तोल्मुकस्य । अलातं नाम भूलेखनशलाका तस्य यल्लाघवं क्लैब्यं तत् **कुरुते** ॥ अलातमुल्मुकं ज्ञेयम् इति हलायुधः । निर्वाणोऽवाते इति निपातनान्निष्ठानत्वम् ॥ अत्रापि लाघवमिव लाघवमिति कल्पनान्निदर्शनालंकारः ॥

Notes.—**यम**, is the god of death, dispensing justice to the souls who have left off behind their mortal coil. He is, therefore, known also as धर्मराज 'the Lord of Justice'; and holds a sceptre in his hand. He is the regent of the southern quarter. **अस्तामितात्विषा**, m. instr. sing. 'whose flaming lustre has disappeared.' Anal. अस्तम् (an indec.) इतः इति अस्तमितः ;अस्तामिता : त्विषः (त्विष् f. 'light, lustre, flash') यस्य, तेन (दण्डेन). **अमोघे ऽपि** 'though unfailing in its effect (formerly)'. The idea is that the effect of **the rod of the god of death which know no failure before**

has been opposed successfully by Taraka. Taraka defies death. निर्वाणालातलाघवम्, 'the worthlessness of a quenched brand.' The meaning of the sentence is that Yama treats his rod now as a quenched brand, no more serving his purpose and quite worthless. निर्वाण, 'quenched, extinguished.' It is a derivative from the root वा preceded by the prep. निस् in the sense of, 'extinguished (fire etc.); liberated from mundane existence (a sage etc.)' निर्वाणोऽग्निर् मुनिश्च Siddh. K. on Pan 8. 2. 50 निर्वाणोऽवाते. Otherwise we have निर्वात. लाघवम्, abstr. from लघु

Trans.—Even Yama, scratching the ground with his mace from which the flaming lustre has departed, sees in it, though an effective (weapon once), (only) the worthlessness of a quenched brand.

अनुवाद—यम भी जिसे पहले सदैव सफलता प्राप्त थी अब वही तेज रहित दण्ड भूमि पर रगड़ कर यह दर्शा रहा है कि अब उस का बुझी हुई लकड़ी से अधिक गौरव नहीं है ॥ २३ ॥

अमी च कथमादित्याः प्रतापक्षतिशीतलाः ।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥ २४ ॥

अमी इति ॥ (**प्रतापक्षतिशीतलाः**) प्रतापक्षत्या तेजसां क्षयेण शीतलाः **अमी आदित्याश्च** । द्वादशेति शेषः । **कथम्** । केन हेतुनेत्यर्थः । **चित्रन्यस्ताः** चित्रलिखिताः **इव** । (**प्रकामालोकनीयताम्**) प्रकाममत्यन्तमालोकनीयतां दृश्यतां **गताः** प्राप्ताः ॥

Notes.—**अमी**, 'those'. Nom. plu. from अदस्. Brahman points to the Adityas, who were seated at some distance from him. **आदित्याः**,—Sons of अदिति and काश्यप. Adityas are twelve in number, one to a month. They seem to be the personifications of the Sun as it moves through the twelve zodiacal signs in the course

of a twelvemonth. प्रतापच्चतिशीतलाः, 'become cold through loss of heat.' Anal. प्रतापस्य च्युतिः (loss) प्रतापच्युतिः तया शीतलाः. चित्रन्यस्ताः, 'drawn in a picture'. Anal. चित्रे न्यस्ताः इति. प्रकामालोकनीयताम्, 'to the condition of being seen at will.' The idea is that Adityas are shorn of all splendour and anybody may gaze at them. The evident conclusion is that some serious trouble has befallen them.

Trans.—Oh how those Adityas, become cold through loss of heat, have come to being gazed at will like so many forms drawn in a picture.

अनुवाद—ज्योति के क्षीण होने से शीतल हुए ये आदित्य चित्र में खींचे हुए की नाईं दीखते है। इन्हें अब हर कोई अपनी इच्छानुसार देख सकता है ! हा ! इन की कैसी दुर्दशा हुई है ॥ २४ ॥

पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते।
अम्भसामोघसंरोधः प्रतीपगमनादिव ॥ २५ ॥

पर्याकुलेति ॥ **मरुतां** वायूनाम् । सप्तसप्तानामिति शेषः । **पर्याकुलत्वात्** स्खलितगतित्वाद्धेतोः (**वेगभङ्गः**) वेगस्य भङ्गो **अम्भसां** जलानां **प्रतीपगमनात्** उत्तानावरोहादित्यर्थः । (**ओघसंरोधः**) ओघस्य संरोधः प्रवाहप्रतिबन्धः **इव** **अनुमीयते** ॥

Notes.—पर्याकुलत्वं, 'state of irregular, uneven flowing (of the currents of air).' मरुत्s are wind-gods, forty-nine in number. ओघसंरोधः, 'obstruction to (their) current.' Anal. ओघस्य (of the current) संरोधः, (obstruction) इति. प्रतीपगमनात्, 'from their flow in a contrary direction.' It is easy to see that when waters have a backward flow there must be some rock or some barrier blocking the current of the waters. प्रतीप, 'against the current.' Anal. प्रति+ अप् (water) अ suffix. Pan 5. 4. 74.

Trans.—The break in the swell of the breezes may be inferred from their faltering motion as is obstruction in their current inferred from refluence of waters.

अनुवाद—हवाओं के अनियम प्रवाह से उन की गति के टूटने का अनुमान होता है जिस प्रकार (नदी के) जलों के उलटा बहने से उन के प्रवाह में रुकावट का ज्ञान होता है ॥ २५ ॥

आवर्जितजटामौलिविलम्बिशशिकोटयः ।
रुद्राणामपि मूर्धानः क्षतहुङ्कारशंसिनः ॥ २६ ॥

आवर्जितेति ॥ (**आवर्जितजटामौलिविलम्बिशशिकोटयः**) आवर्जितेषु परिभवदुःखावनत्रेषु जटानां मौलिषु जटाजूटेषु विलम्बिन्यः स्रंसिन्यः शशिकोटयश्चन्द्ररेखा येषां ते तथोक्ताः । **रुद्राणामपि** । एकादशानामिति शेषः । **मूर्धानः** (**क्षतहुङ्कारशंसिनः**) क्षतं हुङ्कारं शंसन्तीति तथोक्ताः । हुङ्कारक्षत्यनुमापका इत्यर्थः । हुङ्कारशस्त्रा हि रुद्रा इति भावः ॥

Notes.—**आवर्जित... कोटयः**, qualifies **मूर्धानः** (nom. pl. from मूर्धन् m., 'heads') 'with curved lunar digits hanging from the ends of locks of hair'. Anal. जटानाम् मौलयः (locks of hair) जटामौलयः. आवर्जिताः (dropping down on account of feeling the indignity of defeat) जटामौलयः आवर्जितजटामौलयः; तेषु विलम्बिन्यः शशिकोटयः येषां, ते. **रुद्राणाम्**—Rudras were a group of gods, eleven in number. Their look was very fierce, and they frightened away their foe by their terrible form and their more terrible growl, 'hum'. This guttural growl was their weapon in warfare. They are supposed to be the inferior manifestations of शिव, who is their chief. In Brahmana texts we find the *eleven Rudras* interpreted as *the mind* (मनस्) *and* the *ten vital breaths* (प्राण *etc.*). **क्षतहुङ्कारशंसिनः**, 'indicative of their baffled *hum*'. Anal. क्षतं हुङ्कारं शंसन्ति इति.

Trans.—The heads of the Rudras with curved lunar digits falling from the ends of matted hair

hanging down (through sense of defeat) are expressive of their unavailing *hum*.

अनुवाद—(ग्यारह) रुद्रों के भी सिर जिन की जटाओं से चांद की कलायें ढीली लटक रही है बताते हैं कि (अब उन के) हुंकारों की शक्ति मारी गयी है ॥ २६ ॥

लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः ।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ॥ २७ ॥

लब्धेति ॥ **प्रथमं** पूर्वं **लब्धप्रतिष्ठाः** लब्धस्थितयः । लब्धावकाशा इत्यन्यत्र । **यूयं बलवत्तरैः** पौरुषातिरेकात्प्रबलतरैः । निरवकाशैरित्यपरत्र । **परैः** शत्रुभिः । **उत्सर्गाः** सामान्यशास्त्राणि मा हिंस्यात् इत्येवमादीनि । अपोद्यन्त एभिरिति **अपवादैः** गामालभेत इत्यादिभिर्विशेषशास्त्रैः **इव किं कृतव्यावृत्तयः** कृतप्रतिष्ठाभङ्गाः । कृतविषयसङ्कोचरूपबाधा इत्यन्यत्र । विषयसङ्कोच एव बाधः इत्याचार्याः । निषेधशास्त्रस्य वैदिकहिंसापरिहारेण लौकिकमात्रे व्यवस्थापनाद्विषयसङ्कोच इत्यलमतिगहनावगाहनने ॥

Notes.—लब्धप्रतिष्ठाः, 'who had secured glory and power' (in reference to the *gods*); 'which had applicability' (in reference to the *general rules*). Anal. लब्धा प्रतिष्ठा यैः, ते (bahu.) **अपवादैः** 'by special texts'. The authority of the decree of a special text may be seen from the following grammatical illustration. ऋहलोर ण्यत् Pan. 3. 1. 124 'After roots ending in ऋ or a consonant (हल्) comes the suffix ण्यत् *i. e.* suffix य along with the vriddhi of final ऋ or penultimate अ'. This is a general rule as far as roots ending in ऋ or a consonant are concerned. Ex. कार्यम्, पाठ्यम् etc. पोरदुपधात् (यत्) Pan. 3. 1. 98. 'After roots ending in a labial consonant having अ for its penultimate letter comes the suffix (यत्)'. Ex. शप्यम्, (and not शाप्यम्), लभ्यम् (and not लाभ्यम्). Clearly Pan. 3. 1. 98. sets aside the decree of Pan. 3. 1. 124. and is, therefore, an अपवाद of the latter. **बलवत्तरैः**. Mark the use of the comparative. **कृतव्यावृत्तयः**

—anal. कृता व्यावृत्तिः ('expulsion' in reference to *gods*; 'restriction' in reference to *general rules*) येषां ते.

Trans—Have you who have established your power from very ancient times been ousted (from authority) by your stronger enemies as limitation is put by special texts to the authority of general laws?

अनुवाद—क्या प्राचीन काल से प्रतिष्ठा प्राप्त किये तुम देवताओं की अधिक बली शत्रुओं ने (इस प्रकार) प्रतिष्ठा भङ्ग की है जिस प्रकार उत्सर्गनियम अपवाद नियमों की प्राप्ति बन्द कर देते हैं? ॥ २७ ॥

तद्ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः ।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥ २८ ॥

तदिति ॥ **तत्** तस्मात्कारणात् । हे **वत्साः** पुत्रकाः । वत्सस्त्वर्भकपुत्राद्योर्वर्षे वत्सं तु वक्षसि । इति विश्वः ॥ स्वयं पितामहत्वाद्वत्सा इत्यामन्त्रयते । संभूयागताः **समागताः इतः मतः किं प्रार्थयध्वम्** । किमिच्छतेत्यर्थः । **ब्रूत** । लोकरक्षणे यूयमेव कर्तार इत्याह–**मयि लोकानां सृष्टिः रक्षा युष्मासु अवस्थिता** । अतस्तदर्थमपि नास्ति मदपेक्षेत्यर्थः ॥

Notes.—**वत्साः**, is used as a term of endearment and affection. As in Panj. काका. **इतः**, hence *i. e.* from *me*. **प्रार्थयध्वम्**,—The other reading प्रार्थयध्वे seems to be better. **अवस्थिता** (**अस्ति**), 'lies, rests'.

Trans.—Then say, my sons, what you, who have come in a body, seek from hence. (The work of) creating the worlds lies with me, and the protection of them with you.

आनुवाद—(यदि यह बात है) तो हे बच्चा बताओ कि तुम जो यहां इकट्ठे हो कर आये हो मुझ से क्या मांगते हो, क्योंकि सृष्टि को उत्पन्न करना मेरा काम है और लोकों की रक्षा करना तुम्हारा काम है ॥ २८ ॥

ततो मन्दानिलोद्धूतकमलाकरशोभिना ।
गुरुं नेत्रसहस्रेण नोदयामास वासवः ॥ २९ ॥

तत इति ॥ **ततः** भगवत्प्रश्नानन्तरं **वासवः** इन्द्रः **गुरुं** बृहस्पतिम् ॥ गुरु

गीष्पतिपित्र्याग्रौ इत्यमरः । (**मन्दानिलोद्धूतकमलाकरशोभिना**) मन्दानिलोद्धूतो यः कमलाकरः स इव शोभत इति तेन तथोक्तेन (**नेत्रसहस्रेण**) नेत्राणां सहस्रेण **नोदयामास** प्रेरयामास । सहस्रग्रहणमास्थातिशयार्थम् । अनिमेषाणामपि प्रयत्नवशादक्षिस्पन्दो न विरुद्धयते ॥

Notes.—**मन्दानिलोद्धूत...शोभिना,** 'beautiful like a bed of lotuses moved by a gentle breath'. Anal. मन्दः अनिलः (breeze) मन्दानिलः, मन्दनिलेन उद्धूतः मन्दानिलोद्धूतः (तृतीया तत्०) कमला नाम् आकरः (plenty) कमलाकरः (षष्ठी तत् ०); मन्दानिलोद्धूतश्चासौ कमलाकरश्चेति मन्दानिलोद्धूतकमलाकरः (कर्मधा ०); स इव शोभित यत् (नेत्रसहस्रं) तन् मन्दानिलो...शोभि, तेन. **गुरुं** 'the preceptor (of the gods), Brihaspati'. **नेत्रसहस्रेण,** 'with his thousand eyes.' *Vide* infra 3. 1. सहस्रम् अक्ष्णाम्. **नोदयामास,** periphrastic perfect 3rd per. sing. from the causal of नुद् 'to urge'. **वासवः** 'Indra'. He is often referred to as the lord of wealth in the Rigveda. Cf. वसुपतिर् वसूनां Rig. 4. 17. 6.

Trans.—Then Indra urged Brihaspati (to speak on behalf of the gods) with (the twitch of) his thousand eyes glancing beautifully like a bed of lotuses touched by a gentle breeze.

अनुवाद—तब मन्द पवन में खेल रहे कमलों के समूह के समान शोभित अपने सहस्र नेत्रों से इन्द्र ने बृहस्पति को बोलने की प्रेरना की ॥ २९ ॥

स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम् ॥
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ॥ ३० ॥

स इति ॥ **हरेः** इन्द्रस्य इन्द्रो दुश्च्यवनो हरिः इति हलायुधः ॥ सहस्रान्नयनेभ्योऽधिकं **सहस्रनयनाधिकम्** । तदगोचरदर्शित्वादिति भावः । द्वे नेत्रे यस्य तद् **द्विनेत्रम्** । प्रसिद्धाच्चक्षुषोऽयं विशेष इत्यर्थः । **चक्षुः** चक्षुर्भूतः । चक्षुरारोपस्य प्रकृतोपयोगात्परिणामालंकारः ॥ **स वाचस्पतिः** ॥ कस्कादित्वादलुक्सत्वे ॥ षष्ठ्याः पतिपुत्र—इत्यादिना सत्वमिति स्वामी तन्न छन्दोविषयत्वात् ॥ **प्राञ्जलिः** सन् । **जलजासनं** ब्रह्माणम् **इदमुवाच** ॥

Notes.—**द्विनेत्रं, हरेश्चक्षुः** 'the two-sighted eye of Indra'. The eye ordinarily has the power to see

the exterior of things. But Brihaspati had also second sight. He could read the interior of things. Hence he was Indra's guide in all matters of importance. **द्विनेत्रं**,—द्वे नेत्रे (faculties of seeing) यस्य, तत् (चक्षुः). **चक्षुः**, 'the organ or instrument of seeing things. **वाचस्पतिः**, 'lord of speech, master of language', an epithet especially of Brihaspati. The compound, however, does not drop the termination. Furthermore, we have स् as the result of the conjunction of the component words of the compound. Both the phenomena are explained by Malli. by reading the compound in the कस्कादि group. **जलजासनम्**, 'to the lotus-throned god'. Anal. जलजम् (a lotus) आसनम् यस्य सः जलजासनः, तम्.

Trans.—That Brihaspati, the *two-sighted* eye of Indra, more (serviceable) than his own thousand eyes, spoke, folding his hands, to the lotus-throned god (*i. e.* Brahman) thus :—

अनुवाद—इन्द्र की अपनी हजार आंखों से भी अधिक मूल्यवान् दो नेत्रों वाला चक्षुः वह वाचस्पति बृहस्पति हाथ जोड़ कर ब्रह्मा से इस प्रकार बोले ॥ ३० ॥

एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥ ३१ ॥

एवमिति ॥ हे **भगवन्** षड्गुणैश्वर्यसंपन्न । **यदात्थ** कृतव्यावृत्तयः परैः (२।२७) इति यद्ब्रवीषि ॥ ब्रुवः पञ्चानाम्—इत्यादिनाहादेशः । वर्तमानसामीप्ये वर्तमानवद्वा इति वर्तमानप्रयोगः । वामनस्तु भ्रान्तोऽयं प्रयोग इत्याह । आहेति भूते णलन्तभ्रमवदिति । आहेत्युपलक्षणम् ॥ तद **एवं** सत्यम् । **नः** अस्माकं **पदम्** अधिकारः **परैः** शत्रुभिः **आमृष्टम्** आक्षिप्तम् । हे प्रभो **प्रत्येकं** प्रतिपुरुषं **विनियुक्तात्मा** प्रवेशितस्वरूपः । सर्वान्तर्यामीत्यर्थः । **कथं न ज्ञास्यसि** न वेत्सि । वर्तमानेऽपि वचनभङ्ग्या भविष्यन्निर्देशः प्रसिद्धः ॥ अपह्नवे ज्ञः । अकर्मकाच्च इत्यात्मनेपदविकल्पः ॥

Notes.—**आमृष्टं**, 'attacked, usurped, from आ √मृश्. **विनियुक्तात्मा**, '(thou) whose soul pervades (every being)'. Anal. विनियुक्तः आत्मा यस्य.

Trans.—O mighty being, what thou sayest is true. Our power has been usurped by our enemies. O lord, how shouldst thou not know it, when thy soul moves in us all?

अनुवाद—हे भगवन् आपने जैसे कहा है ठीक वैसे ही है। हमारे अधिकार पर शत्रुओं ने आक्रमण किया हुआ है। हे प्रभो आप का आत्मा हम सब के अंदर है आप को सब कुछ कैसे ज्ञात न हो ॥ ३१ ॥

उक्तमेव प्रपञ्चयति—

भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥ ३२ ॥

भवदिति ॥ (**भवल्लब्धवरोदीर्णः**) भवतस्त्वत्तो लब्धेन वरेणोदीर्ण उद्धतः। तारक इत्याख्या नामधेयं यस्य स **तारकाख्यः**। महानसुरो **महासुरः**। सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः इति तत्पुरुषः। **धूमकेतुः** उत्पातविशेषः **इव लोकानाम् उपप्लवाय** उपद्रवाय **उत्थितः** उत्पन्नः ॥

Notes.—**भवल्लब्धवरोदीर्णः**, 'elated with the boon obtained from thee'. Anal. भवतः लब्धः भवल्लब्धः (सुप्सुपा); भवल्लब्धः वरः भवल्लब्धवरः (कर्मधा०); तेन उदीर्णः (puffed up, elated) भव०. **तारकाख्यः**, 'named Taraka'. Anal. तारक इति आख्या (name) यस्य. **धूमकेतुः**, 'a comet'. The sight of a comet is popularly supposed to spread destruction everywhere.

Trans.—A mighty demon, Taraka by name, elated with the boon obtained from thee, has shot up like some (dire) comet (across the heavens) to oppress the worlds.

अनुवाद—आप से प्राप्त किये हुए वर से फूला हुआ तारक नाम का महान् असुर धूमकेतु की नाईं सृष्टि को अतीव क्लेश देने के लिये उठा हुआ है ३२ ॥

पुरे तावन्तमेवास्य तनोति रविरातपम् ।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ३३ ॥

पुर इति ॥ **अस्य** तारकस्य **पुरे** रविः सूर्यः **तावन्तं** तावन्मात्रम् **एव आतपं तनोति** [illegible] यावदेव। यावती मात्रा मितिर्यस्य यावन्मात्रं तेन

वा। अल्पपरिमाणेनेत्यर्थः ॥ मात्रा परिच्छेदे । अल्पे च परिमाणेस्यान्मात्रं कात्स्न्येंऽवधारणे ॥ इत्यमरः ॥ (**दीर्घिकाकमलोन्मेषः**) दीर्घिकासु क्रीडावापीषु कमलानामुन्मेषो विकाशः **साध्यते** निष्पाद्यते । कठोरकिरणोऽपि मन्दोष्णः सन्नेव तद्भीत्या पुरे प्रकाशते इत्यभिप्रायः ॥

Notes.—**तावन्तम्**, 'that much'; m. acc. sing. from तावत् 'to that *extent* or *magnitude*'. Similarly यावत् and एतावत्. Pan. 5. 2. 39. यत्तदेतेभ्यः परिमाणे वतुप्. **दीर्घिकाकमलोन्मेषः**, 'the wakening (from their slumber) of the lotuses in his lakes'. Anal. दीर्घिकानां कमलानि दीर्घिकाकमलानि; तेषाम् उन्मेषः (wakening; blooming, opening). **यावन्मात्रेण**, 'by just as much'. Anal. यावान् एव यावन्मात्रं, तेन. —मात्र here simply ephasises the word and corresponds to एव in the first line. वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम्, a supplementary remark on Pan. 5. 2. 37. The simple meaning of the lines is that the sun fears to shine there in all his glory.

Trans.—*The sun* extends only that much of sunshine to his palatial residence which barely suffices to waken the lotuses in his lakes (from their slumber).

अनुवाद—उस की पुरी में सूर्य्य देवता उतना ही प्रकाश भेजता है जितने से उस की झीलों के कमल खिल जायें ॥ ३३ ॥

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते।
नादत्ते केवलां लेखां हरचूडामणीकृताम् ॥ ३४ ॥

सर्वाभिरिति ॥ **चन्द्रः तं** तारकं **सर्वदा** । कृष्णपक्षेऽपीत्यर्थः । **सर्वाभिः कलाभिः निषेवते** । कला तु षोडशो भागः इत्यमरः ॥ **केवलां हरचूडामणीकृतां** शिवशिरोमणीकृतां **लेखां न आदत्ते** गृह्णाति ॥

Notes.—**सर्वदा**, 'always' *i. e.* during the dark half as well. **निषेवते**, 'serves, waits upon'. After परि, नि, and वि √सेव् changes its initial स् to ष्, Pan. 8. 3. 70. **आदत्ते**, from आ √दा 'to take'. Taraka denied himself

the pleasure of the moonshine of only Siva's digit and that because the Trident-holder was the favourite diety of the demons. हरचूडामणीकृताम्,—a *chvi* formation.

Trans.—*The moon* waits upon him at all times with all his digits ; only he does not take the digit that forms the crest-jewel of Siva's head.

अनुवाद—चन्द्र देवता (शुक्ल और कृष्ण दोनों पक्षों में) सदा अपनी सब कलाओं से उस की सेवा करता है । वह केवल शिवजी महाराज की शिरोभूषण बनी कला का ग्रहण नहीं करता ॥ ३४ ॥

व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् ।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम् ॥ ३५ ॥

व्यावृत्तेति ॥ **वायुः (कुसुमस्तेयसाध्वसात्)** स्तेनस्य भावः कर्म वा स्तेयं चौर्यम् ॥ स्तेनाद्यन्नलोपश्च इति यत्प्रत्ययो नलोपश्च ॥ कुसुमानां स्तेयं तस्मात्स्तेयाभियोगाद्दण्डाद्वा साध्वसं भयं तस्माद्धेतोः **उद्याने व्यावृत्तगतिः** निवृत्तोद्यानसंचारः सन्नित्यर्थः ॥ सापेक्षत्वेऽपि गमकत्वात्समासः ॥ **तत्पार्श्वे** तत्समीपे । **(तालवृन्तानिलाधिकम्)** तालस्य वृन्तैरुद्बध्यते । तालस्येव वृन्तमस्येति वा तालवृन्तं तस्यानिलाद्व्यजनसंचारपवनादधिकं यथा तथा **न वाति** ॥ व्यजनं तालवृन्तकम् इत्यमरः ॥

Notes.—**व्यावृत्तगतिः**, qualifies वायुः (wind) 'with is motion suspended'. Anal. व्यावृत्ता गतिर् यस्य सः. **कुसुमस्तेयसाध्वसात्**, 'from fear of (being punished for) stealing blossoms'. For anal. see the comm. **तालवृन्त,** is properly speaking 'a fan made of palm-leaves'.

Trans.—Come to dead stop in his garden for fear of stealing blossoms (therefrom), *wind* blows about him no more strongly than a breath from a fan made of palm-leaves.

अनुवाद—फूलों की चोरी के भय से पवन उस के बाग में अपनी गति रोक लेता है और वह उस के समीप पंखे के वायु की अपेक्षा अधिक वेग से नहीं चलता ॥ ३५ ॥

पर्यायसेवामुत्सृज्य पुष्पसंभारतत्पराः ।
उद्यानपालसामान्यमृतवस्तमुपासते ॥ ३६ ॥

पर्यायेति ॥ **ऋतवः** षड् वसन्तादयः **पर्यायसेवां** क्रमसेवाम् **उत्सृज्य** (**पुष्पसंभारतत्पराः**) पुष्पाणां संभारे संग्रहे तत्पराः । आसक्ताः सन्तः इत्यर्थः ॥ तत्परे प्रसितासक्तौ इत्यमरः । (**उद्यानपालसामान्यं**) उद्यानपालैरुद्यानाधिकृतैः सामान्यं साधारणं यथा भवति तथा **तं** तारकम् **उपासते** सेवन्ते । शीतोष्णादिदोषप्रकाशनं तु दुरापास्तमित्यर्थः ॥

Notes.—पर्यायसेवाम्, 'service by turns, ministration by rotation'. पर्याय means 'turn, succession; from परि √इ 'to go'. उत्सृज्य, 'having given up'. The idea is that seasons wait upon him, not one at a time as nature ordains, but all simultaneously, thus offering to the demons, day after day, a rich store of flowers peculiar to all seasons. उद्यानपालसामान्यम्, 'as gardeners'. It is an adverb of manner modifying उपासते. Anal. उद्यानपालैः सामान्यं (likeness) यथा भवति तथा.

Trans.—Anxious to collect (a heap of) flowers, *the seasons,* discontinuing ministration by rotation, wait upon him (the demon), (day after day), as his gardeners.

अनुवाद—(छः) ऋतु क्रम से सेवा त्याग कर (सब ऋतुओं में होने वाले) फूलों के इकट्ठा करने में तत्पर हो बाग के मालियों की नाईं उस की सेवा में लगे रहते हैं ॥ ३६ ॥

तस्योपायनयोग्यानि रत्नानि सरितां पतिः ।
कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते ॥ ३७ ॥

तस्येति ॥ **सरितां पतिः** समुद्रः **तस्य** तारकस्य (**उपायनयोग्यानि**) उपायनानां प्राभृतानां योग्यानि । प्राभृतं तु प्रदेशनम् । उपायनम् इत्यमरः । **रत्नानि अम्भसामन्तः आनिष्पत्तेः** परिपाकपर्यन्तम् ॥ विकल्पादसमासः । **कथमपि** महता यत्नेन **प्रतीक्षते** । कदा वा पारिपच्थ्यरानित्यकाभिरथ पानिलायर्थः ॥

Notes.—उपायनम् 'a present, gift'. सरितां पतिः 'the ocean'. In mythology the sea is regarded as the husband of streams. Hence all Sanskrit words 'for a stream' are fem. (*Vide* भूमि-विद्युत्-सरिल्-लता-वनिताभिधानानि Ling. 18.). So all sanskrit words for 'an ocean' are masc. (*Vide* देवासुरात्मस्वर्गगिरिसमुद्र०. Ling. 43.) कथम् अपि, 'somehow; with great difficulty.' आ निष्पत्तेः, 'till completeness of development *i. e.* till pearls become the valuable things that they are.

Trans—The *ocean* (lit. 'the lord of streams)' awaits in suspense, as the pearls pass, in the womb of the waters, to the last stage of their development,—the pearls fit to be presented to him.

अनुवाद—नदियों के पति समुद्र उस के देने योग्य रत्नों की जलों के भीतर उन के पक जाने तक बड़े दुःख से प्रतीक्षा करता है ॥ ३७ ॥

ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि ।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते ॥ ३८ ॥

ज्वलदिति ॥ किं **च** इति चार्थः । (**ज्वलन्मणिशिखाः**) ज्वलन्त्यो मणीनां शिरोरत्नानां शिखा ज्वाला येषां ते **वासुकिप्रमुखाः भुजङ्गाः** सर्पाः सिद्धाश्च ध्वन्यन्ते ॥ भुजङ्गः सिद्धसर्पयोः इत्यमरः ॥ **निशि स्थिरप्रदीपताम्** अनिर्वाणदीपत्वम् **एत्य एनं** तारकं **पर्युपासते** परिवृत्य सेवन्ते ॥

Notes.—ज्वन्मणिशिखाः, 'possessed of the flaming lustre of their jewels'. Anal. ज्वलन्त्यः मणीनां शिखाः येषाम् इति. **वासुकिप्रमुखाः**, 'with Vasuki at their head'. Vasuki is the king of serpents. **स्थिरप्रदीपताम् एत्य**, 'doing the work of steady lights; functioning as unflickering lamps'. **भुजंगाः**, 'serpents'. We have three formations from भुज and √गम् *i. e.* भुजगः, भुजंगः, भुजंगमः all meaning 'a serpent'. Cf. तुरगः, तुरङ्गः, तुरंगमः, all meaning 'horse'. Malli. remarks that भुजङ्गः has also the implication of 'libidinous, unprincipled flatterers'.

Trans.—*Serpents*, headed by Vasuki and possessing the flaming lustre of the jewels (in their head), wait upon him at night, functioning as so many unflickering lamps.

अनुवाद—रात्रि के समय वासुकि आदि साँप जिन के (सिरों में विद्यमान) रत्नों से ज्वालायें उठती हैं (वातादि कारणों से) न बुझने वाले दीए बन कर उस की सेवा करते हैं ॥ ३८ ॥

तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः ।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः ॥ ३९ ॥

तत्कृतेति ॥ **इन्द्रः अपि (तत्कृतानुग्रहापेक्षी)** तेन तारकेण कृतं तत्कृतमनुग्रहं प्रसादमपेक्षते इति तथोक्तः सन् । **मुहुः दूतहारितैः** दूतप्रापितैः (**कल्पद्रुमविभूषणैः**) कल्पद्रुमाणां विभूषणैः । तत्प्रसूनैरित्यर्थः । **तं** तारकम् **अनुकूलयति** अनुकूलं करोति ॥

Notes.—तत्कृतानुग्रहापेक्षी, 'seeking favours of his doing'. It is significant that even *the leader* of the gods courts his goodwill. Anal. तेन कृतम् इति तत्कृतम्; तत्कृतम् अनुग्रहम् अपेक्षते इति. कल्पद्रुमः, 'wish-yielding tree' which is found in Heaven. It is supposed to grant all desires. अनुकूलयति 'courts his goodwill, a denom. from अनुकूल a. 'favourable'. अनुकूलं करोति इति णिच्.

Trans.—Even *Indra*, seeking favours of his doing, courts his goodwill by presenting bouquets of flowers of wish-yielding trees, sent to him frequently through his messengers.

अनुवाद—उस के हाथों अनुग्रह चाहने वाला इन्द्र भी पुनः पुनः अपने दूतों द्वारा कल्पवृक्ष के पुष्प भेज कर मानो उसे प्रसन्न करना चाहता है ॥ ३९ ॥

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः ॥ ४० ॥

इत्थमिति ॥ **इत्थम्** उक्तप्रकारेण सर्वैरिन्द्रादिभिः सुरेन्द्रैः **आराध्यमानः अपि भुवनत्रयं क्लिश्नाति** पीडयति । तथा हि । **दुर्जनः प्रत्यपका-**

रेण प्रतीकारेणैव **शाम्येत्** शान्तो भवेत्। **उपकारेण तु न शाम्येत** । प्रत्युत प्रकुप्यतीति भावः ॥

Notes.—**शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः**, 'a villain is quieted by retaliation, not by service.' A similar truth is preached by Bhagvadgita, when it says शठं शाठ्येन समाचरेत्. Cf. also Sisu 2. 54. **प्रत्यपकारः** 'an injury done in return.'

Trans.—Even though propitiated in this way, he continues oppressing the three worlds; for a villain is silenced not by service but by retaliation.

अनुवाद—यद्यपि उस की इस प्रकार आराधना की जा रही है तो भी उस ने तीनों लोकों को पीड़ित कर रखा है। सत्य है कि दुर्जन प्रत्यपकार से शान्त होता है न कि उपकार से ॥ ४० ॥

तेनामरवधूहस्तैः सदयालूनपल्लवाः ।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः ॥ ४१ ॥

तेनेति ॥ **तेन** तारकेण **अमरवधूहस्तैः** । सुकुमारैरिति भावः । तैरपि (**सदयालूनपल्लवाः**) सदयमालूना अवतंसार्थं छिन्ना पल्लवा येषां ते **नन्दनद्रुमाः** (**छेदपातानाम्**) छेदाश्च पाताश्च छेदपातास्तेषाम् । अभिजानन्तीति **अभिज्ञाः** । कृयोगात्कर्माणि षष्ठी । **क्रियन्ते** ॥

Notes.—**सदयालूनपल्लवाः**, 'whose fresh leaves were tenderly plucked.'. Anal. दयया सह वर्तमानं यथा स्यात तथा सदयं (बहुव्रीहि) **सदयम** (tenderly) **आलूनाः** (torn off, plucked) सदयालूनाः (सुप्सुपा) ; सदयालूनाः पल्लवाः येषां ते (बहुव्री०). **नन्दन**, 'Name of the garden of Indra. *Brihaspati now gives a harrowing description of the ruin and desolation spread by the demon* (sl. 41.-50.)

Trans.—The trees of the Nandana (*i. e.* Indra's pleasuregarden), whose new leaves were plucked gently by the hands of the wives of the gods, are now made to experience (the pain of) being hewn and felled.

अनुवाद—जिन के पत्ते देव-स्त्रियां अपने (कोमल) हाथों से तोड़ा करती थीं उन्हीं नन्दन बाग़ के वृक्षों को आज उस दैत्य के हाथों काटे जाने और चीरे जाने की पीड़ा अनुभव करनी पड़ती है ॥ ४१ ॥

वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः।
चामरैः सुरबन्दीनां बाष्पशीकरवर्षिभिः ॥ ४२ ॥

वीज्यत इति ॥ हि यस्मात्कारणात स तारकः **संसुप्तः** सन् । (**श्वास-साधारणानिलैः**) श्वाससाधारणो निःश्वाससमानोऽनिलो येषां तैः । ततोऽप्याधिक्ये निद्राभङ्गभयादिति भावः । **बाष्पशीकरवर्षिभिः** तासां । स्त्रीणां रोदनस्यायमवसर इति भावः । **सुरबन्दीनां** सुरप्रग्रहस्त्रीणां संबन्धिभिः । 'प्रग्रहावग्रहौ बन्द्याम्' इत्यमरः । **चामरैः** वीज्यते ॥

Notes.—**वीज्यते**, 'is fanned': लट् pass. voice 3rd per. sing. from √वीज् 10 v 'to fan'. Cf. Punj. dia. वीजना 'a fan'. **श्वाससाधारणानिलैः**, 'yielding a mild-breeze like breath'. Anal. श्वासेन साधारणः श्वाससाधारणः ; श्वाससाधारणः अनिलः येषां तैः (बहु). It is to be noted that the word **अनिल** itself is derived from √अन् 2. P. 'to breathe'. **सुरबन्दीनां**, 'captive nymphs'. This shows the helplessness of the gods in protecting their women. **बाष्पशीकरवर्षिभिः**, 'showering sprays of tears'. Anal. बाष्पाणां (of tears) शीकराः बाष्पशीकराः (षष्ठी तत्०); तान् वर्षन्ति इति बाष्पशीकरवर्षिणः, तैः (कर्तरि साधुकारिणि णिनिः).

Trans.—When asleep, he is fanned by the captive nymphs with chamaras yielding a mild breeze like breath and showering the spray of (nymphs') tears.

अनुवाद—जब वह सोता है तो अमर-बांदियां उसे इस प्रकार चउरियों से झूलती हैं कि उन से सांस जैसा मन्द वायु निकलता है और वे (गिर रहे) आंसुओं की वर्षा से उसे शीतलता पहुँचाती हैं ॥ ४२ ॥

उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः।
आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु ॥ ४३ ॥

उत्पाट्य इति ॥ **तेन** तारकेण **हरितां** सूर्याश्वानाम् ॥ हरित्सूर्ये च सूर्याश्वे

वर्णे च हरिते दिशि । इति विश्वः । **खुरैः** शफैः **क्षुराणानि** चूर्णितानि एतेन तेषामत्यौन्नत्यं सूचितम् । **मेरुश्टङ्गाणि उत्पाट्य स्वेषु वेश्मसु** । वेश्मास्विति बहुवचनेनास्य भुवनत्रयनिवासः सूचितः । (**आक्रीडपर्वताः**) आक्रीडन्त एष्वित्याक्रीडाः ते च ते पर्वताः **कल्पिताः** कृताः ॥

Notes.—उत्पाट्य, 'having rooted up'. उद्√पट्+णिच्+ल्यप्. क्षुराणानि, 'trodden, traversed' from√क्षुद् 7 U. 'to tread, to strike against". (क्षुद्+क्त). **हरिताम्**, m. gen. plu.' of the Sun's courses'. हरित् means a fallow horse, esp. of the Sun-god. Their number is seven. Cf. Rig. 1. 50. 8. सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥ (शोचिष्केश means 'flame-haired'.) I have not been able to find the compound हरिदश्व in Rigveda. The remak of M. R. Kale "In Rigveda the sun is called हरिदश्व" seems to be a mis-statement. **आक्रीडपर्वताः**, 'pleasure-hills'. **वेश्मसु**, 'in the premises of his palaces.

Trans.—Having rooted up the (sacred) peaks of Meru traversed by the hoofs of the fallow steeds of the sun, the demon has formed his pleasure-hills on the premises of his palaces.

अनुवाद—जो मेरुपर्वत के शिखर केवल सूर्य के घोड़ों के शफों के नीचे घिसते थे उन्हीं को उखाड़ कर उसने अपने महलों में उन की क्रीडाभूमियां बना ली हैं ॥ ४३ ॥

मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम् ।
हेमाम्भोरुहसस्यानां तद्वाप्यो धाम सांप्रतम् ॥ ४४ ॥

मन्दाकिन्या इति ॥ **सांप्रतं** संप्रति **मन्दाकिन्याः** भागीरथ्याः (**दिग्वारणमदाविलं**) । दिग्वारणानां दिग्गजानां मदैराविलं कलुषं **पयः** जलमेव शिष्यत इति **शेषं** शिष्टम् ॥ कर्मणि घञ् प्रत्ययः । त्रिष्वन्यत्रोपयुज्यते इति नपुंसकत्वम् । तर्हि कनककमलानि क गतानीत्याह—हेमेति । (**हेमाम्भोरुहसस्यानां**) हेमाम्भोरुहाण्येव सस्यानि तेषां तु तस्य वाप्यः **तद्वाप्यः** एव **धाम** स्थानम् । सर्वाण्यप्युत्पाट्य स्वदीर्घिकास्वेव प्रतिरोपितवानित्यर्थः ॥

Notes.—मन्दाकिन्याः, 'of the river Mandakini', *Vide supra* sl. 1. 28 त्रिमार्गा. दिग्वारणमदाविलम्, n. nom. sing. 'defiled by the ichor of the elephants of the quarters.' Elephants of the quarters are often described as wantonly sporting in the river Ganges and defiling her waters. Cf. Raghu. 1. 78b. नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ॥ Anal. दिशां वारणाः दिग्वारणाः; तेषाम् मदः; तेन आविलम् (dirty, turbid). तद्वाप्यः, 'his lakes'. Anal. तस्य वाप्यः इति. धामन्, n. 'seat, home'. साम्प्रतम्, adv. 'now'.

Trans.—Only water defiled by the elephants of the quarters is what is left in the river Mandakini. Of the harvests of golden lotuses his lakes are now the home.

अनुवाद—दिग्गजों के मद से कलुषित पानी केवल अब मन्दाकिनी नदी में रह गया है। सोने के फूलों के दृश्य का स्थान अब उस की झीलें हैं ॥ ४४ ॥

भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते ।
खिलीभूते विमानानां तदापातभयात्पथि ॥ ४५ ॥

भुवनेति ॥ (तदापातभयात्) तस्य तारकस्यापातात्समापत्तेर्भयात **विमानानां पथि खिलीभूते** अप्रहतीभूते सति ॥ द्वे खिलाप्रहते समे इत्यमरः ॥ **स्वर्गिभिः** देवैः (**भुवनालोकनप्रीतिः**) भुवनानामालोकने प्रीतिः **नानुभूयते** ॥

Notes.—भुवनालोकनप्रीतिः, 'the pleasure of surveying the worlds'. Anal. भुवनानाम् आलोकनं (viewing, surveying) भुवनालोकनं, तस्मिन् प्रीतिः. स्वर्गिन्, m. 'a god'. खिलीभूते, 'become desolate'. खिल means 'a waste piece of land'. Anal. अखिलः खिलः सम्पद्यमानो भूतः इति खिलीभूतः, तस्मिन्. तदापातभयात्, 'from fear of his attack'. Anal. तस्य आपातः तदापातः; तदापातात् भयं तदापातभयं (पञ्चमी तत्०), तस्मात्.

Trans.—The pleasure of surveying the worlds is no longer experienced by the gods, since the paths

of the aerial cars have become desolate through dread of his attack.

अनुवाद—उस के आक्रमण के भय से विमानों का मार्ग उजाड़ हो जाने के कारण अब देवता अन्य लोक देखने की प्रीति अनुभव नहीं करते ॥ ४५ ॥

यज्वभिः संभृतं हव्य विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ४६ ॥

यज्वभिरिति ॥ **यज्वाभिः** विधिवदिष्टवद्भिः । यज्वा तु विधिनेष्टवान् इत्यमरः सुयजोर्ङ्वनिप् इति ङ्वनिप्प्रत्ययः । **विततेषु अध्वरेषु** यज्ञेषु **संभृतं** दत्तं **हव्यं** हविः **मायी** मायावी । व्रीह्यादित्वादिनिप्रत्ययः । **स** तारकः **नः** । अस्माकं **मिषतां** पश्यताम् । पश्यत्सु सत्स्वित्यर्थः । षष्ठी चानादरे इति षष्ठी । जातवेदा वह्निरेव मुखं तस्मात् **जातवेदोमुखात् आच्छिनत्ति** । आक्षिप्य गृह्णातीत्यर्थः ॥

Notes.—यज्वन्, 'sacrifice' from the root यज् 'to sacrifice'. सुयजोर् ङ्वनिप् Pan. 3. 2. 103. **अध्वरः**, 'a sacrifice'. It is formed from √ध्वर् 'to kill' preceded by अ-(not). **जातवेदस्**— was originally an epithet of अग्नि (Fire). Grassman explains it in his Worterbuch Zum Rigveda as 'who knows (वेदस् knowledge) the being (जात)', supporting himself by the text विश्वा वेद जनिमा जातवेदाः । Rig. 6. 15, 13. Pischel, however, differs from Grassman, and says that jatavedas "means 'wise' 'sagacious,' and is only an addin to the epithets of Agni as: विद्वान्, प्रचेताः, कविः etc." Ved. Stu. vol. 1. p. 94. His analysis is: जातं वेदः (knowledge) यस्य. Yaska, however, attempts in his exhaustive way as usual all the possible analyses:—जातवेदाः कस्माज् जातानि वेद जातानि वैनं विदुर् जाते जाते विद्यते इति वा जातवित्तो वा जातधनो वा जातविद्यो वा जातप्रज्ञानो यत् तज्जातः पशूनविंदतेति तज् जातवेदसो जातवेदस्त्वम् इति ब्राह्मणं तस्मात् सर्वान् ऋतून् पशवो ऽग्निम् अभिसर्पन्तीति च ॥ Nir. 7. 19. **मिषतां नः**, 'we looking on (helplessly)'. Pan. 2. 3. 38. षष्ठी चानादरे **आ√छिद्** 7 U. 'to tear from, to snatch away'.

Trans.—Master of black art, the demon snatches away from the mouth of the fire the offerings offered in the sacrifices performed by the sacrificers, while we watch it helplessly.

अनुवाद—मायावी तारक किये जा रहे यज्ञों में यज्ञ करने वालों से दिया गया हव्य हमारे देखते देखते अग्नि के मुख से छीन ले जाता है ॥ ४६ ॥

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च ।
देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः ॥ ४७ ॥

उच्चैरिति ॥ किं **च** इति चार्थः । तेन तारकेण **उच्चैः** उन्नतः **उच्चैःश्रवाः** नाम हयो रत्नमिव **हयरत्नम्** अश्वश्रेष्ठः । रत्नं श्रेष्ठे मणावपि इति विश्वः । अस्य शुभ्रत्वादुत्प्रेक्ष्यते—**देहबद्धं** बद्धदेहम् । । मूर्तिमदित्यर्थः ॥ आहिताग्न्यादित्वान्निष्ठायाः परानिपातः । **चिरकालार्जितम् इन्द्रस्य यशः इव अहारि** अपहृतम् ॥ तर्हि सामाद्युपायास्तत्र कथं न प्रयुक्ता इत्यत्राह—

Notes.—**उच्चैः**, 'tall' goes with उच्चैःश्रवाः. **उच्चैःश्रवस्** is the name of Indra's steed. He is said to have been obtained by churning the ocean. **हयरत्न**, 'the best of the horses, lit. the gem among the horses'. **देहबद्धम्** 'in a bodily form'. Anal. देहः बद्धः अनेन इति देहबद्धम् or बद्धदेहम् ; qualifies यशः. **चिरकालार्जित**, 'established from very ancient times'. **यशः**, 'renown' is considered when untarnished, to be white. The white steed whose possession was highly valued and who was one of the causes of the widespread reputation of Indra is imagined by the speaker to be embodying Indra's long-won renown.

Trans.—He has stolen away the tall steed of Indra, Uchchaisravas, his long-established renown, as it were, encompassing an animal form.

अनुवाद—वह (सृष्टि के) सब घोड़ों में से श्रेष्ठ उच्चैश्रवस् जो मानो इन्द्र का चिरकाल से कमाया हुआ [illegible] यश था छीन ले गया है ॥ ४७ ॥

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः ।
वीर्यवन्त्यौषधानीव विकारे सान्निपातिके ॥ ४८ ॥

तस्मिन्निति ॥ **क्रूरे** घातुके । नृशंसो घातुकः क्रूरः इत्यमरः । **तस्मिन्** असुरे **नः** अस्माकं **सर्वे उपायाः** सन्निपातदोषत्रयस्य प्रकोपजे **सान्निपातिके विकारे** ज्वरादौ ॥ सन्निपाताच्च इति वक्तव्याट्ठक् ॥ **वीर्यवन्ति** सारवन्ति **औषधानि इव प्रतिहतक्रियाः** विफलप्रयोगा भवन्ति ॥

Notes.—उपायाः, 'means of success (against an enemy)'. There are four उपायs, viz.—(*i*) सामन्, 'conciliation' or 'negotiation,' (*ii*, दान 'concession,' (*iii*) भेद 'sowing dissensions,' and (*iv*) दण्ड 'punishment *i. e.* delivering an attack on the enemy'. भेदो दण्डः साम दानम् इत्युपायचतुष्टयम् Amara. In reference to the *disease* उपाय means 'a remedy against a distemper'. **प्रतिहतक्रियाः**, 'whose effect has been nullified'. Anal. प्रतिहताः क्रियाः येषां, ते. **सान्निपातिके विकारे**, 'in a distemper resulting from vitiation of humours of the body. **सन्निपात** m. "a combined derangement of the three humours of the body causing fever which is of a dangerous kind." V. S. Apte. **विकारः**, means a departure from normalcy. The normal state of a man is the one when he is healthy. Hence विकार means 'diseased state, a disease.'

Trans.—All our means of success against the fell demon have proved ineffective as herbs of high medicinal value do not operate against the disease *sannipata.*

अनुवाद—उस निर्दयी दैत्य के प्रति सन्निपात ज्वर में बलवती ओषधियों की नाईं हमारे सब उपाय निष्फल गये हैं ॥ ४८ ॥

तदेव प्रतिहतक्रियत्वमाह—

जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा ।
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम् ॥ ४९ ॥

जयाशेति ॥ (**च**) किं च इति चार्थः । नूनमनेन हरिचक्रेण वयं जेष्याम

इति **यत्र** हरिचक्रे **अस्माकं जयाशा** विजयाशंसा । आसीदिति शेषः । (**प्रतिघातोत्थितार्चिषा**) प्रतिघातेन प्रतिहत्योत्थितार्चिषे द्रुततेजसा **तेन हरिचक्रेण** विष्णोः सुदर्शनेन **अस्य** तारकस्य **कण्ठे निष्कम्** उरोभूषणम् **अर्पितमिव** इत्युत्प्रेक्षा । स्वयमेव निष्कमिव स्थितमित्यर्थः । तारकशिरश्छेदाय हरिणा चक्रं त्यक्तं तदपि नष्टशक्ति जातमिति भावः ॥ साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले । दीनारेऽपि च निष्कोऽस्त्री इत्यमरः ॥

Notes.—प्रातिघातोत्पितार्चिषा, 'which emitted sparks and flames by impact (on the demon's neck). Anal. प्रतिघातेन (by striking against , by impact on or against) उत्थिता प्रतिघातोत्थिता; प्रतिघातोत्थिता अर्चिः यस्य तत् चक्रम् प्रतिघातोत्थितार्चिः तेन **हरिचक्रेण**, ' by the quoit of Hari. ' Visnu is famed for his quoit or discus (सुदर्शनचक्र) which was irresistible by the enemies, and which had been given to him by Siva. **निष्कम्**, 'an ornament hung from neck to adorn the breast (उरोभूषणम् Amara)'. The word is given also as a masc. (Ling 54.), but in what particular sense it is not clear. The ornament , however , perhaps actually contained the golden *mohurs* as some ornaments do even now-adays. (A निष्क originally means a gold coin.)

Trans.—Even that quoit of Visnu wherein lay our hope of victory, emitting sparks and flames by impact, put itself like a necklace of gold round the demon's neck.

अनुवाद—विष्णु के जिस सुदर्शन चक्र में हमारे जीतने की आशायें थीं उस में से दैत्य के कण्ठ पर आघात होते समय चिंगाड़े उठे और तदनन्तर वह उसके कण्ठ का भूषणमात्र हो रहा ॥ ४६ ॥

तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु ।
अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः ॥ ५० ॥

तदीयेति ॥ **अद्य** संप्रति (**निर्जितैरावताः**) निर्जित ऐरावतो यैस्ते तथोक्ताः । तस्य तारकस्येमे **तदीया गजाः पुष्करावर्तकादिषु** पुष्करावर्तकाश्च नाम आद्यौ येषां तेषु **तोयदेषु** मेघेषु **तटाघातं** वप्रक्रीडाम् **अभ्यस्यन्ति** ॥

Notes.—पुष्करावर्तकादिषु, 'against Puskara, Avartaka, and others'. These clouds are also mentioned in Megh. तटाघातं, 'butting.' Striking their tusks against the slopes of mountains seem to be a pastime with the elephants. Clouds fairly often take the place of mountains in the imagination of poets either in a simile or in plain language. It is significant that some words of the early language mean both a mountain and a cloud. The A.-S. clûd, from which the English word, cloud is derived meant a rock.

Trans.—To-day his elephants having vanquished (Indra's lordly elephant) Airavata (in a fight), are practising butting upon the clouds, Puskara, Avartaka, and others.

अनुवाद—अब उस के हाथी ऐरावत पर विजय प्राप्त करने के पीछे पुष्कर, आवर्तक आदि मेघों पर वप्रक्रीडा का अभ्यास कर रहे हैं ॥ ५० ॥

तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः ॥ ५१ ॥

तदिति ॥ **तत्** तस्मात्कारणात्। हे **विभो** स्वामिन्। मोक्तुं भवं त्यक्तुमिच्छवः **मुमुक्षवः** विरक्ताः **भवस्य** संसारस्य **शान्तये** निवृत्तये (**कर्मबन्धच्छिदं**) कर्मैव बन्धस्तं छिनत्तीति कर्मबन्धच्छित्तं **धर्मम् इव**। आत्मज्ञानहेतुभूतमिति शेषः। 'तमेव विदित्वातिमृत्युमेति' इति ज्ञानादेव मुक्तिः। **तस्य** तारकस्य **शान्तये** नाशाय। सेनां नयतीति सेनानीश्चमूपतिः। 'सत्सूद्विष'—इत्यादिना क्विप् ॥ तं **सेनान्यं** कंचित् **स्रष्टुम् इच्छामः** ॥ वयमिति शेषः ॥

Notes.—स्रष्टुं.—The variant सृष्टं seems to be a better reading, as the reply of Brahman shows. *Vide* sl. 54. The work of *creation* rests with Brahman. सेनानीः, 'a leader of forces'. Anal. सेना (army, forces) + नि (to lead) + क्विप् Pan. 3. 2. 61. Siva's mighty baby, Kumara, was also known by the name of सेनानी because he was *the leader of the host* of Heaven. कर्मबन्धच्छिदं'

qualifies धर्म (revelation of truth) 'which would snap asunder the bonds of *Karman*'. The theory of *Karman* forms the corner-stone of Hindu philosophy'. Man is fated to wander from one birth to another till revelation of truth, that is, till knowledge of the Absolute Being comes to his rescue. Then ceases continued mundane existence and with it the miseries of earthly life.

Trans.—Hence, O all-pervading lord, we seek to create a leader for the hosts (of Heaven) in order to exterminate *him*, as those aspiring to emancipation seek, for the stoppage of rebirth, the revelation of truth which will snap asunder their bonds of *Karman*.

अनुवाद—हे स्वामिन जिस प्रकार मोक्ष-प्राप्ति की इच्छा रखने वाले विरक्त जन सांसारिक दुःखों से निवृत्ति प्राप्त करने के निमित्त कर्म्म बन्धन तोड़ने वाले धर्म की इच्छा करते हैं इसी प्रकार तारक का नाश करने के लिये हम सेनापति की उत्पत्ति चाहते हैं ॥ ५१ ॥

सेनानीसृष्टेः फलमाह—

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम् ॥ ५२ ॥

गोप्तारमिति ॥ **सुरसैन्यानां** देवतासेनानां **गोप्तारं** रक्षितारं **यं** सेनान्यं **पुरस्कृत्य** पुरोधाय ॥ 'पुरोऽव्ययम्' इति गतित्वात् 'नमस्पुरसोर्गत्योः' इति सकारः । गां पृथ्वीं त्रायन्ते इति गोत्रास्तान्भिनत्तीति **गोत्रभित्** इन्द्रः **जयश्रियं बन्दीमिव** बन्दीकृतां स्त्रियमिव **शत्रुभ्यः** सकाशात् **प्रत्यानेष्यति** प्रत्याहरिष्यति । तं स्रष्टुमिति पूर्वेण संबन्धः ॥

Notes.—**पुरस्कृत्य**, 'Having placed in front'. पुरस् indec. is regarded as a गति. Pan. 1. 4. 67. **गोत्रभित्**, 'cleaver of mountains.' Anal. गां (the earth) त्रायन्ते इति गोत्राः (mountains); तान् भिनत्ति इति गोत्रभित् (क्विप्). **बन्दीमिव**, 'like a female captive of war.'

Trans.—Placing whom ; the deliverer of the hosts of Heaven, in front, the cleaver of the mountains (*i. e.* Indra) will bring back (home) the goddess of victory , a captive of war , from the enemies.

अनुवाद—देवताओं की सेना के जिस रक्षक को अग्रणी बना कर इन्द्र जयलक्ष्मी कैद करके वापिस घर लायगा ॥ ५२ ॥

वचस्यवसिते तस्मिन्ससर्ज गिरमात्मभूः ।
गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा ॥ ५३ ॥

वचसीति ॥ **तस्मिन्** बार्हस्पत्ये **वचसि अवसिते** परिसमाप्ते सति **आत्मभूः** ब्रह्मा **गिरं** वाचं **ससर्ज** जगादेत्यर्थः । **सा** गीः **सौभाग्येन** मनोहरत्वेन ; 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इत्युभयपदवृद्धिः । (**गर्जितानन्तरां**) गर्जिताद्गर्जितस्य वानन्तरं प्रवृत्तां **वृष्टिं जिगाय** जितवती । गर्जितपरत्वाद्वृष्टेरिव तद्विज्ञापनकृतत्वाद्गिरः सुभगत्वमिति भावः ॥

Notes.—अवसिते, ' finished, concluded ;' p. p. p. of अव √सो ' to conclude. ' गर्जितानन्तरां, ' coming immediately after thundering '. Anal. गर्जिताद् गर्जितस्य वा अनन्तराम् . सौभाग्यं, ' charm , sweetness ', abstr. from सुभग . It is to be noted that both the initial and the medial vowels take vriddhi. जिगाय,' overcame , excelled , surpassed ', लिट् 3rd per. sing. from जि ' to conquer.'

Trans.—The address being concluded, the self-born god made a speech (in reply). It surpassed in charm and sweetness a shower following close upon peals of thunder.

अनुवाद—बृहस्पति का कथन समाप्त हो जाने पर ब्रह्मा ने उत्तर में भाषण किया । वह भाषण (मेघों के) गर्जने के पीछे वर्षा की नाईं माधुरी में बढ़ चढ़ कर था ॥ ५३ ॥

संपत्स्यते वः कामोऽयं कालः कश्चित्प्रतीक्ष्यताम् ।
न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना ॥ ५४ ॥

संपत्स्यत इति ॥ **अयं वः** युष्माकं **कामः** मनोरथः सेनानीरूपः **संपत्स्यते**

सेत्स्यति । **कश्चित्** कियानपि **कालः प्रतीक्ष्यताम्** । **तु** किं तु **अस्य** सेनान्यः **सिद्धौ** विषये **आत्मना** स्वयं **(सर्गव्यापारं)** सर्गः सृष्टिरेव व्यापारस्तं **न यास्यामि** । नाहं स्रक्ष्यामीत्यर्थः ॥

Notes.—**संपत्स्यते**, 'will be accomplished, will be fulfilled' from सम् √पद् 'to be accomplished'. **प्रतीक्ष्यताम्**, 'be bided.' **सर्गव्यापारम्**, 'business of creating.'

Trans.—This your wish will be fulfilled, let us only bide some time. I will not, however, go about the business of creating (a leader) for its fulfilment.

अनुवाद—तुम्हारी यह कामना पूरी हो जायगी, कुछ काल प्रतीक्षा करो; परन्तु इस तुम्हारी कामना की सिद्धि में मैं स्वयम् उत्पत्ति के कार्य को अपने हाथ में न लूंगा ॥ ५४ ॥

कुत इत्याशङ्क्याह—

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥ ५५ ॥

इत इति ॥ **इतः** मत्त एव **प्राप्तश्रीः** लब्धोदयः **स दैत्यः** तारकासुरः **इतः** मत्त **एव क्षयं** नाशं **न अर्हति** । तथा हि—अन्यो वृक्षस्तावदास्ताम् । विषस्य वृक्षः **विषवृक्षः अपि संवर्ध्य** कुतश्चित्कारणात्सम्यग्वर्धयित्वा **स्वयं छेत्तुम् असांप्रतम्** अनर्हः । असांप्रतमित्यनेन निपातेनाभिहितत्वाद् वृक्ष इति द्वितीयान्तो न भवति अनभिहिते कर्मणि द्वितीयाविधानात् । यथाह वामनः—निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः । परिगणनस्य प्रायिकत्वात् इति ॥

Notes.—**प्राप्तश्रीः**, 'who obtained his pre-eminent position (from me)'. We have no कप् here, though we have it in सश्रीक. The rule नद्यृतश्च Pan. 5. 4. 153. is not applicable, as श्री is not नदी. The next rule शेषाद् विभाषा *is*. **विषवृक्षोऽपि**. Mark the syntax here. We have विषवृक्षः not विषवृक्षम्, nom. not acc. The case is noticed by Bhattoji. Dixit. *Vide* his commentary on Pan. 2. 3. 2. **असाम्प्रतम्**, 'improper'.

Trans.—From me the demon acquired his power, from me he should not have his fall; it is

improper for one to cut down even a poisonous tree having (first) reared it one's self.

अनुवाद—मुझ से उस दैत्य को उन्नति प्राप्त हुई इसलिये यह अनुचित है कि उस का नाश मेरे हाथों से हो । (माना कि वह विष का वृक्ष है) परन्तु विष के वृक्ष को भी स्वयम् बड़ा कर के उसे अपने हाथों से काट डालना उचित नहीं होता ॥ ५५ ॥

वृतं तेनेदमेव प्राङ् मया चास्मै प्रतिश्रुतम् ।
वरेण शमितं लोकानलं दग्धुं हि तत्तपः ॥ ५६ ॥

वृतमिति ॥ **प्राक्** पूर्वं **तेन** असुरेण **इदमेव** देवैरवध्यत्वमेव **वृतं** प्रार्थितम् । **मया च अस्मै** तारकाय **प्रतिश्रुतं** प्रतिज्ञातम् ॥ प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता इति संप्रदानत्वाच्चतुर्थी ॥ कर्तव्यं चैतदित्याह—**लोकान्दग्धुम् अलं** शक्तम् । पर्याप्तिवचनेष्वलमर्थेषु इति तुमुन्प्रत्ययः । तस्य तपः **तत्तपः वरेण** वरदानेन **शमितं हि**। मयेति शेषः ॥

Notes.—**इदम एव**, 'this only' *i. e.* exemption from death at the hands of gods. **प्रतिश्रुतम**, p. p. p. from प्रति √ श्रु 'to promise'. Verbs of promising govern the dative. **अलं**, 'capable (of)'; governs the infin. दग्धुम्. Pan. 3. 4. 66. The demon's penance was so austere that it would have reduced to ashes the three worlds in a moment. Brahman saved the situation by granting him the boon of immunity from death at the hands of gods.

Trans.—On a former occasion he begged just this thing as a boon from me and I granted the same to him; and thus with a boon I cancelled his power of penance to consume the worlds.

अनुवाद—कुछ समय व्यतीत हुऐ उस ने मुझ से यही वर मांगा था और मैंने उसे वचन दे दिया । उस वर द्वारा मैंने (तीनों) लोकों को भस्म करने के समर्थ उसके तप को नष्ट कर दिया ॥ ५६ ॥

संयुगे सांयुगीनं तमुद्यन्तं प्रसहेत कः।
अंशादृते निषिक्तस्य नीललोहितरेतसः ॥५७॥

संयुग इति ॥ **संयुगे** युद्धे **उद्यन्तं** व्याप्रियमाणम्। संयुगे साधुं **सांयुगीनम्**। प्रतिजनादिभ्यः खञ् इतिखञ्प्रत्ययः॥ **तं** तारकं **निषिक्तस्य** क्वचित्क्षेत्रे क्षरितस्य। (**नीललोहितरेतसः**) नीलः कण्ठे लोहितश्च केशेष्विति नीललोहित इति पुराणम्। इति स्वामी। तस्य नीललोहितस्य धूर्जटे रेतसः शुक्रस्य **अंशाद् ऋते** अंशं विना **अन्यः कः प्रसहेत** अभिभवेत्॥ प्रसहनमभिभवः इति वृत्तिकारः॥

Notes.—सांयुगीनं, 'skilled in war'. संयुग means 'fight, war, battle'. Anal. संयुगे साधुः इति सांयुगीनः (खञ्) Pan. 4. 4. 99. **अंशाद् ऋते**, 'save a portion of'. **ऋते** 'save, except, without' governs the abl. **नीललोहित** 'Siva, because of a dark streak on his neck and his red-gray hair. **रेतस्**, 'semen, seed.'

Trans.—Who can hope to conquer the demon warrior when he engages on the battle-field save a portion of the seed of Siva deposited (on a proper place).

अनुवाद—योग्य भूमि में गिराये हुए शिव जी महाराज के वीर्य्य (से जन्मे हुए) के सिवा और कौन उस रणवीर तारक को युद्ध में जीत सकता है॥ ५७॥

कथमसावीदृक्शक्तिरित्याह—

स हि देवः परं ज्योतिस्तमःपारे व्यवस्थितम्।
परिच्छिन्नप्रभावार्द्धिर्न मया न च विष्णुना ॥ ५८ ॥

स इति। **स देवः** नीललोहितः (**तमःपारे**) तमसः पारे परतः **व्यवस्थितं** तमोगुणातीतं **परं ज्योतिः** परमात्मा **हि**। अत एव **मया परिच्छिन्नप्रभावार्द्धिः** अवगाढमहिमातिशयः **न** भवति तथा **विष्णुना च न**। अतस्तस्यासाध्यं नास्तीत्यर्थः॥

Notes.—परं ज्योतिः, 'supreme light. Cf. Sveta. 3. 12. महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः। सुनिर्मलामिमां प्राप्तिम् ईशानो ज्योतिरव्ययः॥ **तमःपारे**, 'beyond darkness.' **परिच्छिन्नप्रभावर्धिः** 'the

vastness of whose power has been determined'. Anal. प्रभावस्य ऋद्धिः (abundance, vastness) प्रभावर्द्धिः ; परिच्छिन्ना प्रभावर्द्धिः यस्य इति. We are told that Brahman and Visnu went to measure the extent of Siva's light. Brahman went one way and Visnu the other. But neither reached the ends and each came back baffled and bewildered. The idea is that where such mighty gods as Brahman and Visnu could not hope to gauge the power of Siva poor Taraka had no chance, and hence the demon committed the fatal mistake of not begging exemption from death even at the hands of the son of Siva.

Trans.—That god (Siva) is supreme light reigning beyond the limits of darkness. The vastness of his power has been determined neither by me nor by Visnu.

अनुवाद—अन्धकार से परे परम ज्योतिः स्वरूप महादेव जी प्रकाशमान हैं । उन के सामर्थ्य की महिमा न मैं जान सकता हूं और न विष्णु ॥ ५८ ॥

संप्रति तदंशोत्पत्तावुपायं दर्शयति—

उमारूपेण ते यूयं संयमस्तिमितं मनः ।
शंभोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत् ॥ ५९ ॥

उमेति ॥ **ते** कार्यार्थिनः **यूयं संयमस्तिमितं** समाधिनिश्चलं **शंभोः मनः उमारूपेण** उमासौन्दर्येण । रूपं स्वभावे सौन्दर्ये नाणके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपि ॥ इति विश्वः ॥ **अयस्कान्तेन** मणिविशेषेण । कस्कादिषु च इति सकारः **लोहवत्** अयोधातुमिव । तेन तुल्यं क्रिया चेद्वतिः इति वतिप्रत्ययो मृग्यः । **आक्रष्टुम्** आहर्तुं **यतध्वम्** उद्युक्ता भवत ॥

Notes.—**संयमस्तिमितं**, 'fixed in meditation, lost in trance'. Anal. संयमेन स्तिमितम् (तृतीय त०). **अयस्कान्तेन लोहवत्**, 'as a magnet attracts a piece of iron'. Pan. 5. 1. 115. तेन तुल्यं क्रिया चेद् वतिः means that the suffix वत् is to be used when the action denoted by the verb

remains the same. Explained in the light of this aphorism the meaning will be this—"Try to draw away the mind firm in meditation, of Siva by the beauty of Uma as a magnet does iron". 'A magnet' corresponds to 'you' subject of the verb *Try*, 'iron' to 'the mind of Siva firm in meditation,' and the beauty of Uma drops out of the equation altogether. This is not the sense intended by the Poet. May we not construe the sentence thus? ते यूयं संयमास्तिमितं. लोहवत् शंभोः मनः अयस्कान्तेन उमारूपेण आक्रष्टुं यतध्वम् ते ॥ यूयं. ते qualifies यूयं and means 'thus circumstanced'.

Trans.—Try you who are thus circumstanced to attract the mind of Siva firm in trance by the charms of Uma as a magnet attracts iron.

अनुवाद—कार्य्यसिद्धि की अभिलाषा किये हुए तुम शिवजी के समाधि द्वारा एकाग्र मन को पार्वती के सौन्दर्य से ऐसे खींचने का यत्न करो जैसे चुम्बुक लोहे को खींच लेता है ॥ ५६ ॥

उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।
सा वा शंभोस्तदीया वा मूर्तिर्जलमयी मम ॥ ६० ॥

उभे इति ॥ **उभयोः** शंभोर्मम च **आहितं** निषिक्तं **बीजं** तेजः **वोढुं सा वा** उमा **शंभोः** अष्टमूर्तेः तस्य इयं **तदीया जलमयी मूर्तिः वा मम**। **उभे एव क्षमे**। न तृतीयेत्यर्थः ॥ वाशब्दो द्वन्द्वार्थे, न त्वन्यार्थे। एतदेवोदाहृत्येत्थमेव व्याख्यातं गणव्याख्याने ॥ अत्र दीपकालंकारः प्राकरणिकयोरुमामहेश्वरयोरप्राकरणिकयोर्ब्रह्मजलमूर्त्योश्चौपम्यस्य गम्यत्वात् । यथाह भोजराजः— प्रस्तुतानामप्रस्तुतानां चौपम्यस्य गम्यत्वे दीपकम इति ॥ न चेयं तुल्ययोगिता तस्याः केवलप्रस्तुतविषयत्वेन केवलाप्रस्तुतविषयत्वेन चोत्थानादिति ॥

Notes.—**वोढुम**, 'to bear' infin. from वह् 'to bear'. **आहितम,** 'deposited, placed'. p. p. p. from आ √धा 'to place, to deposit (as seed)'. **जलमयी,** 'consisting of water'. Water is one of the eight

forms of Siva, and water was where Brahman first deposited his seed. Brahman says that Parvati is capable of bearing the seed of Siva as Siva's form, water, was of his.

Trans.—The two alone (*and none third*) have the power to bear the seed, when deposited, of us two—she (Uma) of Siva as Siva's own form, water, of me.

अनुवाद—हम दोनों के गिरे हुए वीर्य को धारण करने में दो ही समर्थ हैं। शिवजी का वीर्य धारण करने में पार्वती और मेरा शिवजी की ही मूर्ति, जल ॥ ६० ॥

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः ॥ ६१ ॥

तस्येति ॥ **तस्य शितिकण्ठस्य** अष्टमूर्तेः **आत्मा**। पुत्र इत्यर्थः ॥ आत्मा वै पुत्रनामासि इति श्रुतेः ॥ **वः** युष्माकं सेनापतेर्भावः **सैनापत्यम** ॥ पत्यन्तपुरोहितादिभ्यो यक् इति यक्प्रत्ययः। **उपेत्य** प्राप्य **वीर्यविभूतिभि** शौर्यसंपत्तिभिः **सुरबन्दीनां वेणीः मोक्ष्यते** विस्रंसयिष्यति ॥ तारकासुरं हनिष्यतीति भावः ॥

Notes.—**तस्य आत्मा**, 'his soul', *i. e.* his son. **शितिकण्ठस्य**, 'of the black-necked god,' epithet of Siva. *Vide supra* sl. 57. **नीललोहित. सैनापत्यम्**, 'generalship of the army', abstr. from सेनापतिः. Pan. 5. 1. 128. **मोक्ष्यते**, 'will untie or loosen' fut. 3rd per. sing. mid. from √मुच् 'to free, to untie'. **वेणीः**, 'braids', f. acc. pl. from वेणि f. or वेणी f.

Trans.—(An image of) the soul of the black-necked god appointed to the commandership of the army (of the gods) will loosen the braids of the captive nymphs through the greatness of his power.

अनुवाद—श्याम-कण्ठ महादेव जी का पुत्र तुम्हारा सेनापति बन कर सुरबादियों की मीढियाँ अपने बाहुबल से खुलवायेगा ॥ ६१ ॥

इति व्याहृत्य विबुधान्विश्वयोनिस्तिरोदधे ।
मनस्याहितकर्तव्यास्तेऽपि देवा दिवं ययुः ॥ ६२ ॥

इतीति ॥ (**विश्वयोनिः**) विश्वस्य योनिः कारणम् ॥ योनिः स्त्रीणां भगस्थाने कारणे तान्त्रिक पेणे । इति वैजयन्ती । **विबुधान्** सुरान् इति **व्याहृत्य** अभिधाय **तिरोदधे** अन्तर्हितवान् । **ते देवाः अपि मनसि (आहितकर्तव्याः)** आहितं कर्तव्यं यैस्ते तथोक्ताः सन्तः **दिवं** स्वर्गं **ययुः** प्रापुः ॥

Notes.—व्याहृत्य, 'having spoken (in reply)', from व्या√हृ 'to speak, to narrate'. तिरोदधे, 'vanished out of sight', लिट् 3rd per. sing. mid. from तिरस्√धा 'to vanish, to disappear)'. मनसि आहितकर्तव्याः, 'with the line of action definitely determined in their mind' *i. e.* 'with their minds fully made up as to what was to be done.'

Trans.—Having thus spoken in reply to the gods *the origin of the universe* vanished out of sight. The gods, too, with the line of action definitely determined in their mind went home to their world of Heaven.

अनुवाद—ब्रह्मा इस प्रकार देवताओं से भाषण करने के पश्चात् छिप गये। देवता भी अपने कर्तव्य का भली प्रकार निश्चय करके स्वर्ग लोक को आये ॥ ६२ ॥

तत्र निश्चित्य कन्दर्पमगमत्पाकशासनः ।
मनसा कार्यसंसिद्धौ त्वराद्विगुणरंहसा ॥ ६३ ॥

तत्रेति ॥ (**पाकशासनः**) पाको नाम कश्चिदसुरस्तस्य शासन इन्द्रः **तत्र** हरचित्ताकर्षणकृत्ये **कन्दर्पं निश्चित्य** । साधकत्वेनेति शेषः ॥ **कार्यसंसिद्धौ** (**त्वराद्विगुणरंहसा**) । त्वरयौत्सुक्येन द्वौ गुणौ यस्य तद्द्विगुणं द्विरावृत्तं रंहो वेगो यस्य तेन तथोक्तेन । गुणास्तु वृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु इति वैजयन्ती ॥ **मनसा अगमत्** । सस्मारेत्यर्थः । गमेर्लुङ् । लृदित्वाच्चलेरङादेशः ॥

Notes.—तत्र, *i. e.* 'in the task of drawing away the mind of Siva from his austerities'. (Malli.) निश्चित्य, 'having decided upon' From निस √चि 'to 'decide, to decide upon'. कंदर्पः, 'Cupid'. Anal.

Perhaps the second member is derived from √दृप् 1. P. 'to inflame'. कं (the mind) दर्पति इति कंदर्पः 'who inflames the mind.' Cf. मन्मथ. **पाकशासनः**, 'Indra'. We are told in the Puranas that Indra killed the demon पाक, brother to बालि. Hence his name 'Killer of Paka'. **द्विगुणरंहसा**, 'the speed of which was doubled' qualifies मनसा (with his mind). Anal. द्वौ गुणौ यस्य तद् द्विगुणं; द्विगुणं रंहः (speed) यस्य तत् द्विगुणरंहः (मनः), तेन.

Trans.—Having decided upon god Cupid (as the immediate instrument) in the business in hand, Indra approached (the god) with his mind, the speed of which was doubled on account of his anxiety for the success of their plan.

अनुवाद—पाक नाम के असुर का हनन करने वाला इन्द्र कामदेव को उस कार्य का साधन निश्चय करके कार्य-सिद्धि की उत्कण्ठा के कारण दुगने वेग से मन द्वारा कामदेव के पास गया ॥ ६३ ॥

अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥ ६४ ॥

अथेति ॥ **अथ** स्मरणानन्तरम् । **सः** स्मृत इत्यर्थः । पुष्पं धनुर्यस्य स **पुष्पधन्वा** कामः । वा संज्ञायाम् इत्यनङ् । (**ललितयोषिद्भ्रूलताचारुशृङ्गं**) ललितं त्रिषु सुन्दरम् इत्यमरः । ललितायाः सुन्दर्या योषितो भ्रुवौ लते इव चारुणी शृङ्गे कोटी यस्य तत्तथोक्तं **चापम्** । (**रतिवलयपदाङ्के**) रतिः स्मरप्रिया । रतिः स्मरप्रिया इत्यमरः । तस्या वलयपदानि कङ्कणस्थानान्यङ्कश्चिह्नं यस्य तथोक्ते **कण्ठे आसज्य** लगयित्वा ॥ चापकण्ठविशेषणाभ्यां शृङ्गारैकनिवेशित्रिभुवनैकवीरस्य शृङ्गारवीरोपकरणेषु तुल्यरसत्वं व्यज्यते । **सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः** सहचरस्य सखुर्मधोर्वसन्तस्य हस्ते न्यस्तं चूताङ्कुरमेवास्त्रं यस्य स तथोक्तः । **प्राञ्जलिः** सन् **शतमखम्** इन्द्रं **उपतस्थे** संगतवान् ॥ संगतिकरणार्थादात्मनेपदम् ॥ अत्र स्वभावोक्तिः—स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् । इति ॥ मालिनीवृत्तमेतत्—ननमयययुतेयं मालिनी भोगिलोकैः । इति तल्लक्षणात् ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीवनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये ब्रह्मसाक्षात्कारो नाम द्वितीयः सर्गः

Notes.—ललितयोषिद्भ्रूलताचारुशृङ्गं, qualifies चापम् (the bow) 'whose ends were as attractive as the curved eye-brows of beautiful women.' भ्रूलता, f. means lit. a creeper-like eye-brow. शृङ्ग, n. means 'tip or end'. For comparison of Cupid's bow with a lady's eye-brow *vide supra* 1. 47. रतिवलयपदाङ्के ,qualifies कण्ठे (the neck) 'which bore the marks of Rati's bracelets. रति f. 'Sexual Enjoyment' is the wife of the god of Love. सहचरमधु, 'his comrade, Spring.' *Vide infra* 3. 10 चूताङ्कुर 'a mango sprout.' For the mango sprout as Cupid's weapon *vide infra* 3. 27. शतमखम् 'Indra.' Indra completed a hundred sacrifices and hence he is called शतमख or शतक्रतु , मख and क्रतु both meaning a sacrifice. पुष्पधन्वा , 'the flower-bowed god' *i. e.* Cupid.

Trans.—Then that flower-weaponed Cupid with his bow whose ends were as attractive as the curved eye-brows of beautiful women placed on his neck, which bore the marks of Rati's bracelets, and his arrows, sprouts of mango trees, placed in the hands of his comrade, the spring, approached the god of hundred sacrifices with folded hands.

अनुवाद—इसके पश्चात् रति के कड़ों से चिह्नित कण्ठ में सुन्दर स्त्रियों की भौंहों के सिरोंवाला धनुष डाले हुए और अपना अस्त्र आम का पुष्प अपने साथी मधु के हाथ में दिये हुए कामदेव हाथ जोड़ इन्द्र के सन्मुख उपस्थित हुआ ॥६४॥

तृतीयः सर्गः ।

तस्मिन् मघोनस्त्रिदशान्विहाय सहस्रमक्ष्णां युगपत्पपात ।
प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ॥ १ ॥

तस्मिन्निति ॥ **मघोनः** इन्द्रस्य **अक्ष्णां सहस्रं** त्रिरावृत्ता दश परिमाणमेषामिति **त्रिदशान्** देवान् । संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये इति बहुव्रीहिः । बहुव्रीहौ संख्येये-इति डच्प्रत्ययः । उक्तार्थत्वात्सुचो निवृत्तिः । **विहाय** त्यक्त्वा **तस्मिन्** कामे **युगपत् पपात** । सहस्रेणाक्षिभिरद्राक्षीदित्यादरातिशयोक्तिः । ननु सुचिरपरिचितानेकसुरपरित्यागेन भगवतो महेन्द्रस्य कथमकाण्डे तस्मिन्नेकस्मिन्पक्षपात इत्याशङ्कयार्थान्तरं न्यस्यति—**प्रायः** भूम्ना **प्रभूणाम आश्रितेषु** सेवकेषु विषये **गौरवम** आदरः **प्रयोजनापेक्षितया** कार्यार्थित्वेन हेतुना **चलं** चञ्चलम् । फलतन्त्राः प्रभवो न तु गुणतन्त्रा इति भावः ॥

Notes.—मघोनः, ' of Indra '. In its origin मघवन् is a word of regular formation. In Rig. 7. 26. 4. Indra is proclaimed ' the sole dispenser of gifts ' (एको विभक्ता मघानाम्)'. So मघवन्, originally an epithet of Indra, meant " Who has gifts and rewards to distribute " (Grassman). The later attempt to derive this word from √मह् ' to glorify ' with the suf. कनिन in the Unadis, therefore, is defective. **अक्ष्णां सहस्रं**, ' the thousand eyes (of Indra)'. Says V. S. Apte " The Indra of mythology is famous for his incotinence and adultery, one prominent instance of which is his seduction of Ahalya, the wife of Gautama....... The curse of the sage impressed upon him a thousand marks resembling the female organ ,.... but these marks were afterwards changed into eyes, and he is hence called Netra-yoni and Sahasraksa. " The other explanation is that Indra got these thousand eyes in order to have a full view of the beauty of तिलोत्तमा, a celestial nymph. **त्रिदश** m.

pl, 'the *thirty* (round for 33) deities.' **प्रयोजनापेक्षितया,** 'in consideration of the object (they have in view)'. प्रयोजनम् अपेक्षते इति अपेक्षी प्रयोजनापेक्षी ; तस्य भावः प्रयोजनापेक्षिता तया.

Trans.—The thousand eyes of Indra fell, taking no notice of the gods, all quite simultaneously on Cupid. The consideration of lords for their dependents usually varies with the gravity of the undertaking (in hand).

अनुवाद—इन्द्र की सहस्र आंखे देवताओं को त्याग कर एक साथ कामदेव पर पड़ीं । प्रायः स्वामि-जनों का सेवकों के प्रति आदरभाव अपने कार्य्य के अनुसार बदल जाता है ॥ १ ॥

स वासवेनासनसन्निकृष्टमितो निषीदेति विसृष्टभूमिः ।
भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनम् ॥२॥

स इति ॥ **स** कामः **वासवेन** इन्द्रेण आसनस्य सिंहासनस्य संनिकृष्टं संनिहितम् **आसनसंनिकृष्टं** यथा तथा ॥ शेषषष्ठयायं समासः कृद्योगलक्षणाया तु न । न लोकाव्ययनिष्ठाखलर्थतृनाम् इति षष्ठीनिषेधात् ॥ **इतः निषीद** इहोपविश इति **विसृष्टभूमिः** दत्तावकाशः सन् । **भर्तुः** स्वामिनः **प्रसादम्** अनुग्रहं **मूर्ध्ना प्रतिनन्द्य** संभाव्य **मिथः** रहसि ॥ मिथोऽन्योन्यं रहस्यपि ॥ इत्यमरः ॥ **एनम्** इन्द्रम् **एवं** वक्ष्यमाणप्रकारेण **वक्तुं प्राक्रमत** उपक्रान्तवान् ॥ प्रोपाभ्यां समर्थाभ्याम् इत्यात्मनेपदम् ॥

Notes.—**आसनसन्निकृष्टम्,** adv. 'near his throne'. Anal. आसनस्य सन्निकृष्टं (near) यथा तथा. **विसृष्टभूमिः,** 'who was allowed or assigned a seat.' **प्रतिनन्द्य,** 'having received with joy,' from प्रति√नन्द्. **मिथस्,** indec. 'in secret or private'. **प्राक्रमत्,** 'commenced.' √क्रम् preceded by प्र or उप् takes the middle voice in the sense of 'commencing.' Pan. 1. 3. 42. प्रोपाभ्यां समर्थाभ्याम् ॥

Trans.—When he was assigned a seat by Indra close to his throne with the words "Take your seat here", he, having gladly acknowledged the honour done to him by his lord by (reverentially bowing) his head, began to address him in private thus :—

अनुवाद—इधर बैठिये—यह कह कर इन्द्र ने उसे आसन के पास स्थान दिया। और उस ने झुके सिर से स्वामी के अनुग्रह को स्वीकार कर इन्द्र से इस प्रकार कहना आरम्भ किया॥ २॥

आज्ञापय ज्ञातविशेषपुंसां लोकेषु यत्ते करणीयमस्ति।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितमाज्ञया ते॥ ३॥

आज्ञापयेति॥ हे **पुंसां ज्ञातविशेष** ज्ञातसार। ज्ञातपुंविशेषेत्यर्थः। सापेक्षत्वेऽपि गमकत्वात्समासः॥ **आज्ञापय**। तदिति शेषः। उतरवाक्ये यच्छब्दप्रयोगान्न पूर्ववाक्ये तच्छब्दप्रयोगनिर्बन्धः॥ किं तदित्याह—लोकेषु **ते** तव **यत्करणीयं** कर्तव्यम् **अस्ति**। (**संस्मरण प्रवृत्तं.**) संस्मरणेन प्रवृत्तं उत्पन्नं ते तव **अनुग्रहं** प्रसादम् **आज्ञया** नियोगेन **संवर्धितं** वृद्धिं गामितम् **इच्छामि**। संस्मरणकृतमनुग्रहं केनचिन्नियोगेन वर्धय। क्वाचित्कर्माणि नियुङ्क्ष्वेत्यर्थः। अन्यथा मे नास्ति परितोष इति भावः॥ तुमुन्नन्तपाठे णिजर्थे यत्नः कार्यः॥

Notes.—पुंसां ज्ञातविशेष, 'you who know (correctly) the values of men'. **ज्ञातविशेष** is in voc. case. Anal. ज्ञातः विशेषः (special value) यस्य सः सम्बुद्धौ. **प्रवृत्तं** 'produced from'. Cupid means to say that the lord of gods has done him a favour by merely remembering him and that the favour will be much greater if Indra allowed him an opportunity of rendering some service to him.

Trans.—O you who rightly appreciate the values of men, command what you wish to be done anywhere in the (three) worlds. I would fain see this favour done by you by remembering (me) made greater by (executing) your commands.

अनुवाद—हे पुरुषों की योग्यता को समझनेवाले देव आज्ञा दें जो काम इन तीनों लोकों में आप को अभीष्ट हो। आप ने जो मुझ दास को स्मरण कर के अनुग्रह किया है उसे मैं आप की आज्ञा पालन करके अधिक किया चाहता हूं॥ ३॥

न च मे किंचिदसाध्यमस्तीत्याह—

केनाभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः।
यावद्भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्ती ॥ ४ ॥

केनेति॥ **पदकाङ्क्षिणा** स्वराज्यकामेन **केन** पुंसा **नितान्तदीर्घैः** अतिप्रभूतैः **तपोभिः ते** तव **अभ्यसूया** ईर्ष्या **जनिता**। ब्रूहीति शेषः। किमर्थम्। **यावत्** यतः स भवद्वैरी **आहितसायकस्य** संहितबाणस्य **अस्य मत्कार्मुकस्य** निदेशे वर्तत इति **निदेशवर्ती** आज्ञावशः **भवति**। अविलम्बेनैव भविष्यतीत्यर्थः। वर्तमानसामीप्ये वर्तमानवद्वा इति लट् ॥

Notes.—पदकाङ्क्षिणा, 'aspiring to your dominion'. Anal. पदं काङ्क्षति इति पदकाङ्क्षी, तेन. Indra dreaded overlong austerities and sacrifices of ascetics and kings. He, therefore, sent down nymphs to draw away their minds from penance and used all means to prevent kings from completing the hundredth sacrifice. Cf. Sak. अस्त्येतद् अन्यसमाधिभीरुत्वं देवानाम्; also Indra's carrying away the sacrificial horse of Raghu's father. Ragh. Canto. 3. **आहितसायकस्य,** 'fitted with an arrow'. Anal. आहितः (placed) सायकः यस्मिन् इति आहितसायकः, तस्य. कार्मुक 'a bow', probably because it was made of the wood of the tree *Krimuka* (कृमुक). It is to be distinguished from कार्मुक 'effective' which is derived by Pan. 5. 1. 103. कर्मण उकञ्. **निदेशवर्ती,** 'being within the range (of)'.

Trans.—(Deign to tell me) who, aspiring to your dominion, has roused your indignation by his extreme austerities, and in a moment he will be within the range of my this bow which is fitted with an arrow.

अनुवाद—कहिये आप में, राज्य (छीनने की) कामना करने वाले, किस ने अति दीर्घ तपस्या द्वारा ईर्षाभाव उत्पन्न किया है और क्षण मात्र में वह आपका शत्रु मेरे चिल्ला चढ़े हुए इस धनुष का निशाना होगा ॥ ४ ॥

असंमतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात्प्रपन्नः ।
बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः ॥ ५ ॥

असंमत इति ॥ **तव असंमतः कः (पुनर्भवक्लेशभयात्)** पुनर्भवः पुनरुत्पत्तिः । संसार इति यावत् । तत्र ये क्लेशा जन्मजरामरणादयस्तेभ्यो भयात् **मुक्तिमार्गं प्रपन्नः** तं वद । यत सोऽपि (**आरेचितभ्रूचतुरैः**) आरेचिताभिरेकैकशो विवर्तिताभिर्भ्रूभिश्चतुरैः **सुन्दरीणां कटाक्षैः बद्धः चिरं तिष्ठतु** । आरेचितलक्षणं तु स्याद्भ्रुवोर्ललितादेः पादेकस्या एव रोचितम् । तयोर्मूलसमुत्क्षेपं कौटिल्याद् भ्रूकुटिं विदुः ॥ इति ॥

Notes.—असंमतः, 'enemy'; or as an adj. 'disapproved, despised'. **पुनर्भवक्लेशभयात्**, 'from fear of the sufferings that attend rebirth'. Life is full of misery and trouble and the way to bliss is the way to freedom from rebirth. Anal. see the comm. **मुक्तिमार्गं**, 'the way to final emancipation, the path of beatitude'. **आरेचितभ्रूचतुरैः**, 'captivating with their contracted eye-brows', qualifies कटाक्षैः anal. आरेचिते भ्रुवौ आरेचितभ्रुवौ; ताभ्यां चतुरः (captivating) आरेचितभ्रूचतुरः (कटाक्षः), तैः. In the previous stanza we have the first thought that strikes Cupid. The god, apprehending that Indra's sovereignty of Heaven is in imminent danger from some ambitious soul, naturally wants to get information on this point first. In this stanza he wants to know if there is any undesirable person forcing his way to Heaven by studying Brahma-vidya.

Trans.—Tell me who, your enemy, seeks, fearing the sufferings that attend rebirth, the way to final emancipation, and he will stand for ever chained (to this earthly life) by the sidelong glances, captivating with their contracted eye-brows, of lovely ladies.

अनुवाद—कहिये आप का कौन सा शत्रु पुनर्जन्म के दुःख से डर कर मुक्ति-मार्ग की ओर आया है, वह सुन्दर स्त्रियों के टेढ़े और मनोहर कटाक्षों से सदा के लिये बन्ध जायगा ॥ ५ ॥

धर्मार्थावधिकृत्याह—

अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते ।
कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः ॥ ६ ॥

अध्यापितस्येति ॥ **उशनसा** शुक्रेण **नीतिं** नीतिशास्त्रम् **अध्यापितस्य अपि** । अपिशब्दाच्छुक्रशिष्याणामप्रधृष्यत्वं गम्यते । गतिबुद्धि—इत्यादिना द्विकर्मकादिङ्धातोर्ण्यन्तादप्रधाने कर्मणि क्तः । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः इतिवचनात् । **ते द्विषः** तव शत्रोः **कस्य अर्थधर्मौ** (**प्रयुक्तरागप्रणिधिः**) प्रयुक्तः प्रहितो रागो विषयाभिलाष एव प्रणिधिर्दूतो येन सोऽहम् । प्रणिधिः प्रार्थने चरे इति यादवः । **प्रवृद्धः ओघः** प्रवाहः **सिन्धोः** नद्याः **तटौ इव पीडयामि वद** ॥

Notes.—**उशनसा अपि**, 'even though by उशनस् himself'. Usanas, son of Bhrigu and preceptor of the Asuras is known for the austere tone of religion as taught by him. In the Vedas he is called Usanas 'the wise' (काव्य). His students were known for their stern morality. **प्रयुक्तरागप्रणिधिः**, 'using passion as my emissary'. Anal. रागः एव प्रणिधिः (representative, emissary) रागप्रणिधिः ; प्रयुक्तः रागप्रणिधिः येन, सो (ऽहम्). **प्रवृद्धः** 'swollen' goes with **ओघः** (current).

Trans.—Say of whom, your enemy, shall I, despatching passion as my emissary, resist the wordly and spiritual progress, as the swollen current of a river resists its banks.

अनुवाद—कहिये शुक्र से नीति पढ़ाये हुए आप के किस शत्रु का धर्म और अर्थ इस प्रकार तोड़ दूं जिस प्रकार नदी का प्रवाह तीर को तोड़ देता है ॥ ६ ॥

काममधिकृत्याह—

कामेकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम् ।
नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम् ॥७॥

कामिति ॥ (**एकपत्नीव्रतदुःखशीलां**) एकः पतिर्यस्याः सैकपत्नी पतिव्रता । नित्यं सपत्न्यादिषु इति ङीप् । तस्या व्रतं पातिव्रत्यं तेन दुःखशीलां दुःखस्वभावाम् । दृढव्रतामित्यर्थः । शीलं स्वभावे सद्वृत्ते इत्यमरः । **चारुतया** सुन्दरत्वेन हेतुना **लोलं मनः** त्वच्चित्तं **प्रविष्टां कां नितम्बिनीं** नारीं **मुक्तलज्जां** सतीं **कण्ठे स्वयंग्राहनिषक्तबाहुम्** । स्वयं गृह्णातीति स्वयंग्राहा । विभाषा ग्रहः इति णप्रत्ययः । न च जलचर एव ग्राह इति नियमो जलचरे ग्राह एवेति नियमादिति । स्वयंग्राहा च सा निषक्तबाहुश्च तां तथाभूताम् **इच्छसि** । त्वदर्थं पतिव्रतामपि व्रताद् भ्रंशयिष्यामीत्यर्थः । एतच्चेन्द्रस्य पारदारिकत्वादुक्तम् । तथा च श्रुतिः—अहल्यायै जारः इति ॥

Notes.—**एकपत्नीव्रतदुःखशीलां**, 'to be seduced with difficulty from her vow of faithfulness to her husband alone.' **दुःखशील**, adj. means 'having a difficult temper, hard to manage.' It is in contrast to स्वयंग्राहनिषक्तबाहुम् **नितम्बिनी** . f. 'a woman having beautiful buttocks, a buxom woman.' **स्वयंग्राहनिषक्तबाहुम्** , 'who would twine her (loving) arms of her own free will. Anal. Pan. 3. 1. 143. विभाष ग्रहः declares that √ग्रह 9 U. optionally takes the suffix अ (technically ण). Sid., following Kas., says "तेन जलचरे ग्राहः । ज्योतिषि ग्रहः ॥" It seems, however, that there is still room left for deriving ग्राहः in the sense of 'seizing, catching, taking etc.,' by this very rule. Malli's defence is as ingenious as convincing. स्वयं ग्राहः (meaning 'ग्रहणं') यस्याः सा स्वयंग्राहा 'self-choosing, voluntary ;' निषक्तौ (clinging round) बाहु यस्य सा निषक्तबाहुः, स्वयंग्राहश्च निषक्तबाहुश्च स्वयंग्राहनिषक्तबाहुः f., ताम. This stanza refers to Indra's incontinence. *Vide supra* sl. 1. अदृणां सहस्रम्.

Trans.—What buxom woman, difficult to be seduced from her vow of faithfulness to her husband alone, but who has impressed your incontinent heart by her charms, do you wish to cast off her shame, and twine her (loving) arms voluntarily around your neck ?

अनुवाद—आप सौन्दर्य द्वारा मन में प्रविष्ट हुई किस नितम्बिनी को चाहते हैं कि वह लज्जा त्याग कर स्वयम् इच्छा से आप के कण्ठ में बांहें डाले ॥ ७ ॥

त्रिविधा नायिका। स्वकीया परकीया साधारणी चेति। तत्र परकीयां प्रस्तुत्य। इतरे प्रत्याह—

कयासि कामिन्सुरतापराधात्पादानतः कोपनयाऽवधूतः।
तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम् ॥८॥

कयेति ॥ हे **कामिन्** कामुक **सुरतापराधात्**। अन्यासङ्गादित्यर्थः। **पादानतः** प्रणतः सन्। **कोपनया** कोपनशीलया कया स्त्रिया **अवधूतः** तिरस्कृतः **असि**। **तस्याः शरीरं दृढानुतापं** गाढपश्चात्तापमत एव **प्रवालशय्याशरणं करिष्यामि** इति ॥

Notes.—कामिन्, 'lover'. There is possibly some self-laudation when Kama has been able to call Indra *Kamin* 'partisan of Kama'. सुरतापराधः 'fault in love *i. e.* bestowing affections elsewhere'. कोपना, 'a passionate woman, jealous of her husband making love elsewhere.

Trans.—O Love's partisan, what jealous mistress has spurned you in wrath, though prostrate at her feet, for bestowing affections elsewhere. (Name and) I will fill her with deep remorse, and make her seek a bedding of leaves and blossoms.

अनुवाद—हे कामिन् किस क्रोध भरी स्त्री ने अन्य नारी से किये प्रेम के अपराध (की क्षमा मांगने) के लिये पांव पड़े हुए आप का तिरस्कार किया है? मैं उस के शरीर को मारे पश्चाताप के कोमल फूलों की सेज पर लिटाऊंगा ॥ ८ ॥

प्रसीद विश्राम्यतु वीर वज्रं शरैर्मदीयैः कतमः सुरारिः।
बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥९॥

प्रसीदेति ॥ हे **वीर प्रसीद** प्रसन्नो भव। **वज्रं** कुलिशं **विश्राम्यतु**। उदास्तामित्यर्थः। **मदीयैः शरैः मोघीकृतबाहुवीर्यः** विफलीकृतभुजसारः **कतमः** दैत्यदानवादिषु यः कश्चन **सुरारिः** ॥ वा बहूनां जातिपरिप्रश्ने डतमच् इति डतमच्प्रत्ययः ॥ (**कोपस्फुरिताधराभ्यः**) कोपेन स्फुरिताधराभ्यः स्त्रीभ्योऽपि

बिभेतु । किमु वक्तव्यं पुंभ्य इत्यर्थः । सकृद्भीतः सर्वतो बिभेतीति भावः । भीत्रार्थानां भयहेतुः इत्यपादानत्वात्पञ्चमी ॥

Noets.—कतमः, 'which (of many)'. Cf. कतरः 'which (of two).' मोघीकृतबाहुवीर्यः, 'the prowess of his arms failing (him)'. मोघीकृत, 'rendered barren' is a chvi-formation. Anal. मोघीकृतं बाहुवीर्यं यस्य सः. कोपस्फुरिताधराभ्यः, 'with their lower lips quivering with rage.' प्रसीद, 'be pleased' from प्र√सद् 'to be pleased'.

Trans.—No anxiety, Lord Warrior, let your thunder-bolt have rest. What enemy of the heavenly dominion should quake with fear, his strength of arms rendered useless by my arrows even before (such feeble things as) women with lips quivering with rage.

अनुवाद—हे वीर आप निश्चिन्त रहें और अपने वज्र को विश्राम लेने दें । आप केवल कह दें कि बाहुबल विफल किया कौन देव-शत्रु क्रोध से फरकते निचले होंठों वाली स्त्रियों से भी भय के मारे काँप उठे ॥ ९ ॥

तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा ।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥१०॥

तवेति ॥ किं बहुना **तव प्रसादात्** अनुग्रहात् **कुसुमायुधोऽपि** अतिदुर्बलास्त्रोऽप्यहम् **एकं मधुं** वसन्तम् **एव सहायं लब्ध्वा** (**पिनाकपाणेः**) पिनाकः पाणौ यस्य स पिनाकपाणिः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ । तस्य **हरस्यापि** । हरः पिनाकी चेत्यतिदारुण इति भावः । **धैर्यच्युतिं** धैर्यहानिं **कुर्याम्** । कर्तुं शक्नुयामित्यर्थः । शकि लिङ् च इति शक्यार्थे लिङ् ॥ **अन्ये धन्विनः** धनुर्भृतः **मम के** । न केऽपि इत्यर्थः । किं शब्दः कुत्सायाम् । कुत्साप्रश्नवितर्केषु क्षेपे किंशब्द इष्यते इति शाश्वतः ॥

Notes.—कुसुमायुधः, '(though) having flowers for my weapons'. It is used in contrast to पिनाकपाणेः. Cupid means to say that though he has such frail weapons as flowers to fight with, he can venture to enter into the field even against Siva with his terrible bow पिनाक. पिनाकपाणेः, 'He who carries पिनाक with his

hands', epithet of Rudra-Siva. पिनाक means both 'Siva's bow' and 'Siva's trident', but here the former for Kama says, के मे धन्विनो ऽपरे, Siva being, therefore one of the धन्विन् s. The reference to Siva is significant. Indra entraps Cupid by this very declaration of his competence to fight Siva, and asks him to make his preparation forthwith. Sl. 14.

Trans—By your favour, though I have only flowers for my weapons, I can, taking Spring as my only comrade, stagger the resolve of even Siva of the mighty bow, *Pinaka*. What are, then, other bowmen to me ?

अनुवाद—आप की प्रसन्नता से पुष्पबाणों द्वारा मैं केवल वसन्त को अपना सहायक बनाकर पिनाक हाथ में लिये शिव का भी धैर्य तोड़ सकता हूं और धनुर्धारी तो मेरे सामने हैं ही क्या ॥ १० ॥

अथोरुदेशादवतार्य पादमाक्रान्तिसंभावितपादपीठम् ।
संकल्पितार्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे ॥११॥

अथेति ॥ **अथ** स्मरवाक्यश्रवणानन्तरम् । **आखण्डलः** सहस्राक्षः **उरुदेशात् पादम्** (**आक्रान्तिसंभावितपादपीठम्**) आक्रान्त्या आक्रमेणानंसभावितं पादपीठं यस्मिंस्तद्यथा तथा **अवतार्य संकल्पितार्थे** हरचित्ताकर्षणरूपे विषये **विवृतात्मशक्तिम्** कुर्यां हरस्यापि—इत्यादिना प्रकटीकृतस्वसामर्थ्यं **कामं** स्मरम् **इदं** वक्ष्यमाणं **बभाषे** ॥

Notes.—**आक्रान्तिसंभावितपादपीठम्**, adv. 'gracing the footstool by resting (his foot on it)'. It was an honour done to stool that Indra placed his foot upon it. पीठ is Panj. पीढा. Anal. आक्रान्त्या संभावितं पादपीठं यस्मिंस्तद् यथा तथा. **विवृतात्मशक्तिम्**, goes with काम 'who had declared his power'. Anal. विवृता आत्मनः शक्तिः येन तम् . **आखण्डलः**, 'Indra; lit. destroyer'.

Trans—Then taking down his leg from his thigh, and gracing the footstool (the while) by resting (his foot) upon it, Indra spoke as follows to Kama,

who had declared his competence for the end he (Indra) had in his mind.

अनुवाद—तब इन्द्र ने अपनी जङ्घा से पाँव उतारा और चौकी पर रखकर उसे सम्मानित किया। फिर उस ने इष्ट विषय के सम्बन्ध में अपना सामर्थ्य स्पष्ट कह चुके काम से इस प्रकार कहा ॥ ११ ॥

सर्वं सखे त्वय्युपपन्नमेतदुभे ममास्त्रे कुलिशं भवांश्च ।
वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च ॥१२॥

सर्वमिति ॥ हे **सखे**। सखे इति संबोधनं गौरवार्थम्। **सर्वमेतत् त्वयि उपपन्नं** सिद्धम् **मम कुलिशं** वज्रं **भवान् च उभे अस्त्रे**। तत्र **वज्रं (तपोवीर्यमहत्सु)** तपोवीर्येण तपोबलेन महत्सु प्रबलेषु **कुण्ठं** प्रतिबद्धप्रसरम्। **त्वम्** अत्रं **सर्वगामि च साधकं च**। तापसेष्वप्यकुण्ठमित्यर्थः ॥

Notes.—**सखे**, 'My friend.' Mark how Indra flatters Cupid by calling him (Cupid) his friend. **कुलिशं**, 'the thunder-bolt (of Indra)', paraphrased in the next line by **वज्रं**. **तपोवीर्यमहत्सु**, 'against those formidable with the power of penance.' Anal. तपसः वीर्यं तपोवीर्यं, तेन महान् तपोवीर्यमहान्, तेषु. **सर्वतोगामि**, 'having access everywhere', qualifies त्वं (neu.) standing for अस्त्रम्.

Trans.—All this, my friend, is possible with you; (now) mine are two weapons, (my) thunder-bolt and yourself. But my thunder-bolt does not operate against those formidable with the power of penance, while you have access everywhere, and can accomplish the task.

अनुवाद—हे मित्र ये समग्र शक्तियां तुझ में सिद्ध हैं। दो मेरे अस्त्र हैं—वज्र और तू। परन्तु मेरा वज्र तपश्चर्या में वृद्ध तपस्वियों के प्रति कुण्ठ होता है और तू निरर्गलता से सब स्थानों पर जाता और कार्य्य सिद्ध करता है ॥ १२ ॥

अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये ।
व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः ॥ १३ ॥

अवैमीति ॥ हे सखे ते सारं बलम् **अवैमि** जाने। **अतः खलु** अत एव

आत्मसमं मत्तुल्यं **त्वां गुरुणि** महति **कार्ये**–तस्मै हिमाद्रेः—(३।१६) इति वक्ष्यमाणे **नियोक्ष्ये** । स्वराद्यन्तोपसर्गादिति वक्तव्यम् इति वार्तिकादात्मनेपदनियमः । तथा हि । सारपरीक्षापूर्वक एव सर्वत्र नियोग इत्याह–**कृष्णेन** विष्णुना धरतीति धरः पचाद्यच् । भुवो धरो भूधरस्तस्य भावस्तत्तां **भूधरताम्** । भूधरणशक्तिमित्यर्थः । **अवेत्य** ज्ञात्वा **शेषः** सर्पराजो **देहोद्वहनाय** स्वदेहमुद्वोढुम् । क्रियार्थोपपदस्य –इत्यादिना चतुर्थी । **व्यादिश्यत** नियुज्यते । शेषशायी हि भगवान् ॥

Notes.—अवैमि ते सारम् , ' I know your power. ' अव√इ ' to know , to understand .' कार्ये गुरुणि नियोक्ष्ये, ' I will employ you in a weighty affair .' Indra means to say that it would be simply an injustice to Kama to employ him in a trifling matter unworthy of him. He lends point to his argument by citing the case of Sesa. शेषः, ' the Serpent King said to be the supporter of the earth and forming the couch of Visnu. He has one thousand heads. ' भूधरताम् , ' capacity to prop up the earth. ' भूधर is used in its literal sense of ' the supporter of the earth ', not that of ' a mountain. ' Anal. धरति इति धरः (supporter , bearer) भुवः धरः भूधरः तस्य भावः भूधरता ,ताम् .

Trans.—I know your power ; hence it is that I employ you, the equal of myself , in an undertaking of gravity. (Mark that) Krisna has charged Sesa , seeing that he had capacity to prop up the earth , to make him a couch to recline his limbs upon.

अनुवाद—मुझे तेरा बल विदित है इसी लिये अपने तुल्य तुझ को, मैं एक महान् कार्य्य में लगाया चाहता हूं । जब विष्णु ने देख लिया कि शेषनाग समग्र भूमि का भार उठाये हुए है तो उसने अपना शरीर ऊपर उठवाये रखने के लिये उसे (शेषनाग को) नियुक्त किया ॥ १३ ॥

नियोगाङ्गीकारं सिद्धवत्कर्तुमाह—

आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम् ।
निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव ॥ १४ ॥

आशंसतेति ॥ **वृषाङ्के** हरे **बाणगतिं** बाणप्रसरम् **आशंसता** कथयता । कुर्यां हरस्यापि पिनाकपाणेः (३।१०) इत्यादिनेति शेषः । **त्वया नः** अस्माकं **कार्यं प्रतिपन्नकल्पम्** अङ्गीकृतप्रायम् । ईषदसमाप्तौ–इत्यादिना कल्पप्प्रत्ययः । कथमेतदत आह—**इदानीं** उच्चैः उन्नता द्विषो येषां तेषाम् **उच्चैर्द्विषां यज्ञांशभुजां** देवानाम् । एतेन द्विषल्लुप्तयज्ञभागत्वं सूच्यते । **ईप्सितम्** आप्तुमिष्टम् **एतदेव** हरेः बाणप्रयोगरूपमेव **निबोध** । हरायत्तं बुध्यस्वेत्यर्थः । बुधबोधने इति धातोर्लोट् । अत्र आंशसता प्रार्थयमानेन इति नाथव्याख्यानमनाथव्याख्यानम् । आङ् पूर्वयोः शास्तिशंसत्ये रिच्छार्थत्वे आत्मनेपदनियमात् । याच्ञार्थत्वस्याप्रामाणिकत्वात् कुर्यां हरस्यापि—(३।१०) इत्यत्रानयोरभावादयोगाच्चेति ॥

Notes.—**प्रतिपन्नकल्पम्**, 'well nigh done' (*i*), 'almost undertaken' (*ii*); both the senses are suitable. Anal. The suffix—कल्प is used after nouns, adjectives, and even verbs in the sense of 'a little less than', 'almost', 'nearly equal to', etc. Pan. 5. 3. 67. **यज्ञांशभुजाम्**, 'of gods', lit. 'of the enjoyers of the portion of sacrifice'. The use of this word implies that the gods were losing even their shares of sacrifices through the demon's tyranny. **उच्चैर्द्विषाम्**, 'who have formidable enemies'. Anal. उच्चैः द्विषः येषां ते उच्चैर्द्विषः, तेषाम्. **ईप्सितम्**, 'the object desired to be attained', p. p. p. from the desiderative of √आप् 'to attain'.

Trans.—By declaring the Bull-deviced god (Siva) within the reach of your missile you have almost undertaken our task. Know (then) that of the gods, who have formidable enemies, this is the very immediate object.

अनुवाद—महादेव पर अपने बाण की गति कहते ही तूने हमारा काम स्वीकार कर लिया है । जान लो कि यज्ञ भाग के भोग करने वाले देवताओं के सन्मुख, जिन के शत्रु इस समय बड़े बली है (और जिन का यज्ञ भाग वे छीन ले जाते है), यही काम है ॥ १४ ॥

किं तत्कार्यं कथं वा तस्य हरायत्तत्वं कुतो वा मदपेक्षेत्यत्राह—

अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः।
स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा॥१५॥

अमी इति॥ हि यस्मात् **अमी देवाः जयाय** शत्रुजयार्थं **भवस्य** हरस्य **वीर्यप्रभवं** तेजःसंभूतं **सेनान्यं** सेनापतिम् **उशन्ति** कामयन्ते। वश कान्तौ इति धातोर्लट्। ब्रह्मणां सद्योजातादिमन्त्राणामङ्गानां हृदयादिमन्त्राणां भूः स्थानं **ब्रह्माङ्गभूः**। कृतमन्त्रन्यास इत्यर्थः। **ब्रह्मणि** निजतत्त्वे। वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा इत्युभयत्राप्यमरः। **योजितात्मा** नियमितचित्तः। मन्त्रन्यासपूर्वकं ब्रह्म ध्यायन्नित्यर्थः। **स भवः च (त्वदेकेषुनिपातसाध्यः)** त्वदेकेषोस्तवैकबाणस्य निपातेन साध्यः। अनन्यसाध्योऽस्मिन्नवसर इति भावः॥

Notes.—**अमी,** masc. nom. plu. of अदस्. **उशन्ति,** 'wish', लट् 3rd per. plu. from √वश् 2. P. 'to wish, to desire'. The root is more frequently used in the Vedic literature. ब्रह्माङ्गभूर् ब्रह्मणि योजितात्मा, depicts the intense concentration of Siva; and is meant to contrast with एकेषुनिपातसाध्यः. The meaning has been correctly brought out in the following two lines by Griffith :—

But all his mind with holiest lore is fraught;
Bent on the Godhead is his every thought.

Gr. Bw. P. 23.

ब्रह्मन् covers the principal division, अङ्ग the subordinate and supplementary division, of mantras. भूः means 'the seat'. MW follows Malli. See the comm. **एकेषुनिपातसाध्यः,** 'who may be subdued by (your) discharging a single arrow'. For anal. see the comm.

Trans.—The gods (sorely) need a commander of their forces born from the seed of Siva to conquer (their enemy); and he can be conquered by your discharging a single arrow, even though his soul is linked in communion to Brahman, and he himself is the seat of mantras principal and subordinate.

अनुवाद—इसी लिये वे देवता तारक पर विजय प्राप्त करने के लिये शिवजी महाराज के वीर्य्य से उत्पन्न हुआ सेनापति चाहते हैं और ब्रह्म में चित्त लगाये हुए और मन्त्रजाप कर रहे महादेव जी को तू एक वाण से अपने वश में कर सकता है ॥ १५ ॥

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व ।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ॥ १६ ॥

तस्मा इति ॥ **यतात्मने** नियतचित्ताय **तस्मै** भवाय । रुच्यर्थानां प्रीयमाणः इति संप्रदानत्वाच्चतुर्थी । **प्रयतां हिमाद्रेस्तनूजां** पार्वतीं . **रोचयितुं यतस्व** । भवितव्यं चात्र पार्वत्यैवेत्याह–**योषित्सु** स्त्रीषु मध्ये । यतश्च निर्धारणम् इति सप्तमी । **क्षमा** शक्ता (**तद्वीर्यनिषेकभूमिः**) तस्य हरस्य वीर्यं रेतः तस्य निषेकः क्षरणं तस्य भूमिः क्षेत्रं **सा** पार्वती **एव इति आत्मभुवा** ब्रह्मणा **उपदिष्टम्** । उभे एव क्षमे वोढुम् (२।६०) इत्यादिनोक्तमित्यर्थः ॥

Notes.—**प्रयतां तनूजां**, 'the pious daughter' (of Himalaya) *Vide supra* Canto 1. 26. et 58. **क्षमा तद्वीर्यनिषेकभूमिः**, 'the proper soil for the scattering of his seed'. *Vide supra* 2. 60. For anal. see the comm.

Trans.—(Now) strive to make the pious daughter of Himalaya please the fancy of him, who is engaged in austerities, for among women she alone has been declared by the self-existent god (Brahman) as the proper soil for the scattering of his seed.

अनुवाद—ऐसा यत्न करो जिस से तपस्या में चित्त लगाये महादेव जी यम-नियम में लगी हुई शैल-पुत्री को पसन्द करें। वह शैल-पुत्री अपने पिता के कहने से पर्वत की उच्च-भूमि पर तपस्य कर रहे शिव जी की सेवा कर रही है ऐसा मैंने अपसरायों के मुख से सुना है क्यों कि वह अपसरायें मेरी गुप्त-चर हैं ॥

सापीदानीं सन्निकृष्टैव तस्येत्याह—

गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम् ।
अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः ॥ १७॥

गुरोरिति ॥ **नगेन्द्रकन्या** पार्वती **च गुरोः** पितुः **नियोगात्** शासनात् **अधित्यकायां** हिमाद्रेरूर्ध्वभूमौ । भूमिरूर्ध्वमधित्यका इत्यमरः । उपाविश्यां त्यक्तन्नास-

न्नारूढयोः इति त्यकन्प्रत्ययः । **तपस्यन्तं** तपश्चरन्तम् । कर्मणो रोमन्थतपोभ्यां वर्तिचरोः इति क्यङ्प्रत्ययः । ततः शतृप्रत्ययः ॥ **स्थाणुं** रुद्रम् । **अन्वास्ते** उपास्त इत्यर्थः । इति **इदं मया अप्सरसां मुखेभ्यः श्रुतम्** । न चैतदैतिह्यमात्रमित्याह—**स वर्गः** सोऽप्सरसां गणः **मत्प्रणिधिः** मम गूढचरः । प्रणिधिः प्रार्थने चरे इति यादवः ॥

Notes.—गुरोः नियोगात्, 'at her father's bidding.' *Vide supra* 1. 58. स्थाणुं 'the lasting one' as an epithet of Siva. Cf. Vik. 1. 1. स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः. √तपस्य्, 'to practise austerities' is a denominative verb formed from the noun तपस् n. 'austerities.' Pan. 3. 1. 15. कर्मणो रोमन्थ-तपोभ्यां वर्ति-चरोः ॥ अधित्यकायाम्, 'on the table-land.' Anal. अधि+त्यक (न्) f. Pan. उपाधिभ्यां त्यकन् आसन्नारूढयोः. So also उपत्यका f. 'a footland'. अन्वास्ते, 'waits upon.' अप्सरस्, f. (usually in plural). "A class of female divinities or celestial damsels who reside in the sky, and are regarded as the wives of the Gandharvas. They are very fond of bathing, can change their shapes, and are endowed with super-human power (प्रभाव). They are called स्वर्वेश्याः, and are usually described as servants of Indra." V. S. Apte. The traditional view as regards the analysis of the word is that it is derived from the noun अप् f. 'water' and सर् 'to move.' Such is the analysis accepted by the Ramayana and the Brahmanas. Pischel too once maintained this derivation. "The first component member of the word contains, therefore, the word अप्. The Prakrit from अच्छरा even points to this." (Vedische Studien. Erster Band. P. 79.). Later on, however, he gave up this view. "That my earlier explanation of apsaras (Vedische Studien 1, 79) is false, I have admitted long before (ZDMG. 51,596). Weber

(Indische Studien 13,135) is right. The Apsaras are 'formless' only so far as they can assume their form at will. [Dass meine frühere Erkälrung aus ap-saras (Vedische Studien) falsche ist , habe ich lângst zuzugeben (ZDMG. 51,596). Weber (Indische Studien 13, 135) wird Recht haben. 'Gestaltlos 'sind die Apsaras nur insoweit, als sie alle Gestalten nach Belieben annehmen können.] (Pischel.) Ved. St. p. 97. अप्सरस् is to be explained as अ-पसरस् ' formless , having no definite form, changing form at will. ' In favour of this explanation compare Rig. 1. 168. 9b ते सप्सरासोऽजनयन्त . मत्प्रणिधिः, ' my spies '. See the extract from V. S. Apte above.

Trans.—And the daughter of the Sovereign of the Mountains is by her father's bidding, waiting upon the immovable one (Siva) practising austerities on some (Himalayan) peak,—this have I heard from the lips of Apsaras , for that band is my spies.

अनुवाद—इस प्रकार यत्न कर जिस से समाधिस्थ वे, यमनियम में लगी हिमालय की पुत्री, पार्वती चाहने लगें। स्त्रियों के मध्य में उनके वीर्य्य के गिरने के लिये वह ही योग्य भूमि है—ऐसे ब्रह्मा ने कहा है ॥ १६ ॥

अनुवाद—और शैल पुत्री अपने पिता की आज्ञा से (इस समय) हिमालय पर्वत के उच्च शिखर पर तपस्या कर रहे शिवजी महाराज की सेवा कर रही है—यह मैंने अप्सरायों के मुख से सुना है क्योंकि वे अप्सरायें मेरी गुप्तचर है ॥ १७ ॥

तद्गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव।
अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ॥ १८ ॥

तद्दिति ॥ **तत्** तस्मात् **सिद्ध्यै** कार्यसिद्ध्यर्थं **गच्छ** । **देवकार्यं कुरु** । आशिषि लोट् ॥ **अयमर्थः** प्रयोजनम् **अर्थान्तरभाव्यः** कारणान्तरसाध्यः **एव** । तच्च कारणान्तरं पार्वतीसंनिधानमिति भावः । अर्थः प्रकारे विषये वित्तकारणवस्तुषु । अभिधेये च शब्दानां वृत्तौ चापि प्रयोजने ॥ इति विश्वः ॥ तथापि बीज-

साध्यः अङ्कुरः **बीजाङ्कुरः उदयात्** उत्पत्तेः **प्राक् अम्भः इव त्वाम् उत्तमं प्रत्ययं** चरमं कारणम् **अपेक्षते** ॥ प्रत्ययोऽधीनशपथज्ञानाविश्वासहेतुषु। इत्यमरः। तस्मादस्मिन्नर्थे तव चरमसहकारित्वादनन्यसाध्योऽयमर्थ इति भावः ॥

Notes.—**अयम् अर्थः**, 'this enterprise' refers to getting a general to lead the divine army. **अर्थान्तरभाव्यः** 'to be effected by (the attainment of) another end;' 'another end' refers to attracting the mind of Siva. Anal. अन्यः अर्थः अर्थान्तरं, तेन भाव्यः. भाव्यः is from the caus. of भू 'to be'. **प्रत्ययः** means here 'the cause'. **अम्भस्**, n. 'water.'

Trans.—Hence Kama go to execute this mission and perform the gods' enterprise. This end is to be reached by (the accomplishment of) another end; it needs you as its root cause, as the shooting forth of a seed needs water before it appears above ground.

अनुवाद—पस तू प्रयोजन-सिद्धि के लिये जा और देवताओं का कार्य्य कर। इस देवकार्य्य ने एक अन्य कार्य्य द्वारा सिद्ध होना है। बीजाङ्कर फूटने से पहिले जिस प्रकार जल की अपेक्षा होती है इसी प्रकार कार्य्य सिद्ध होने से पूर्व तेरी आवश्यकता है ॥ १८ ॥

तस्मिन्सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम् ।
अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥ १९ ॥

तस्मिन्निति ॥ **सुराणां विजयाभ्युपाये** जयस्योपायभूते **तस्मिन्** हरे **अस्त्रगतिः** अस्त्रप्रसरः **तव एव नाम** ॥ नामेति संभावनायाम् । अन्येषां तु संभावनापि नास्तीति भावः । अतः **त्वम् कृती** कृतमस्यास्तीति कृती कृतार्थः। तथा हि। **अप्रसिद्धम् अपि अनन्यसाधारणम् कर्म एव पुंसां यशसे हि।** इदं तु प्रसिद्धमसाधारणं चेत्यतियशस्करमिति भावः ॥

Notes.—**कृतिन्**, 'fortunate'. **अनन्यसाधरणम्**, 'not common to others; which distinguishes the doer'. **अभ्युपायः**, 'the way; the approach, to' from अभ्युप √इ 'to approach, to reach.'

Trans.—Your shaft alone can hit him (Siva), the approach to our victory ; you are lucky , indeed. An act , though not great (in itself), becomes the reputation of men (who do it), if it is not imitable by others.

अनुवाद—कि देवताओं की विजय का उपाय बने उनके प्रति तेरे ही अस्त्र की पहुंच है—यह तेरा सौभाग्य है । क्योंकि दूसरों से न हो सकने वाला अप्रसिद्ध भी कार्य्य मनुष्य को यश का देने वाला होता है ॥ १९ ॥

प्रोत्साहनार्थं स्तौति—

सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम्।
चापेन ते कर्म न चातिहिंस्रमहो बतासि स्पृहणीयवीर्यः ॥२०॥

सुरा इति । **एते सुराः समभ्यर्थयितारः** याचितारः । **कार्यं** प्रयोजनं **त्रयाणां विष्टपानामपि** संबन्धि । सर्वलोकार्थमित्यर्थः । **कर्म ते** तत्र **चापेन** । न त्वन्यंनेति भावः । **अतिहिंस्रम्** अतिघातुकं **च न** । **अहो बत** इति संबोधने । अहो बतानुकम्पायां खेदे संबोधनेऽपि च । इति विश्वः ॥ अथ वा अहो आश्चर्ये । बतेत्यामन्त्रणे सन्तोषे च इति । बतामन्त्रणसन्तोषखेदानुक्रोशविस्मये इति विश्वः । **स्पृहणीयवीर्यः असि** आश्चर्यविक्रमोऽसि ॥ आश्चर्यं स्पृहणीयं च इति । नानार्थकोशः ॥

Notes.—In this stanza Indra describes the importance of the undertaking and the ease with which it will be accomplished, and thus prepares Cupid to under take the business. **समभ्यर्थयितारः** ' humble petitioners', from समभि √अर्थ् 'to beseech, to humbly petition .' **विष्टपानाम्,** ' of the worlds '. The word is probably formed from वि √स्तभ् ' to prop, to support ', and means ' the part supported, the vault of heaven; Heaven ; and then any world indifferently'. **अतिहिंस्रम्,** ' not very bloody.' Cf. Raghu. 5. 57....यतः प्रयोक्तुर् न चारिहिंसा विजयश्च हस्ते. **अहो बत** is **an exclamation of wonder.**

Trans.—These gods stand (in this matter) as your humble petitioners, and on thy undertaking (depends the security) of the three worlds; the work is that of your bow, and the business not very bloody. Marvellous indeed! your power is enviable.

अनुवाद—ये सब देवता तेरे याचक हैं, कार्य्य से तीनों लोकों का हित होता है, और धनुष् से केवल तुझे प्रयोजन है और कोई अधिक हिंसा नहीं। अहो अद्भुत तेरा पराक्रम ॥ २० ॥

मधुश्च ते मन्मथ साहचर्यादसावनुक्तोऽपि सहाय एव ।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य ॥ २१ ॥

मधुरिति । हे **मन्मथ** ॥ **असौ मधुः च** वसन्तोऽपि **ते साहचर्यात्** सहचरत्वात् **एव अनुक्तः अपि** अप्रेरितोऽपि **सहायः** सहकारी **एव** । तथा हि । **समीरणः** वायुः **हुताशनस्य** अग्नेः **नोदयिता** प्रेरकः **भव इति केन व्यादिश्यते** ॥ अत्र मधुसमीरणयोरुक्तिमन्तरेण सहायताकरणं सामान्यधर्मः । स च वाक्यद्वये वस्तुप्रतिवस्तुभावेन पृथग्निर्दिष्ट इति प्रतिवस्तूपमालंकारोऽयम् । तदुक्तम्—यत्र सामान्यनिर्देशः पृथग्वाक्यद्वये यदि । गम्यौपम्याश्रिता सा स्यात्प्रतिवस्तूपमा मता ॥ इति ॥

Notes.—**मन्मथ**, 'O troubler of the heart (*i.e.* O Love)'. Dandin reads as the first member of the compound **मद्** 'I' *i.e.* अस्मद्. says he : मन्मथो मां मथ्नन् निजनाम सान्वयं करोति Das. 21. **समीरणः**, 'wind', is very appropriately used here. It paraphrases **नोदयिता** 'stirrer'. Anal. समीरयति इति. नोदयिता is derived from नुद् 'to stir, to impel'. **हुताशनः**, 'fire' (lit. consumer of the sacrificial offerings.) The friendship of wind and fire is frequently alluded to in Sanskrit literature. Cf. Raghu. 3. 37. विभावसुः सारथिनेव वायुना (*i.e.* like the fire by his companion the wind).

Trans.—O troubler of the heart, spring is, even though unasked, your comrade through companionship. Who ever says to wind, "Be the stirrer of the flame".

अनुवाद—हे काम ! और बिना कहे भी मधु साथी होने से तेरा सहायक ही है । भला किस ने कभी वायु से कहा है "अग्नि को प्रदीप्त कीजिए" ॥ २१ ॥

तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे ।
ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः ॥ २२ ॥

तथेति ॥ **तथा अस्तु इति भर्तुः** स्वामिनः **शेषाम् इव** प्रसाददत्तां मालामिव । प्रसादान्निजनिर्माल्यदाने शेषेति कीर्तिता । इति विश्वः ॥ माल्याक्षतादिदाने स्त्री शेषा इति वैजयन्तीकेशवौ । **आज्ञां मूर्ध्ना आदाय** शिरसा गृहीत्वा **मदनः प्रतस्थे** । समवप्रविभ्यःस्थ इत्यात्मनेपदम् । **इन्द्रः** (**ऐरावतास्फालनकर्कशेन**) एरावतास्फालनेन प्रोत्साहनार्थेन ताडनेन कर्कशेन परुषेण **हस्तेन तदङ्गं** मदनदेहं **पस्पर्श** । हस्तस्पर्शेन संभावयामासेत्यर्थः । शेषामिवाज्ञाम् इत्यत्र साधकबाधकप्रमाणाभावादुपमोत्प्रेक्षयोः संदेहसङ्कर इति । यदि भर्त्रा शेषापि दत्ता तदा तामाज्ञामिवेत्युपमा । अथ न दत्ता तर्हि शेषात्वेनोत्प्रेक्षिता । शेषादानं तु सन्दिग्धमिति ॥

Noets.—**शेषा,** f. 'a garland or a crown of flowers'. **प्रतस्थे**, लिट् 3rd per. sing. from प्र√स्था 'to set out, to start'. √स्था takes the middle voice after the preposition सम्, अव, प्र, and वि. Pan. 1. 3. 22. सम्-अव-प्र-विभ्यः स्थः. **आस्फालनम्**, 'patting (the elephant)'. Indra patted his elephant, and so his hand became rough.

Trans.—Saying 'be it so' Kama accepted his lord's command, as if it were a flowery crown, by (bowing) his head and started; and Indra touched his body with his hand grown rough by patting (his elephant) Airavata.

अनुवाद—जैसे आप की आज्ञा हो—इन शब्दों में स्वामी की आज्ञा को पुष्पमाला मान मस्तक पर धर वहां से चल पड़ा और इन्द्र ने एरावत की पीठ ठोकने के कारण कर्कश हुए हाथ से काम के (कोमल) अङ्गों को छूआ ॥ २२ ॥

स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः ।
अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम ॥ २३ ॥

स इति ॥ **स** मदनः **अभिमतेन** प्रियेण **सख्या** सुहृदा **माधवेन** वसन्तेन

रत्या स्वदेव्या च साशङ्कं संकटमापतितमिति सभयम् अनुप्रयातः सन्। तथा (अङ्गव्ययप्रार्थितकार्यसिद्धिः) अङ्गस्य व्ययेनापि प्रार्थिता कार्यसिद्धिर्येन स तथोक्तः। शीर्त्वा मृत्वापि सर्वथा देवकार्यं साधयिष्यामीति कृतनिश्चयः सन्नित्यर्थः। हैमवतं हिमवति भवं (स्थाण्वाश्रमं) स्थाणो रुद्रस्याश्रमं जगाम ॥

Notes.—साशंकम्, adv. 'apprehending evil'. आशंका, f. means 'apprehension, misgiving'. अङ्गव्ययप्रार्थितकार्यसिद्धिः, 'who sought the success of his enterprise even at the cost of his life'. Anal. अङ्गस्य व्ययः (cost) अङ्गव्ययः,तेनापि प्रार्थिता कार्यसिद्धिः येन सः. हैमवतं, 'of Himalaya'. Anal. हिमवति भवः हैमवतः (आश्रमः). Pan. 4. 3. 53. तत्रभवः.

Trans.—Accompanied by his dear friend, Spring, and by Rati apprehending evil (all the time), he bent his footsteps towards the hermitage of Siva, determined to accomplish the task even at the cost of his life.

अनुवाद—उसका प्रिय मित्र वसन्त और मन में अति दुःखित सहधर्मिणी रति पीछे पीछे काम के साथ हो लिये। आगे आगे अपना जीवन बलिदान करने से भी सफलता प्राप्त करने का संकल्प किये मदन हिमालय पर्वत पर बने शिवजी के डेरे की ओर चला ॥ २३ ॥

तस्मिन्वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती।
संकल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे ॥ २४ ॥

तस्मिन्निति ॥ तस्मिन्वने स्थाण्वाश्रमे संयमिनां समाधिमतां मुनीनां (तपःसमाधेः) तपसः समाधेरेकाग्रतायाः प्रतिकूलं वर्तत इति प्रतिकूलवर्ती विरोधी मधुः वसन्तः संकल्पयोनेः मनोभवस्य अभिमानभूतम्। गर्वहेतुभूतमित्यर्थः। कार्यकारणयोरभेदोपचारः। आत्मानं निजस्वरूपम् आधाय संनिधाय जजृम्भे प्रादुर्बभूव वसन्तधर्मान् प्रवर्तयामासेत्यर्थः ॥

Notes.—प्रतिकूलवर्ती, 'acting in opposition'. Anal. प्रतिकूलं वर्तते इति. संकल्पयोनि, 'originating in mind i. e. love'. Cf. मनसिज 'love'. The simple meaning is that asceticism was becoming difficult owing to the

beauty of the Spring season awakening the amative sense.

Trans.—In that grove Spring revealed his power, which was the pride of the mind-born, at his best, affecting adversely the meditation of the ascetic saints.

अनुवाद—उस बन में समाधिस्थ मुनियों की तपएकाग्रता पर प्रतिकूल प्रभाव डालने वाले वसन्त ऋतु ने, जो मानो मदन का अभिमान रूप था अपना सौन्दर्य प्रकट किया ॥ २४ ॥

वसन्तधर्मानाह —

कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य ।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिःश्वासमिवोत्ससर्ज ॥२५॥

कुबेरेति ॥ **उष्णरश्मौ** सूर्ये साहसिके च नायके **समयं** दक्षिणायनकालं संगमकालं च **विलङ्घ्य** अकाण्डे व्यतिक्रम्य **कुबेरगुप्तां** धनपतिपालितां कुत्सितशरीरेण केनचिद्रक्षितां च **दिशम्** उदीचीं स्त्रीलिङ्गाद्दिष्टां कांचिन्नायिकां च **गन्तुं** चलितुं संगन्तुं च **प्रवृत्ते** सति **दक्षिणा दिक्** दाक्षिण्यवती नायिका च **मुखेन** अग्रभागेन वक्त्रेण च । वहतीति वहः । पचाद्यच् । गन्धस्य वहं **गन्धवहम्** अनिलं व्यलीकेन दुःखेन निश्वासस्तं **व्यलीकनिःश्वासमिव** । दुःखे वैलक्ष्ये व्यलीकमप्रियाकार्यवस्तुनोः । इति वैजयन्ती । **उत्ससर्ज** प्रवर्तयामास । स्वभर्तरि समयोल्लङ्घनेन पराङ्गनासङ्गतिं प्रवृत्ते सति स्त्रियो दाक्षिण्यादकिंचिद्वदा दुःखान्निश्वसन्तीति भावः । उत्तरायणे सति मलयानिलाः प्रवृत्ता इति वाक्यार्थः अत्रोत्प्रेक्षालंकारः । न च समासोक्तिरेवेयमुत्प्रेक्षानुप्रविशतीति शङ्कितव्यम् । केवलविशेषणसामर्थ्यादेवाप्रस्तुतप्रतीतौ सोक्तिरेव । अत्र तु दक्षिणेति विशेष्यसामर्थ्यादपि नायिका प्रतीयते । न च श्लेष एव प्रकृताप्रकृतविषयः उभयश्लेषे श्लिष्टविशेष्यानङ्गीकारात् तस्माच्छब्दशक्तिमूलोऽयं ध्वनिः । स च व्यलीकनिःश्वासरूपचेतनधर्मसंभावनार्थं दक्षिणस्या दिशो नायिकया सहाभेदमासादयन्नभेदलक्षणातिशयोक्त्युपजीविनीं निश्वासमिवेति वाच्योत्प्रेक्षां निर्वहतीति वाच्याङ्गभूत इत्युत्पश्यामः ॥

Notes.—**कुबेरगुप्तां दिशम्**, 'towards the direction protected by Kubera (*i. e.* the north).' For Kubera as the गोप्ता 'King of the North' *vide supra* 2. 21.

उष्णरश्मि, m. 'the sun, lit. the hot-rayed one'. Anal. उष्णः रश्मिर् यस्य. समयं विलंघ्य, 'disregarding the proper season'. The idea of these lines is that it was not the time of Spring, but when Madhu made his appearance there the season underwent a change all at once. The sun shifted to the north, the southern breeze from the Malaya Hills wafted fragrance to the northern climes, and trees and plants which were thirsting for rain became all of a sudden laden with flowers and fruits. गन्धवहः, 'wind'. This word is used to signify that the southern breeze carried fragrance to the north. व्यलीकनिःश्वासम् 'sigh of anguish.' These lines imply also something more. उष्णरश्मिः 'the sun' is the fickle-minded hot-headed, youthful lover 'समय is (the time of) engagement,' and दक्षिणा दिक् 'a faithful mistress doting on her lover.' Sl. 25-34 describe the advent of Spring.

Trans.—As the burning-rayed sun commenced moving towards the direction under the protection of Kubera (*i. e.* the North), the Southern direction sent forth a breeze laden with scent, as if it were a sigh of anguish, from its mouth.

—(The implied sense.) A faithful and lovely mistress, feeling the indignity, heaved a sigh of anguish spreading about fragrance, when her sweetheart broke the tryst, and went to court another lady (more) favoured by fortune (than beauty).

अनुवाद—तब समय का उल्लंघन कर तीक्ष्ण किरणों वाले सूर्य ने धनपति कुबेर से रक्षित उत्तर दिशा को चलना आरम्भ किया, उस समय दक्षिण दिशा ने अपने मुख से सुगन्धित वायु के रूप में मानो दुःखपूर्ण निःश्वास छोड़ा ॥ २५ ॥

असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि।
पादेन नापैक्षत सुन्दरीणां संपर्कमासिञ्जितनूपुरेण॥ २६॥

असूतेति॥ **अशोकः** वृक्षविशेषः **सद्यः स्कन्धात्** प्रकाण्डात् **प्रभृत्येव** स्कन्धादारभ्येत्यर्थः। भाष्यकारवचनात्प्रभृतियोगे पञ्चमीति कैयटः। भाष्यं च मूलात्प्रभृत्यग्रादत्रत्नांस्तद्गुणवन्ति इति। कार्तिक्याः प्रभृत्याग्रहायणी मासे। इत्यादि। **सपल्लवानि कुसुमानि असूत।** उभयमप्यजीजनदित्यर्थः। (**आसिञ्जितनूपुरेण**) आसिञ्जितो नूपुरो यस्य तेन। सिञ्जधातोरकर्मकात् गत्यर्थाकर्मक-इत्यादिना कर्तरि क्तः। **सुन्दरीणां पादेन संपर्कं** ताडनं **न अपैक्षत**। सनूपुररवेण स्त्रीचरणेनाभिताडनम्। दोहदं यदशोकस्य ततः पुष्पोद्गमो भवेत्॥ इति। तथा हि—पादाहतः प्रमदया विकसत्यशोकः शोकं जहाति बकुलो मुखसीधुसिक्तः। आलोकितः कुरवकः कुरुते विकाशमालोडितस्तिलक उत्कलिको विभाति॥ इति॥

Notes.—सद्यः, 'that very moment'. Literally the word *sa dyas* means 'that very day'. From that it came to mean 'that very hour or moment'. **अशोक.** The belief that the asoka tree puts forth blossoms when touched by a maiden with his foot is common among Sanskrit poets. Cf. Megh. 2. 15. एकः (*i. e.* Asoka) सख्यास्तव सह मया वामपादाभिलाषी ..., also Ragh. 8. 62. The red asoka induces feelings of love. रक्तोऽत्र स्मरवर्धनः as cited by Malli. in his commentary on the sloka quoted above from Megh. **स्कन्धात् प्रभृति एव,** 'from the very stem'. प्रभृति, आरभ्य, and the like govern the abl. case. **आसिञ्जितनूपुरेण,** qualifies पादेन (with the foot) 'tinkling with anklets.

Trans.—The asoka tree immediately threw forth from its very stem leaves and blossoms, and did not await the touch of the feet of fair ladies tinkling with anklets.

अनुवाद—तत्काल तने ही से लेकर अशोक वृक्ष पर छोटी छोटी पत्तियों सहित फूल उग पड़े और उसने सुन्दरी कन्याओं के पाजेबों से छनछनाते पैरों की ठोकरों की अपेक्षा नहीं की॥ २६॥

सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे।
निवेशयामास मधुर्द्विरेफान्नामाक्षराणीव मनोभवस्य ॥२७॥

सद्य इति ॥ **मधुः** वसन्त एवेषुकारः (**प्रवालोद्गमचारुपत्रे**) प्रवालोद्गमाः पल्लवाङ्कुरा एव चारूणि पत्राणि पत्रा यस्य तस्मिन्। पत्रं वाहनपत्नयोः इत्यमरः। नवं चूतं चूतकुसुमं तदेव बाणस्तस्मिन् **नवचूतबाणे समाप्तिं नीते** सति **सद्यः मनोभवस्य** धन्विनः **नामाक्षराणीव द्विरेफान्** भ्रमरान् **निवेशयामास** निदधौ ॥ अत्र प्रवालपत्रे इत्याद्येकदेशविवर्तिरूपकं मधोरिषुकारत्वनिरूपणं सूचयन्नामाक्षराणीवेत्युत्प्रेक्षायां निमित्तमित्येकदेशविवर्तिरूपकोत्थापितेयमुत्प्रेक्षा ॥

Notes.—प्रवालोद्गमचारुपत्रे, 'feathered with new-sprouting leaves'. Feathers were formerly used to speed the arrow. To assist the flight of the mango-blossom arrow fresh-sprouting leaves were used as feathers. The mango-blossom is one of the five arrows of Kama. अरविन्दमशोकं च चूतं च नवमल्लिका। नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः॥ द्विरेफान्, 'bees'. The formation is due to the word भ्रमर 'a bee', which contains two रेफs or r's. The Poet fancies the bees lining the mango spray as making the syllables of the archer Cupid's, name. It was usual in early time to put one's name on one's arrow. मनोभवस्य, 'of Kama'. Lit.' the mind-born (god)'. Cf. मनसिज, सङ्कल्पयोनि.

Trans.—Spring immediately finished making the arrow, the new mango blossom, with new-sprouting leaves for its feathers, and lined it with bees to print the syllables of Kama's, (the archer's,) name.

अनुवाद—जब वसन्त तिस काल फूटी पत्तियों के रूप में बाण-पत्रों से संयुक्त अपना नये आम का पुष्प-बाण समाप्त कर चुका, तब उस ने मनोभव (काम) के नामाक्षरों को भौंरे से लिखा ॥ २७ ॥

वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥२८॥

वर्णेति ॥ **कर्णिकारं** कर्णिकारकुसुमं ... प्रायेणोषधिवृक्षेभ्यः इत्यु-

त्पन्नस्य तद्धितस्य पुष्पफलमूलेषु बहुलम् इति लुक् । एवमन्यत्रापि द्रष्टव्यम् । **वर्णप्रकर्षे** वर्णोत्कर्षे **सति** अपि **निर्गन्धतया** हेतुना **चेतः दुनोति स्म** पर्यतापयत् । लट् स्मे इति भूतार्थे लट् । तथा हि । **प्रायेण विश्वसृजः** विधातुः **प्रवृत्तिः गुणानां सामग्र्यविधौ** साकल्यसंपादनविषये **पराङ्मुखी** । सर्वत्रापि वस्तुनि किंचिद्वैकल्यं संपादयति । यथा चन्द्रे कलङ्कः । अतः कर्णिकारेऽपि नैर्गन्ध्यं युज्यत इति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः ॥

Notes.—**वर्णप्रकर्षः**, 'excellence of colour'. **कार्णिकार**, 'the Karnikara flower'. This flower has an excellent colour, but no fragrance. Hence the Poet is pained to find no fragrance allowed to it by the Creator. **गुणानां सामग्र्यविधौ**, '(averse from) bestowing the full measure of excellence'. **विधिः** means विधानम् 'making, granting, bestowing'.

Trans.—The Karnikara flower with its excellence of colour, (however,) pained the mind, because it did not have any fragrance. The dispositon of the Creator is generally averse from bestowing the full measure of virtue (anywhere).

अनुवाद—सुगन्ध न रखने के कारण उत्कृष्टवर्णयुक्त भी कर्णिकार का पुष्प मन को क्लेश देता था । प्रायः सृष्टि के रचयिता का भाव समग्र गुणों के देने के विपरीत है ॥ २८ ॥

बालेन्दुवक्राण्यविकाशभावाद्बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥२९॥

बालेन्द्विति ॥ **अविकाशभावात्** निर्विकाशत्वात्मुकुलभावद्धेतोः **(बालेन्दुवक्राणि)** बालेन्दुरिव वक्राणि **अतिलोहितानि** अतिरक्तानि **पलाशानि** किंशुकपुष्पाणि । पलाशे किंशुकः पर्णः इत्यमरः । **वसन्तेन** पुंसा **समागतानां** संगतानां **वनस्थलीनां** स्त्रीणां **सद्यः** सद्यो दत्तानि । पुराणेष्वतिलौहित्याभावादिति भावः । **नखक्षतानीव बभुः** । अत्र वसन्तस्य वनस्थलीनां च विशेषणसाधारण्यान्नायकव्यवहारप्रतीतेः समासोक्तिस्तावदस्ति । नखक्षतानीव इति जातिस्वरूपोत्प्रेक्षा वक्रत्वलौहित्यगुणनिमित्ता जागर्ति । सा च नायकव्यवहाराश्रितसमासोक्तिगर्भिण्येवोत्तिष्ठत इत्युभयोरेककालतैव । विशेषणसामर्थ्यादप्रस्तुतस्य गम्यत्वे समासोक्तिरिष्यते इति हि लक्षणम् ॥

Notes.—बालेन्दुवक्राणि, 'curved like the crescent moon'. For anal. see the comm. पलाशानि, 'the Palasa flowers'. The Palasa tree has beautiful red blossoms. नखक्षतानि, 'nail-wounds' inflicted in course of dallying with the Wood-lands. In this stanza the woodlands are represented as the damsels on whom Spring has bestowed his affections. बभुः 'shone, appeared,' from √भा 'to shine'; लिट् 3rd. per. pl.

Trans.—The buds of Palasa, which were deep-red and curved like the crescent moon because of being not fully open, seemed on (the body of the) Woodlands the nail-wounds (inflicted) by the Spring with whom they were dallying.

अनुवाद—सम्पूर्ण न खिले होने के कारण पलाश के लाल लाल फूल वसन्त से संग करते समय वनस्थलियों के शरीर पर तत्काल दिए नखक्षतों (पं० खण्डों) की भांति दिखाई देते थे ॥ २६ ॥

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलंचकार ॥ ३० ॥

लग्नेति ॥ **मधुश्रीः** वसन्तलक्ष्मीः (**लग्नद्विरेफाञ्जनभक्तिचित्रं**) लग्नद्विरेफा एवाञ्जनभक्तयः कज्जलरचनास्ताभिश्चित्रं चित्रवर्णं **तिलकं** पुष्पविशेषमेव तिलकं विशेषकम् । मुखं प्रारम्भस्तस्मिन्नेव **मुखे** वक्त्रे **प्रकाश्य** प्रकटय्य **बालारुणकोमलेन** बालार्कसुन्दरेण **रागेण** अरुणिम्ना तेनैव लाक्षारागेण चूतप्रवाल एवौष्ठस्तं **चूतप्रवालोष्ठम् अलंचकार** प्रसाधयामास ॥ अत्र रूपकालंकारः ॥

Notes.—In sl. 27 we had the description of the Mango-spray as the weapon of Love. In this sloka we have another comparison. The Mango-spray is called the *lip* of Vernal Beauty; its *rouge* is the soft ruddy shine of the morning sun; and the *pigment* for beautifying the brow are the black bees. लग्नद्विरेफाञ्जनभक्तिचित्रं, 'beautiful with decoration

in black pigment in the form of bees clinging to it.' भक्ति, f. 'division by lines, variegation, decoration.' Anal. लग्नाः द्विरेफाः लग्नद्विरेफाः ; अञ्जनेन भक्तयः अञ्जनभक्तयः ; लग्नद्विरेफाः एव अञ्जनभक्तयः लग्नद्विरेफाञ्जनभक्तयः ताभि. चित्रम् . चूतप्रवालोष्ठम् 'her lip, the Mango spray.' अलम्√कृ means 'to decorate.'

Trans.—Vernal Beauty exhibiting on her face her *tilaka* (the flower being the ornamental sign) beautiful with decoration in black pigment in the form of bees clinging to it, next adorned her lip, the Mango-spray, with rouge of the soft ruddy shine of the morning sun.

अनुवाद—वसन्तलक्ष्मी ने लगे भौंरे की रेखाओं से चित्रित मुख पर तिलकपुष्परूपी तिलकप्रसाधन का प्रकाश कर प्रातःकाल के सूर्य्य के लाल प्रकाश के समान स्निग्ध रक्त वर्ण से आम के पत्ते के रूप में अपने होंठ को अलंकृत किया ॥ ३० ॥

मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः ।
मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः॥३१॥

मृगा इति ॥ (**प्रियालद्रुममञ्जरीणां**) प्रियालद्रुमा राजादनवृक्षाः । राजादनः प्रियालस्यात इत्यमरः । तेषां मञ्जर्यस्तासां **रजःकणैः** (**विघ्नितदृष्टिपाताः**) विघ्निताः सञ्जातविघ्ना दृष्टीनां पाताः प्रसादा येषां ते तथोक्ताः । **मदोद्धताः मृगाः प्रत्यनिलम्** अनिलाभिमुखं (**मर्मरपत्रमोक्षाः**)मर्मरा मर्मरशब्दवन्तः पत्रमोक्षा जीर्णपर्णपाता यासु ताः **वनस्थलीः विचेरुः** वनप्रदेशेषु चरन्ति स्म । देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् । इति चरतेः सकर्मकत्वम् ॥

Notes.—प्रियाल, 'name of a tree, (so known also in Bengal MW*L.*)'. रजःकणै., —The pollen-dust of the Priyala blossoms was blown down so thickly that the young deer could scarcely see before them. विघ्नित—'hindered, barriered off'. Anal. विघ्नः सञ्जातः अस्य इति विघ्नितः मदोद्धताः, 'filled with joyous excitement'. The Spring

season filled the deer with hilarity and passion. विचेरुः —लिट् 3rd per. pl. from वि √चर् 'to roam'. मर्मर. adj. 'producing a rustling noise'. The word is onomatopoeic. पत्रमोक्षाः, 'the falling of leaves'.

Trans.—The (young) deer whose eyes were prevented from seeing before by the (thick-falling) pollen-dust of the Priyala blossoms raced, filled with joyous excitement, against the wind in the woodland amidst the rustling of the falling leaves.

अनुवाद—पियालवृक्ष की मिंजरों की धूल पड़ने से अन्धे हुए मृग मद से मतवाले हो गिर रहे पत्तों की खड़खड़ाहट वाले वनप्रदेशों में वायु के विपरीत दौड़ते थे ॥ ३१ ॥

चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ॥ ३२ ॥

चूताङ्कुरेति॥ (**चूताङ्कुरास्वादकषायकण्ठः**) चूताङ्कुराणामास्वादेन कषायकण्ठो रक्तकण्ठः । सुरभावपि रक्ते कषायः इति केशवः । पुमान्कोकिलः **पुंस्कोकिलः** । पुंग्रहणं प्रागल्भ्यद्योतनार्थम् । **मधुरं चुकूज** इति **यत् तत्** कूजनम् **एव** (**मनस्विनीमानविघातदक्षं**) मनस्विनीनां मानविघाते रोषनिरासे दक्षं **स्मरस्य वचनं** मानं त्यजतेत्याज्ञानवचनं **जातम्** । कोकिलकूजितश्रवणानन्तरं स्मराज्ञप्ता इव मानं जहुरित्यर्थः ॥

Notes.—चूताङ्कुरास्वादकषायकण्ठः, 'whose neck became red by feasting on the mango buds'. Anal. चूतानाम् अङ्कुराः चूताङ्कुराः कषायः (red) कण्ठः यस्य इति कषायकण्ठः ; चूताङ्कुराणाम् आस्वादः (feeding, feasting) चूताङ्कुरास्वादः, तेन कषायकण्ठः इति. √कूज्, 'to warble, to sing'. मनस्विनीमानविघातदक्षं, 'competent to humble the pride of the high-minded dames'. Anal. मानस्य विघातः मानविघातः ; मनस्विनीनां मानविघातः मनस्विनीमानविघातः, तस्मिन दक्षम् . स्मर, 'God of Love; lit. rememberer.'

Trans.—The sweet notes which the male *Koel* sang, with his neck red from feeding on the (red)

mango buds, became verily the call of the Rememberer (*i. e.* Cupid) competent to humble the pride of the high-minded dames.

अनुवाद—जो आम की लाल लाल पत्तियां खाने से लाल हुए कण्ठ वाले कोयल ने मीठे स्वर से गाया तो वह मनस्विनी स्त्रियों का मान तोड़ने के लिये समर्थ वचन था ॥ ३२ ॥

हिमव्यपायाद्विशदाधराणामापाण्डरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किंपुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ॥३३॥

हिमेति ॥ (**हिमव्यपायात्**) हिमस्य व्यपायादपगमात् (**विशदाधराणां**) विशदा नीरुजा अधरा ओष्ठा यासां तासाम् । **आपाण्डरीभूतमुखच्छवीनाम्** कुङ्कुमपरिहारादिति भावः । **किंपुरुषाङ्गनानां पत्रविशेषकेषु** पत्ररचनासु **स्वेदोद्गमः पदं चक्रे** । घर्मोदयात्स्वेदोदयोभूदित्यर्थः । विशदाधरत्वं मधूच्छिष्टराहित्यादिति भावः । हेमन्तेषु नार्यो बिम्बोष्ठेषु मधूच्छिष्टं शीतभयाद्दधतीति प्रसिद्धम् ॥

Notes—**हिमव्यपायात्**, 'one account of the passing away of winter'. **विशदाधराणाम**, 'whose lower lips were clear *i. e.* free from bees' wax, being no longer pained by the biting cold.' **आपाण्डरीभूतमुखच्छवीनाम**, 'the expression of whose faces was slightly pale, (saffron-paint being no longer applied to their cheeks).' **स्वेदोद्गमः** 'the oozing of the sweat.' Note that the English 'sweat' is the same word as the Sanskrit '*sveda*'. **पत्रविशेषकः**, 'painting of flowers, *leaves*, etc. to decorate the person.'

Trans.—The dripping sweat soiled (lit. set foot on) the decorating flowerets painted on the bodies of the Kinnara ladies whose faces were slightly pale and whose lips were free from wax-salve on account of the snowy winter being over.

अनुवाद—सरद ऋतु के व्यतीत हो जाने से श्वेतवर्ण होंठों वाली और (केसर न लगाने से) किंचित् पीली पड़ी मुखकान्ति वाली किन्नरस्त्रियों के बेल बूटों पर आ पसीने ने अपना पांव रखा ॥ ३३ ॥

तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् ।
प्रयत्नसंस्तम्भितविक्रियाणां कथंचिदीशा मनसां बभूवुः ॥३४॥

तपस्विन इति ॥ (**स्थाणुवनौकसः**) स्थाणोर्वनमोको येषां ते **तपस्विनः** तत्रत्या मुनयः समानकाल आद्यन्तावस्या आकालिकीम् । अकालभवत्वादुत्पत्त्यनन्तरविनाशिनीमित्यर्थः । आकालिकडाद्यन्तवचने इति समानकालादिकट्प्रत्ययः । प्रकृतेराकाल आदेशश्च निपातितः । टिड्ढाणञ्—इत्यादिना ङीप् । केचिदकालाद्देहाध्यात्मादित्वाद्भवार्थे ठगित्याहुः । **तामाकालिकीं मधुप्रवृत्तिं वीक्ष्य** (**प्रयत्नसंस्तम्भितविक्रियाणां**) प्रयत्नेन संस्तम्भितविक्रियाणां निरुद्धविकाराणां **मनसां कथंचिदीशा** नियन्तारो **बभूवुः** ॥

Notes.—**आकालिकीं मधुप्रवृत्तिम्**, (*i*) 'the *untimely* setting in of spring,' or (*ii*) the *immediate* setting in of spring *in all its glory*. In case (*i*) the word आकालिकीम् will be a formation from अकाल ' improper time '; in case (*ii*) it will be derived from आकाल ' the time being.' The second formation is authorised by Pan. 5. 1. 114. See the comm. **प्रयत्नसंस्तम्भितविक्रियाणाम्**, ' whose excitement was held in check with great effort.' Anal. प्रयत्नेन संस्तम्भिताः प्रयत्नसंस्तम्भिताः; प्रयत्नसंस्तम्भिताः विक्रियाः येषां, तेषाम्,

Trans.—The ascetic saints who made their home in Siva's forest could, seeing the immediate setting in of spring in all its glory, with difficulty secure control over their minds whose excitement was held in check (only) with supreme effort.

अनुवाद—वसन्त ऋतु के न होते हुए भी वसन्त को आये देख शिवजी महाराज की तपोभूमि के तपस्वी बड़े कष्ट के पीछे निरन्तर प्रयत्न से मन के विकारों को जीतने के समर्थ हुए ॥ ३४ ॥

तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने ।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ॥३५॥

तमिति ॥ (**आरोपितपुष्पचापे**) आरोपितमधिज्यं कृतं पुष्पचापं येन

तस्मिन् । (**रतिद्वितीये**) रतिर्द्वितीया यस्य तस्मिन् रतिसहाये **मदने तं देशं** स्थाणवाश्रमं **प्रपन्ने** प्राप्ते सति **द्वन्द्वानि** स्थावराणि जङ्गमानि च मिथुनानि (**काष्ठागतस्नेहरसानुविद्धं**) काष्ठा उत्कर्षः । काष्ठोत्कर्षे स्थितौ दिशि इत्यमरः । तां गतो यः स्नेहः इष्टसाधननिबन्धनः प्रेमापरनामा ममताभिमानः । प्रेमा ना प्रियता हार्दं प्रेम स्नेहः इत्यमरः । स एव रसस्तेनानुविद्धं संपृक्तं **भावं** रत्याख्यं शृङ्गारभावं **क्रियया** कार्यभूतया चेष्टया **विवव्रुः** प्रकटीचक्रुः । शृङ्गारचेष्टाः प्रावर्तन्तेत्यर्थः ॥

Notes.—**आरोपितपुष्पचापे**, goes with मदने (when Love) 'with his flowery bow string.' Anal. पुष्पाणि (पञ्चसंख्यकानि) एव चापम् पुष्पचापम् (कर्मधा०) ; आरोपितं पुष्पचापं येन स आरोपितपुष्पचापः, तस्मिन् . **काष्ठागतस्नेहरसानुविद्धं**, '(completely) permeated by the sentiment of love gone to the extreme.' Anal. काष्ठां (the extremity) गतः काष्ठागतः; काष्ठागतः स्नेहः काष्ठागतस्नेहः; स एव रसः काष्ठागतस्नेहरसः, तेन अनुविद्धः (permeated) काष्ठागतस्नेहरसानुविद्धः, तम् . **द्वन्द्वानि**, 'pairs (of moving animals and motionless objects). See sl. 36—40. The word द्वन्द्व is an iterative from द्वि (two) Pan. 8. 1. 15.

Trans.—When Cupid with his flowery bow strung and with Rati ('Sexual Enjoyment') as second came to that place, pairs (of animate and inanimate objects) exhibited by their actions their feeling of attachment permeated completely by the sentiment of love gone to extremity.

अनुवाद—पुष्पबाण पर चिल्ला चढ़ा जब मदन सहधर्मिणी रति के साथ उस वन में प्रविष्ट हुआ तब द्वन्द्वों ने क्रियाओं द्वारा पराकाष्ठा को पहुंचे स्नेह रस से व्याप्त अपने शृंगारभाव को प्रकाशित किया ॥ ३५ ॥

ताश्चेष्टा आह मधु इत्यादिभिश्चतुर्भिः—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥३६॥

मध्विति ॥ द्वौ रेफौ वर्णविशेषौ यस्य स **द्विरेफः** भ्रमरः । उपचारात्तदर्थोऽपि द्विरेफ उच्यते । यथाह वैयट:—शब्दधर्माणामर्थेष्वपि दृश्यते । यथा भ्रमरशब्दस्य

द्विरेफत्वाद्द्विरेफो भ्रमरः। **(कुसुमैकपात्रे)** कुसुममेवैकं साधारणं पात्रं तस्मिन् **मधु** मकरन्दम्। मधु मद्ये पुष्परसे इति विश्वः। **स्वां प्रियां** भृङ्गीम् **अनुवर्तमानः** अनुसरन् **पपौ**। तत्पीतशेषं पपावित्यर्थः। कृष्णश्चासौ सारः शबलश्च **कृष्णसारः** कृष्णमृगः। वर्णो वर्णेन इति समासः। **(च।) (स्पर्शनिमीलिताक्षीं)** स्पर्शेन स्पर्शसुखेन निमीलिताक्षीं **मृगीं शृङ्गेण अकण्डूयत** कषितवान्॥ कण्ड्वादिभ्यो यक् इति यक्। ततः कर्तरि लङ्॥

Notes.—कुसुमैकपात्रे, 'in the same flower-cup.'. The calyx (of a flower) is the same as Eng. chalice (a cup). अनुवर्तमानः, 'following' (Malli.) Perhaps we may take it in the sense of 'obliging' (his beloved as the male bee thus demonstrated his love). स्पर्शनिमीलिताक्षीम्, 'whose eye (-lids) closed under the influence of sweet sensation caused by his mate's rubbing (his horn)'. Anal. निमीलिते अक्षिणी यस्याः सा निमीलिताक्षी f. (Pan 5. 4. 113. बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्); स्पर्शेन निमीलिताक्षी स्पर्शनिमीलिताक्षी, ताम्. Sipping honey from the same flower cup and rubbing of the horns are indicative of the influence that Cupid was exercising on the bee and the deer.

Trans.—The bee, following his love, sipped honey from the same flower chalice; and the black-spotted deer lovingly rubbed his horn against his doe who closed her eye-lids in (the bliss of) the touch.

अनुवाद—भौंरे ने उस ही कुसुम पात्र से प्यारी भौंरी के पुष्परस पी चुकने के पीछे उच्छिष्ट मधु पिया। और काले वर्ण के मृग ने अपने सींग से सानन्द आंखें बंद की हुई मृगी को खुजाया॥ ३६॥

ददौ रसात्पङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः।
अर्धोपभुक्तेन बिसेन जायां संभावयामास रथाङ्गनामा॥३७॥

ददाविति॥ **रसात्** अतिरागात् **करेणुः** करिणी॥ करेणुरिभ्यां स्त्री नेभे इत्यमरः। पङ्काज्जायत इति पङ्कजं तस्य रेणुः पङ्कजरेणुस्तस्य गन्धोऽस्यास्तीति **पङ्कजरेणुगन्धि गण्डूषजलं** मुखमध्यस्थं **गजाय ददौ। रथाङ्गनामा** चक्रवाकः

अर्धं यथा तथोपभुक्तेन (**अर्धोपभुक्तेन**) अर्धजग्धेन **बिसेन जायां संभावयामास** । स्वजग्धशेषं ददावित्यर्थः ॥

Notes.—पङ्कजरेणुगन्धि, 'full of the fragrance of the pollen of flowers.' Anal. पङ्कजस्य रेणुः (pollen) पङ्कजरेणुः ; तस्य गन्धः पङ्कजरेणुगन्धः ; सोऽस्य अस्ति इति पङ्कजरेणुगन्धि (गण्डूषजलं). **अर्धोपभुक्तेन,** 'with his half-eaten (lotus-stalk'). Anal. अर्धम् उपभुक्तम् अर्धोपभुक्तम् (सुप्सुपा) तेन. **रथाङ्गनामा**, 'the chakravaka bird.' The word literally means 'having the name of a part of a chariot *i. e.* a wheel (चक्र).' चक्रः (masc.) also means the chakravaka bird. Perhaps the very word चक्रवाक means 'which expresses (√वच्) itself by (or by a paraphrase) of the word चक्र.'

Trans.—The she-elephant gave out of love to her lord the water which she held in her mouth and which was full of the fragrance of the pollen of lotuses. The chakravaka obliged his mistress by giving her his half-eaten lotus stalk.

अनुवाद—हथिनी ने प्रेम से कमलरेणू से सुगन्धित अपने मुख में लिया हुआ जल प्यारे हाथी के मुख में डाला । और चकवे ने आधा खाया बिस देते हुए प्यारी चकवी का सत्कार किया ॥ ३७ ॥

गीतान्तरेषु श्रमवारिलेशैः किंचित्समुच्छ्वासितपत्रलेखम् ।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुम्बे ॥ ३८ ॥

गीतान्तरेष्विति ॥ **किंपुरुषः** किन्नरः **श्रमवारिलेशैः** स्वेदोदबिन्दुभिः (**किंचित्समुच्छ्वासितपत्रलेखम्**) किंचिदीषत्समुच्छ्वासिता विश्लेषिताः पत्रलेखा यस्य तत् । (**पुष्पासवाघूर्णितनेत्रशोभि**) पुष्पाणामासवो मद्यं पुष्पासवः पुष्पोद्भवमद्यमित्यर्थः । वसन्ते मधूकस्य संभवात । पुष्पवासितमिति केचित । तेनाघूर्णिताभ्यामुद्भ्रान्ताभ्यां नेत्राभ्यां शोभत इति तथोक्तं **प्रियामुखं गीतान्तरेषु** गीतमध्येषु **चुचुम्ब** ॥

Notes.—गीतान्तरेषु, 'In the intervals of his song'. *Vide supra* note on **किन्नराणाम्** I. 8. **समुच्छ्वा-**

सित–, 'spoiled, disfigured'. Literally it means 'wiped out by being breathed upon'. **पत्रलेखा**, f. 'the painting of flowers, leaves, and other figures by a woman on her face and person with saffron-paint, sandal-juice, yellow pigment and other fragrant paints'. *Vide supra* sl. 33. **पुष्पासवाघूर्णितनेत्रशोभि**, 'with eyes bewitching as they rolled from the effects of the wine of flowers'. For anal. see the comm.

Trans.—In the intervals of his song the kinnara kissed the face of his love, which was bewitching, with her eyes as they rolled about from the effect of the wine of flowers, and of which the flowery paintings were spoiled by drops of perspiration caused by toil.

अनुवाद—किन्नर न श्रम के कारण गिर रहे पसीने से किञ्चित् पूंछी पत्रावाली से युक्त किन्नरी का मुख जो पुष्प-मद्य सेवन करने से मस्त आंखो से सुशोभित था, गाते गाते चूमा ॥ ३८ ॥

पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥३९॥

पर्याप्तेति ॥ **(पर्याप्तपुष्पस्तबकस्तनाभ्यः)** पर्याप्ताः समग्राः पुष्पस्तबका एव स्तना यासां ताभ्यः ॥ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति विकल्पान्न ङीष् । **(स्फुरत्प्रवालोष्ठमनोहराभ्यः)** स्फुरन्तः प्रवालाः पल्लवाः एवौष्ठास्तैर्मनोहराभ्यः **(लतावधूभ्यः)** लता एव वधवस्ताभ्यः सकाशात् **तरवोऽपि** लिङ्गादेव पुंस्त्वं गम्यते । **(विनम्रशाखाभुजबन्धनानि)** विनम्राः शाखा एव भुजास्तैर्बन्धनानि **अवापुः** । ताभिरालिङ्गिता इत्यर्थः । स्थावराणामपि मदनविकारोऽभूत्किमुतान्येषामिति भावः । एतच्च तरुलतानामपि चेतनत्वादुक्तम् । यथाह मनुः–अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः । इति । अत्र रूपकालंकारः ॥

Notes.—This stanza depicts how even the trees owned the influence of love. (*i*) **पर्याप्त......भ्यः** and (*ii*) **स्फुरत्......भ्यः** both qualify **लतावधूभ्यः** 'from their creeper-wives'. Creepers, the wives of trees, bend their tender shoots to embrace their lords lovingly. **पुष्पस्तबक,—**

means 'bunch of flowers'. **अवापुः**, 'received', लिट् 3rd per. pl. from अव √ आप् 'to obtain, to receive'. **विनम्र-**, 'bending' from वि √ नम् 'to bend'.

Trans.—The trees, too, received the embraces of low-bending shoots, the arms, of creeper-wives engaging with their quivering lip in the shape of red buds and with breasts heaving (with affection) in the shape of big bunches of flowers.

अनुवाद—वृक्षों ने भी समग्र पुष्पों के गुच्छों के रूप में स्तन और हिल रही (लाल) पत्तियों के रूप में होंठ रखती हुई लताओं से झुकी शाखाओं के रूप में बाहु-बन्धन प्राप्त किये ॥ ३९ ॥

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ॥४०॥

श्रुतेति ॥ **अस्मिन्क्षणे** वसन्providedाविर्भावकाले भगवान् **हरः श्रुताप्सरोगीतिरपि** । दिव्याङ्गनागानमाकर्णयन्नपीत्यर्थः । **प्रसंख्यानपरः** आत्मानुसन्धानपरः **बभूव** । तथा हि । (**आत्मेश्वराणाम्**) आत्मनश्चित्तस्येश्वराणां नियन्तॄणाम् । वशिनामित्यर्थः । विहन्यन्त एभिरिति **विघ्नाः** प्रत्यूहाः । घञर्थे कप्रत्ययः । **जातु** कदाचिदपि । (**समाधिभेदप्रभवः**) समाधिभेदे समाधिभञ्जने प्रभवः समर्थाः **न भवन्ति** ॥

Notes.—The simple meaning of the stanza is that Siva alone remained unmoved, lost in meditation. **प्रसंख्यानं**, 'deep meditation'. The word literally means '(correct) enumeration', then 'definite knowledge' and next 'deep meditation'. Or directly from √ चक्ष् 2 A. 'to see' meaning, 'correct view, correct thought, deep meditation'. **न जातु**, 'not at all, never'.

Trans.—At this moment Siva (alone), though hearing the (love-) songs of the celestial nymphs remained absorbed in contemplation; for temptations can never be strong to disturb the trance of those who are masters of themselves.

अनुवाद—इस समय शिवजी महाराज यद्यपि वे अप्सराओं का गाना सुन रहे थे अपनी समाधि में लगे रहे। ठीक है कि जितेन्द्रिय तपस्वियों की तपस्या भङ्ग करने में विघ्न समर्थ नहीं होते ॥ ४० ॥

लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः।
मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान्व्यनैषीत् ॥४१॥

लतेति ॥ **अथ (लतागृहद्वारगतः)** लतागृहद्वारं गतः **(वामप्रकोष्ठार्पितहेमवेत्रः)** वामे प्रकोष्ठेऽर्पितहेमवेत्रो धारितहेमदण्डः **नन्दी** नन्दिकेश्वरः। नन्दी भृङ्गिरिटस्तण्डुनन्दिनौ नन्दिकेश्वरे। इति कोशः। **(मुखार्पितैकाङ्गुलिसंज्ञया)** मुखेऽर्पितायाः सरोषविस्मयास्तिमितावलोकं निहिताया एकस्या अङ्गुलेस्तर्जन्याः संज्ञया सूचनया **एव**। संज्ञा स्याच्चेतना नाम हस्ताद्यैरर्थसूचना। इत्यमरः। **गणान्** प्रमथान् **चापलाय** चापलं कर्तुं **मा** भवत **इति**। क्रियार्थोपपदस्य इत्यादिना चतुर्थी। **व्यनैषीत्** शिक्षितवान् ॥

Notes.—**नन्दी**—the name of one of the principal attendants of Siva. He is the door-keeper of Siva's hermitage and has authority over the Ganas. Sometimes three Nandins are enumerated. **वामप्रकोष्ठार्पितहेमवेत्रः**, 'with his golden staff supported by his left fore-arm'. Anal. हेम्नः वेत्रं हेमवेत्रम्; अर्पितं हेमवेत्रं (golden cane) येन स अर्पितहेमवेत्रः; वामः प्रकोष्ठः (fore-arm) वामप्रकोष्ठः; तस्मिन् अर्पितहेमवेत्रः वामप्रकोष्ठार्पितहेमवेत्रः. वेत्र is the same as the Punj. बैत. **संज्ञा**, f. 'a hint, sign, gesture'. **व्यनैषीत्**, aor. 3rd per. sing. from वि √ नी 'to teach, to impress'.

Trans.—Then Nandin with his golden cane supported by his left fore-arm hastened to the door of the arbour-house and impressed upon the Ganas by a gesture of his finger touching his lip to desist from making mischief.

अनुवाद—तिस के अनन्तर लता घर के दरवाज़े पर खड़े हुए नन्दी ने जिस ने अपना बायां हाथ स्वर्ण-दण्ड पर टिकाया हुआ था, मुंह में उंगली रख कर इशारे से गणों को आज्ञा दी कि शोर मत करो ॥ ४१ ॥

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम्।
तच्छासनात्काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥४२॥

निष्कम्पेति ॥ **निष्कम्पवृक्षम्**। इदमुद्भिज्जोपलक्षणम्। **निभृतद्विरेफं** निश्चलभृङ्गम्। स्वेदजोपलक्षणमेतत्। **मूकाण्डजं** निःशब्दपक्षिसरीसृपादिकम्। एतेनाण्डजजातिरुक्ता। **शान्तमृगप्रचारम्**। जरायुजोपलक्षणमेतत्। **सर्वं एव काननं तच्छासनात्** नन्दीश्वराज्ञया **चित्रार्पितारम्भं** चित्रलिखितारम्भम् **इव अवतस्थे** ॥ नृगवाद्या जरायुजाः। स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः। उद्भिदस्तरुगुल्माद्याः इत्यमरः ॥

Notes.—**निष्कम्पवृक्षं**, 'with its trees all motionless'. Anal. निष्कम्पाः वृक्षाः यस्मिन् तद् निष्कम्पवृक्षं काननम् (forest). Analyse similarly **निभृतद्विरेफं** 'with its bees all silent', **मूकाण्डजं** 'with its birds hushed and still', and **शान्तमृगप्रचारम्** 'with the roaming of its beasts all stopped.' These four adjectives show that all life in the forest was suspended. The view of the woodland seemed as if it were done in painting (**चित्रार्पितारम्भम्**). **आरम्भ**, 'action, view, scenery'.

Trans.—And at his word the entire woodland appeared as if the scene were done in a painting—the trees no more stirring, the bees no more buzzing, the birds all silent, and the roaming of the beasts suspended.

अनुवाद—और तत्क्षण ही वृक्षों ने झूलना बन्द कर दिया, भौंरों ने गुञ्जना त्याग दिया, पक्षियों ने चहचहाना छोड़ दिया और मृगों ने घूमना समाप्त कर दिया—इस प्रकार उस की आज्ञा सुन कर सारे का सारा बन चित्र में खींचे हुये दृश्य के समान दिखाई देता था ॥ ४२ ॥

दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ॥४३॥

दृष्टिप्रपातमिति ॥ **कामः प्रयाणे** यात्रायां पुरोगतः शुक्रो यस्मिन्देशे तं **पुरःशुक्रं** देशम् **इव**। प्रतिशुक्रं प्रतिबुधं प्रत्यक्षारकमेव च। अपि शुक्रसमो राजा हतसैन्यो निवर्तते ॥ इति प्रतिषेधात्। **तस्य दृष्टिप्रपातं** दृग्विषयं **परिहृत्य**

प्रान्तेषु पार्श्वदेशेषु (**संसक्तनमेरुशाखं**) संसक्ता अन्योन्यसंसृष्टा नमेरूणां सुरपुन्नागानां शाखा यस्य तत् । तिरोधानयोग्यमिति भावः । **भूतपतेः** शिवस्य **ध्यानास्पदं** समाधिस्थानम् । आस्पदं प्रतिष्ठायाम् इति निपातः । **विवेश** ॥

Notes.—**पुरःशुक्रमिव प्रयाणे**, 'as the quarter where Sukra (Venus) shines in front at the time of marching (against the enemy). The quotation of Malli. प्रतिशुक्रं ·······राजा हतसैन्यो निवर्तते ॥ goes to prove that we have here the comparison to a king marching against his enemy. **पुरःशुक्रम्** is simply a paraphrase of प्रतिशुक्रं. **संसक्तनमेरुशाखं**, ' the thickly interwoven branches of the Nameru trees (falling) (on the sides).' Anal. नमेरूणां शाखाः नमेरुशाखाः ; संसक्ताः नमेरुशाखाः यस्य तत् . **विवेश**, from √विश् ' to enter. '

Trans.—Keeping clear of Siva's view as a king does the quarter wherein Sukra (Venus) shines in front at the time of a march, Kama drew (unnoticed) to (the god's) retreat for contemplation which was (covered) by the tangled branches of the Nameru trees (falling) on the side.

अनुवाद—जैसे कोई (राजा) यात्रा समय उस दिशा में जिस में शुक्र सम्मुख हो बचकर जाता है, उसी प्रकार काम त्रिलोचन के लोचनविषय से बचे बचकर उन के ध्यानस्थान में जो परस्पर मिली हुई नमेरु की शाखाओं से दोनों ओर ढांपा हुआ था प्रविष्ट हुआ ॥ ४३ ॥

स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श ॥ ४४ ॥

स इति ॥ **आसन्नशरीरपातः** आसन्नमृत्युः **स** कामः (**शार्दूलचर्मव्यवधानवत्याम्**) शार्दूलचर्मणा व्यवधानवत्याम् । व्याघ्रचर्मास्तृतायामित्यर्थः । मोक्षश्रीर्व्याघ्रचर्मणि इति प्राशस्त्यादिति भावः ॥ **देवदारुद्रुमवेदिकायाम् आसीनम्** उपविष्टं **संयमिनं** समाधिनिष्ठं **त्रियम्बकं** त्रिनेत्रं **ददर्श** । केचित्साहसिकाः त्रिलोचनम् इति पेठुः । त्र्यम्बकमित्युक्ते पादपूरणव्यत्यासात्त्रियम्बकमिति पादपूरणार्थइयङादेशश्छान्दसो महाकविप्रयोगादभियुक्तैरङ्गीकृतः ॥

Notes.—देवदारुद्रुमवेदिकायां, 'on an altar of cedar tree'. The altar seems to have been only a rough-hewn log of cedar-wood. **शार्दूलचर्मव्यवधानवत्याम्**, 'which was covered over with a tiger's skin.' Anal. शारदूलचर्मणा व्यवधानं (covering) विद्यते यस्य. **आसन्नशरीरपातः**, 'the destruction of whose body was imminent'. Anal. शरीरस्य पातः शरीरपातः, आसन्नः शरीरपातः यस्य स आसन्नशरीरपातः. **त्रियम्बकं** 'Siva.' The correct form would be **त्र्यम्बकं**; the form in the text is most probably due to the exigency of metre. While commenting on Rigv. त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् Sayana interprets it thus: "त्रयाणां ब्रह्म-विष्णुरुद्राणाम् अम्बकं पितरम्." Goldstücker considers it to be 'a very doubtful interpretation of the sense of the Vaidic word त्र्यम्बक.' Mahidhra commenting on the same in Vaj. Sam. analyses it thus "त्रीणि अम्बकानि चक्षूंष्यस्येति". It is to be remarked, however, that अम्बक in the sense of 'an eye' is limited to this very compound

Trans.—He, the ruin of whose body was imminent, saw the (great) saint, the three-eyed lord, who took his seat on a (rough-hewn) altar of cedar wood, covered with a tiger's skin.

अनुवाद—(तदनन्तर) निकट आई मृत्यु वाले काम ने देवदारू लकड़ी की वेदी पर, जिस पर चीते की खाल बिछी हुई थी आसन जमाये और संयमाभ्यास कर रहे शिवजी महाराज को देखा ॥ ४४ ॥

तमेवं देवं षड्भिः श्लोकैर्वर्णयति—

पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं सन्नमितोभयांसम् ।
उत्तानपाणिद्वयसन्निवेशात्प्रफुल्लराजीवमिवाङ्कमध्ये ॥ ४५ ॥

पर्यङ्केति ॥ (**पर्यङ्कबन्धस्थिरपूर्वकायम्**) पर्यङ्कबन्धेन वीरासनेन स्थिरपूर्वकायं निश्चलोत्तरार्धम् (**ऋज्वायतं**) ऋजुरायतश्चर्ज्वायतस्तं (**संनमितोभयांसम्**) सन्नमितावुभावंसौ यस्य तं [illegible] उभयशब्दप्रयोग इत्युक्तं

कैयटेन । **(उत्तानपाणिद्वयसन्निवेशात्)** उत्तान ऊर्ध्वतलो यः पाणिद्वयस्य सन्निवेशः संस्थानं तस्मात् **अङ्कमध्ये (प्रफुल्लराजीवम्)** प्रफुल्लं राजीवं पङ्कजं यस्य तम् **इव** स्थितम् । वीरासने वसिष्ठः—एकं पादमथैकस्मिन्विन्यस्योरौ तु संस्थितम् । इतरस्मिंस्तथैवोरुं वीरासनमुदाहृतम् ॥ इति । तथा योगसारे—उत्तानिते करतले करमुत्तानितं परम् । आदायाङ्कगतं कृत्वा ध्यायेद्यस्तस्य सोऽन्तरम् ॥ इति ॥

Notes.—**पर्यङ्क—**, 'the sitting with bent legs upon the hams.' It is the name of a particular posture practised by ascetics in meditation, otherwise known as वीरासन, which is defined thus by Vasistha:—"The posture is called Virasana when the foot (of one leg) is firmly placed on the thigh (of the other) and the foot (of the other leg) on the other thigh." For its text see the comm. Siva's this posture is very graphically depicted in the stanza itself. **बन्ध**, 'formation' is idiomatically used with posture in the sense of 'assuming (that posture)'. Cf. Ragh. 2. 6....निषेदुषीम् आसनबन्धधीरः. **पर्यङ्कबन्धस्थिरपूर्वकायम्**,—Anal. पूर्वं कायस्य पूर्वकायः; पर्यङ्कस्यबन्धः पर्यङ्कबन्धः; स्थिरः पूर्वकायः यस्य, तं स्थिरपूर्वकायम्; पर्यङ्कबन्धेन स्थिरपूर्वकायम् पर्यङ्कबन्धस्थिरपूर्वकायम्. **सन्नाभितोभयांसम्**, 'with shoulders fully drooping.' For anal. see the comm. **उत्तानपाणिद्वयसन्निवेशात्**, 'on account of pressing his two hands, (one in the other) with their fingers turned upwards.' Charitravardhana paraphrases it thus: ऊर्ध्वमुखस्य पाणिद्वयस्य स्थापनात्. Thus posed, the hands seemed to be like a full-blown lotus (प्रफुल्लराजीवम्) growing in his lap (अङ्कमध्ये). Sl. 45-50. are an enlargement of the object त्र्यम्बकं संयमिनम् (sl. 44)

Trans.—The fore-part of whose body was rigid by the assumption of the Paryanka posture, who sat straight drawn up, with his shoulders drooping at ease, and who seemed to grow a lotus in the

middle of his lap because of his two hands being pressed, one in the other, with their fingers bent upwards.

अनुवाद—उन के शरीर का ऊपर का भाग वीरासन द्वारा स्थिर था, दोनों कंधे नीचे की ओर दबे हुए थे, और हथेलियां ऊपर की ओर मुड़ी होने के कारण गोदी में खिला हुआ कमल जान पड़ती थीं ॥ ४५ ॥

भुजङ्गमोन्नद्धजटाकलापं कर्णावसक्तं द्विगुणाक्षसूत्रम् ।
कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं ग्रन्थिमतीं दधानम् ॥४६॥

भुजङ्गमेति । (**भुजङ्गमोन्नद्धजटाकलापं**) भुजङ्गमेनोन्नद्ध उन्नमय्य बद्धो जटाकलापो येन तं तथोक्तम् । (**कर्णावसक्तंद्विगुणाक्षसूत्रम्**) कर्णावसक्तम् । कर्णावलम्बवित्यर्थः । अत एव द्विगुणं द्विरावृत्तमक्षसूत्रमक्षमाला यस्य तम् । (**कण्ठप्रभासङ्गविशेषनीलां**) कण्ठप्रभाणां सङ्गेन मिश्रणेन विशेषनीलामतिनीलां **ग्रन्थिमतीं** बन्धनयुक्तां **कृष्णत्वचं** कृष्णमृगाजिनं **दधानम्** ॥

Notes.—**भुजङ्गमोन्नद्धजटाकलापं**, 'whose matted hair was tied upward into a knot with the serpent (वासुकि, who thus served him for a piece of cord). **भुजङ्गम**,—Anal. भुजाभ्यां गच्छति इति भुजङ्गमः. Cf. उरगः. भुजङ्गमः has also the other form भुजगः. **जटाकलाप** is the same as जटाजूट. **द्विगुणाक्षसूत्रम**, 'a double rosary of beads', so well-known to us as रुद्राक्षमाला. Seeing that there is already in the compound the word सूत्र 'a string,' the Comm interprets द्विगुण not as 'having two strings', which sense, too, the text may bear if we choose to take अक्षसूत्र as a synonymn of रुद्राक्षमाला, but as 'repeated twice'. **ग्रन्थिमती**, 'having knots'. Knots served to secure the skin round Siva's body.

Trans.—Whose matted hair was tied up into a knot with the serpent (string), who had a double rosary hanging from his ears, and who put on the hide of a black deer, (secured on his body) with its knots and

shining all the more in its contact with the dark lustre of his neck'

अनुवाद—उन की जटायें ऊपर सर्प से बंधी थीं, उनके कान में दोहरी रुद्राक्ष-माला थी, और वे कण्ठ की कालक से विशेष शोभमान गांठों वाली काले मृग की खाल पहिने हुए थे ॥ ४६ ॥

किंचित्प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः ।
नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्यीकृतघ्राणमधोमयूखैः ॥ ४७ ॥

किंचिदिति ॥ (**किंचित्प्रकाशस्तिमितोग्रतारैः**) किंचित्प्रकाशा ईषत्प्रकाशा स्तिमिता निश्चला उग्राश्च ताराः कनीनिका येषां तैः । तारकादृणः कनीनिका इत्यमरः । **भ्रूविक्रियायां** भ्रूविक्षेपे **विरतप्रसङ्गैः** प्रसक्तिरहितैः । **अविस्पन्दितपक्ष्ममालैः** अचलितपक्ष्मपङ्क्तिभिरधः प्रसृता मयूखा येषां तैः **अधोमयूखैः नेत्रैः** त्रिनेत्रत्वाद्बहुवचनम् । **लक्ष्यीकृतघ्राणं** नासाग्रनिविष्टदृष्टिमित्यर्थः । करणान्यबहिष्कृत्य स्थाणुवन्निश्चलात्मकः । आत्मानं हृदये ध्यायेन्नासाग्रन्यस्तलोचनः ॥ इति योगसारे ॥

Notes.—किञ्चित्प्रकाशस्तिमितोग्रतारैः, 'with their fierce pupils rigidly set and shining a little'. Anal. किञ्चित् प्रकाशः (as an adj. meaning 'shining') किञ्चित्प्रकाशः. This compound may also be treated as a Bahuvr., प्रकाश being taken as a noun. Further see the comm. **विरतप्रसंगैः**, 'which had left off the habit' (of contracting the brows, **भ्रूविक्रियायां**). **लक्ष्यीकृतघ्राणम्**, 'who was directing his gaze steadily at (the extremity of) his nose'. Cf. Vyasa on Pat. Yog. 1. 35. "नासिकाग्रे धारयतोऽस्य या दिव्यगन्धसंवित्सा गन्धप्रवृत्तिः, जिह्वाग्रे रससंवित् तालुनि रूपसंवित्, जिह्वामध्ये स्पर्शसंवित्, जिह्वामूले शब्दसंवित्, इत्येताः प्रवृत्तयः उत्पन्ना श्चित्तं स्थितौ निबध्नन्ति"

Trans.—Who was directing his steadfast gaze at (the extremity of) his nose with his eyes, of which the fierce pupils were rigidly set and darted only a faint glance; which had left off the habit of contracting the

brows; of which the rows of eye-lashes were motionless; and of which the light went downwards.

अनुवाद—जिन की पुतलियां स्थिर और किंचित् भासमान थीं, जिन्हों ने भृकुटी विलास सम्पूर्णतया भुला दिया था, जिन की पलकें अचालित थीं, और जिन की ज्योति नीचे की ओर पड़ती थी वे शिवजी महाराज अपने नासिका (का अग्रभाग) टिकटिकी बांध कर उन आंखों से देख रहे थे ॥ ४७ ॥

अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम् ।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम् ॥४८॥

अवृष्टीति ॥ (**अन्तश्चराणां**) अन्तश्चरन्तीत्यन्तश्चरा: तेषां **मरुतां** प्राणादीनां **निरोधात्** हेतोः **अवृष्टिसंरम्भम्** अविद्यमानवर्षसंभ्रमम् **अम्बुवाहम इव** स्थितम् । एतेन प्राणनिरोधः सूचितः । **अनुत्तरङ्गम्** अनुद्भततरङ्गम् **अपामाधारं** ह्रदं **इव** स्थितम् । एतेनापाननिरोधः सूचितः । तथा (**निवातनिष्कम्पम्**) निवाते निर्वातदेशे निष्कम्पं निश्चलं **प्रदीपम इव** स्थितम् । एतेन शेषवायुनिरोधः सूचितः । निवातावाश्रयावातौ इत्यमरः ॥

Notes.—**अन्तश्चराणां मरुतां**,—The internal vital airs are five :—(*i*) प्राण, which moves in the heart, (*ii*) उदान, which rises up the throat and enters into the head, (*iii*) अपान, which goes downwards and out at the anus, (*iv*) समान, which keeps about the navel and helps digestion, and (*v*) व्यान, which moves in the entire system. The tranquil, statuesque figure of Siva is described in three beautiful similes, viz.—of a rain-cloud containing its waters within itself, of a lake where no ripples disturb the calmness of its surface, and of a flame burning steadily in a sheltered spot.

Trans.—Who, on account of controlling the internal (vital) airs, seemed like a rain-cloud restraining within itself its tumultuous outbursts which precede rain, or like a receptacle of waters no more disturbed by ripples, or like an unquivering flame in a sheltered spot.

अनुवाद—शरीरान्तरगत प्राणादि वायुओं के निरोध के कारण वे वर्षा से पूर्व होने वाली मेघ-गर्जना रहित मेघों की नाईं अथवा अनुत्तरङ्गित समुद्र की नाईं अथवा निर्वात स्थान में स्थिर भांति जल रहे दीप की नाईं दीखते थे ॥ ४८ ॥

कपालनेत्रान्तरलब्धमार्गैर्ज्योतिःप्ररोहैरुदितैः शिरस्तः।
मृणालसूत्राधिकसौकुमार्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः॥४९॥

कपालेति ॥ (**कपालनेत्रान्तरलब्धमार्गैः**) कपालनेत्रान्तरेण ब्रह्मकरोटिनेत्रविवरेण लब्धमार्गैः **शिरस्तः** ब्रह्मरन्ध्रात्। पञ्चम्यास्तसिल्। **उदितैः** उद्गतैः **ज्योतिःप्ररोहैः** तेजोङ्कुरैः (**मृणालसूत्राधिकसौकुमार्यां**) मृणालसूत्राधिकं सौकुमार्यं मार्दवं यस्यास्तां **बालस्य इन्दोः** शिरश्चन्द्रस्य **लक्ष्मीं ग्लपयन्तम्** ॥

Notes.—कपालनेत्र-, 'eye in the cranium'. It is believed that there is a very narrow cranny in the bones enveloping the brain, which lets out holy lustre when a man meditates excessively. Cf. Vyasa's remark on Pat. Yog. 3. 32. "शिरःकपाले अन्तःछिद्रं प्रभास्वरं ज्योति......" This cranny is the eye referred to here. In शिरस्तः we have the abl. तस्.

Trans.—Who was throwing into the background the charm, more delicate than a lotus fibre, of the crescent moon, by the rays of light issuing from the head and making their way out through the eye in the cranium.

अनुवाद—उन के ब्रह्मरन्ध्र से कपालनेत्र के छिद्र के मार्ग से निकल रही तेज की किरणें बिस-तन्तुओं से अधिक कोमल नये चांद की चांदनी को मात कर रही थीं ॥ ४९ ॥

मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम् ॥ ५० ॥

मन इति ॥ (**नवद्वारनिषिद्धवृत्ति**) नवभ्यो द्वारेभ्यो निषिद्धा निवर्तिता वृत्तिः संचारो यस्य तत्तथोक्तम्। (**समाधिवश्यं**) समाधिना प्रणिधानेन वश्यं वशंगतम्। यत्प्रत्ययः। प्रणिधानं समाधानं समाधिश्च समाश्रयः। इति हलायुधः **मनः हृदि** हृदयाख्येऽधिष्ठाने **व्यवस्थाप्य**। तथा च वसिष्ठः-यतो निर्याति

विषयान्यस्मिंश्चैव प्रलीयते। हृदयं तद्विजानीयान्मनसः स्थितिकारणम् ॥ इति। क्षेत्रविदः क्षेत्रज्ञाः पुरुषाः यं न क्षरति इति **अक्षरम्** अविनाशिनं **विदुः** विदन्ति। विदो लटो वा इति झेः जुस्। **तम् आत्मानम् आत्मनि** स्वस्मिन् **अवलोकयन्तं** साक्षात्कुर्वन्तम्। स्वातिरेकेण परमात्मनोऽभावादिति भावः ॥

Notes.—नवद्वार निषिद्धवृत्ति, 'the activity through the nine gates of which was completely suspended.' The nine gates are the nine openings in the human body through which contact with the outer world takes place. These are :— two ears, two eyes, two nostrils, and the mouth in the head, and in the other half of the body the anus and the organ of generation. वश्य, adj. 'under the control of'. Suf. यत्. Pan. 4. 4. 86. वशं गतः. अक्षर, the Eternal Spirit. Anal. न क्षरति इति. क्षेत्रविदः, 'those who are versed in spiritual knowledge'. Literally, क्षेत्र is the field (of action), the human body, and क्षेत्रविदः are those 'who accurately know the worth of the human body'. आत्मानम् आत्मन्यवलोकयन्तम्, 'realising in himself his own self'. Cf. Pat. Yog. 1. 2. तदा द्रष्टुः, स्वरूपे ऽवस्थानम्.

Trans.— Who, fixing in his heart his mind which was controlled by deep concentration and, the activity through the nine gates of which was completely suspended, was seeing in himself his own self, which those versed in spiritual knowledge call Spirit Eternal.

अनुवाद—पूर्ण नव द्वारों की रुकी वृत्ति वाले और समाधि द्वारा वश में किये अपने मन को हृदय में स्थापित कर वे उन आत्मा का जिनको योगी लोग अविनाशी जानते हैं अपने आत्मा में दर्शन कर रहे थे ॥ ५० ॥

स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाऽप्यधृष्यम्।
नालक्षयत्साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात् ॥५१॥

स्मरेति ॥ **स्मरः** कामः **तथाभूतं** पूर्वोक्तरूपं **मनसा अपि अधृष्यम्**

अयुग्मनेत्रं विषमाक्षम् अदूरात् पश्यन्। (साध्वससन्नहस्तः) साध्वसेन सन्नहस्तो विश्लथपाणिः सन्। स्वहस्तात् स्रस्तं शरं चापम् अपि चापं च न अलक्षयत् न विवेद। भीतो मुह्यतीति भावः॥

Notes.—तथाभूतम्, 'in that posture', as described in sl. 44—50. अयुग्मनेत्रं, 'having an cdd number of (*i. e.* three) eyes'. It is an epithet of Siva. साध्वस-सन्नहस्तः, 'with his hand relaxing its grip through awe.' Cupid was so frightened by the terrible Siva that he clean forgot his mission, and stood all breathless like a statue. He did not notice even the bow dropping down from his hand.

Trans.—The moment Cupid looked at him, the three-eyed god, who was not to be assailed even in thought, in that (terrible) posture, he, whose hand had relaxed its grip through awe, did not peceive even the bow and the arrow dropping from his hand.

अनुवाद—मन से भी आक्रमण न किये जाने वाले उक्तभांति समाधि लगाये शिव जी महाराज को देख कर काम देव के हाथ भय के मारे सन्न से होगये और उसे अपने हाथ से धनुष् और बाण के गिरने का ज्ञान भी न हुआ॥ ५१॥

निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या॥ ५२॥

निर्वाणेति॥ अथ निर्वाणेन नाशेन भूयिष्ठं निर्वाणभूयिष्ठम्। नष्टप्रायमित्यर्थः। अस्य स्मरस्य वीर्यं बलं वपुर्गुणेन सौन्दर्येण सन्धुक्षयन्तीव पुनरुज्जीवयन्तीव स्थिता वनदेवताभ्यां सखीभूताभ्याम् अनुप्रयाता अनुगता स्थावरराजकन्या पार्वती अदृश्यत दृष्टा॥

Notes.— निर्वाणभूयिष्ठम्, 'well nigh dead'. For निर्वाण *vide supra* sl. 2. 23. Anal. निर्वाणेन भूयिष्ठम् इति (Malli.) सन्धुक्षयन्ती इव, 'kindling (afresh), as it were'. Cf. Punj. अग्ग धुखाना. As chaff-fire well nigh extinguished blazes up again, so Cupid's almost dead spirit was re-

inspired with fresh life. **वनदेवताभ्याम्** ,—" जयाविजयाभ्यां" (Charitravardhana).

Trans.—At that very moment was beheld the daughter of the Mountain-King followed by the two sylvan deities, (her female friends), kindling anew his well-nigh extinguished spirit by the beauty of her person.

अनुवाद—उस ही समय काम के नष्टप्राय वीर्य्य को पुनः जीवित करती हुई अपनी सहेलियों वनदेवियों के सङ्ग जाती हिमालय की पुत्री पार्वती उस के दृष्टिगोचर हुई ॥ ५२ ॥

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती ॥ ५३ ॥

अशोकेति । (**अशोकनिर्भर्त्सितपद्मरागम्**) अशोकपुष्पेण निर्भर्त्सितास्तिरस्कृताः पद्मरागा येन तत्तथोक्तम् । (**आकृष्टहेमद्युतिकर्णिकारम्**) आकृष्टहेमद्युतीनि आहृतस्वर्णाभरणवर्णानि कर्णिकाराणि यस्मिंस्तत्तथोक्तम् । (**मुक्ताकलापीकृतसिन्धुवारं**) मुक्ताकलापीकृतानि सिन्धुवाराणि निर्गुण्डीकुसुमानि यस्मिंस्तत् । सिन्धुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि । इत्यमरः वसन्तपुष्पाण्येवाभरणं (**वसन्तपुष्पाभरणं**) वहन्ती ॥

Notes—.**अशोकनिर्भर्त्सितपद्मरागम्**, ' which by its Asoka flowers surpassed the red glitter of the rubies '. **निर्भर्त्सित** lit. means ' reproached '. —**कर्णिकारम्** ,—The Karnikara has a rich golden hue. **मुक्ताकलापीकृतसिंधुवारम्** , ' in which the Sindhuvara flowers shone like (lit. made) a pearl-necklace.

Trans—. Bearing ornaments of spring-blossoms, which by their Asoka flowers excelled the red beauty of the rubies, in which the Karnikaras put into shade the rich lustre of gold, and wherein the Sindhuvaras shone like a pearl-necklace.

अनुवाद—वह वसन्तऋतु के पुष्पों के भूषण से सुभूषित थी, जिस में अशोक पुष्प पद्म की लाली को मात करता था, कर्णिकार कुन्दन से बढ़कर चमकता था और सिंधुवार के फूल मोतियों के गुच्छे प्रतीत होते थे ॥ ५३ ॥

आवर्जिता किंचिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम्।
पर्याप्तपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविनी लतेव॥ ५४॥

आवर्जितेति॥ **स्तनाभ्यां किंचिद् आवर्जिता** ईषदानमिता **इव**। तरुणार्कस्य राग इव रागो यस्य तत (**तरुणार्करागं**) बालार्कारुणामित्यर्थः। उपमानपूर्वपदो बहुव्रीहिरुत्तरपदलोपश्च। **वासो वसाना** आच्छादयन्ती। अत एव **पर्याप्तपुष्पस्तबकावनम्रा पल्लविनी** किसलयवती **सञ्चारिणी लतेव**। स्थितेति शेषः॥

Notes—.पर्याप्तपुष्प......लतेव, 'like some moving creeper covered all over with glistening foliage and inclining under (the weight of) rich clusters of blossoms'. पल्लव, 'a new, glistening leaf'.

Trans—.Stooping to some extent under the weight of her breasts and putting on a garment sparkling red like the lustre of the morning sun, thus seeming like some moving creeper covered all over with glistening leaves and inclining under the weight of rich clusters of blossoms.

अनुवाद—उस की छाती कुछ नीचे झुकी हुई थी और वह प्रातःकाल के सूर्य्य के प्रकाश के समान रक्तवर्ण वस्त्र धारण किये हुए थी। ऐसा प्रतीत होता था मानो लाल लाल पत्तियों से सुभूषित कोई लता (भूमि पर) चल रही है॥ ५४॥

स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम्।
न्यासीकृतां स्थानविदा स्मरेण मौर्वीं द्वितीयामिव कार्मुकस्य ५५

स्रस्तामिति॥ **स्थानविदा** निक्षेपयोग्यस्थानवेदिना **स्मरेण न्यासीकृता** निक्षेपीकृताम्। (**कार्मुकस्य**) कर्मणि प्रभवतीति कार्मुकं धनुः। कर्मण उकञ् इत्युकञ्प्रत्ययः तस्य। **द्वितीयां मौर्वीम् इव** स्थिताम्। अत्र हि न्यस्ता मौर्व्युत्तरत्र हरवैरनिर्यातनायोपयुज्यत इति भावः। **नितम्बात्स्रस्तां** चलितां (**केसरदामकाञ्चीम**) केसरदाम बकुलमाला सैव काञ्ची तां **पुनः पुनः अवलम्बमाना** हस्तेन धारयन्ती॥

Notes.—अवलम्बमाना, 'replacing' the girdle at its proper place. यथास्थानम् अर्पयन्ती (Charitravardhana).

केसरदामन्, 'a string of Kesara flowers'. न्यासीकृतां, 'deposited'. स्थानविद्, 'who knew the place (where his bow-string could be safely placed)'. One deposits one's property there whence he can hope to recover. Cupid, who knew the safe place for his deposit, hung his bow-string, the flowery girdle, round Parvati's waist. कार्मुकस्य, *vide supra* sl. 4.

Trans.—Replacing (with her hand) again and again her girdle consisting of a string of Kesara-blossoms, the girdle which would slip down from her buttock, and which had been deposited there as the *second* string for his bow by Cupid who knew the safe place (for it).

अनुवाद—वह बकुलमाला की नीचे सरक आई पेटी को, जिसे उचित स्थान के ज्ञाता कामदेव ने अपने धनुष् की दूसरी डोरी जान वहां रखा हुआ था पुनः पुनः ऊपर उठाती थी ॥ ५५ ॥

सुगन्धिनिःश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम्।
प्रतिक्षणं संभ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ॥ ५६ ॥

सुगन्धीति ॥ (**सुगन्धिनिःश्वासविवृद्धतृष्णं**) सुगन्धिभिर्निःश्वासैर्विवृद्धतृष्णम्। बिम्बतुल्योऽधरो बिम्बाधरः। वृत्तौ मध्यपदलोपः स्यात् इति वामनः। तस्यासन्नचरं सन्निकृष्टचरं **द्विरेफं** भृङ्गं **प्रतिक्षणं** (**संभ्रमलोलदृष्टिः**) संभ्रमेण लोलदृष्टिश्चलाक्षी सती **लीलारविन्देन निवारयन्ती** ॥

Notes.—सुगन्धिनिश्वासविवृद्धतृष्णं, 'whose thirst grew worse by her fragrant breath'. Parvati's breath had the sweet fragrance of a lotus, and the bee was deceived into thinking that the breath which came from her mouth came verily from a lotus. Cf. a similar description in Sak. Act 1. सुगन्धि,—It is a bahuvr. comp., hence the final इ. Pan. 5. 4. 135. गन्धस्येदुत्पूतिसुसुरभिभ्यः. लीलारविन्दम, 'a lotus taken sportively in hand out

of mere pleasure'. Anal. लीलायाः अरविन्दम्, though there is dative relation between the component members.

Trans.—Every moment keeping off with her sportive lotus the bee, whose thirst grew worse by her fragrant breath and which, therefore, kept hovering in the vicinity of her *bimba*-like lower lip, her glance (all the while) quivering through confusion.

अनुवाद—घबराहट के मारे उसकी दृष्टी इधर उधर दौड़ती थी, वह अपने क्रीड़ा-कमल से उस भौंरे को प्रतिक्षण हटाती थी जो उस के निचले बिम्ब-समान होंठ के निकट विचर रहा था और जिस की पिपासा उस के सुगन्धित निश्वास से अधिक हुई जाती थी ५६ ॥

तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे ॥५७॥

तामिति ॥ (**सर्वावयवानवद्याम्**) सर्वावयवेष्वनवद्यामगर्ह्याम् । अवद्यपराय॰ इति निपातः । **रतेः** कामकलत्रस्य **अपि ह्रीपदं** लज्जानिमित्तम् । **आदधानाम्** । न्यूनतामावहन्तीमित्यर्थः । **तां** पार्वतीं **वीक्ष्य पुष्पचापः** कामः **जितेन्द्रिये** । दुर्जयेऽपीत्यर्थः । **शूलिनि** शिवे विषये **स्वकार्यसिद्धिं पुनः आशशंसे** चकमे । पूर्वं साध्वससन्नहस्तः (३ । ५१) इत्यादिना कार्यसिद्धेरुन्मूलितत्वाभिधानादिह पुनरित्युक्तम्

Notes.—अवद्य, is formed from √वद् and is preceded by the negative अ. According to the rule अवद्य-पराय-वर्या गर्ह्यपणितव्यानिरोधेषु Pan. 3. 1. 101. it is restricted to the sense गर्ह्य ('fit to be censured'). In other senses the form is अनुद्य 'not to be mentioned'. E. g. अनुद्या स्त्रिणां भर्तुराख्या 'women must not mention the name of their husbands'. **अनवद्य** is a negative of the negative and means 'faultless, blameless'. शूलिन्, 'the Trident-holder'. The contrast शूलिनि पुष्पचापः is the same as in कुसुमायुधोपि...पिनाकपाणेः. *Vide supra* sl. 10.

Trans.—Remarking her as being perfect in all her limbs, so much so that, (to see her), even Rati could

not but blush, the god of the flowery bow vowed again the success of his mission against the self-controlled Trident-holder.

अनुवाद—उसे समग्र अङ्गों में पूर्णसौन्दर्य-युक्त और रति को भी लज्जाती हुई देख कर पुष्पास्त्रधारी काम देव को जितेन्द्रिय शूलभृत् शिवजी महाराज के विषय में अपनी कार्य्य-सिद्धि की नये सिरे से आशा हुई ॥ ५७ ॥

भविष्यतः पत्युरुमा च शंभोः समाससाद प्रतिहारभूमिम् ।
योगात्स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ॥ ५८ ॥

भविष्यत इति ॥ **उमा च भविष्यतः पत्युः शंभोः प्रतिहारभूमिं** द्वारदेशं **समाससाद** । स्त्री द्वार्द्वारं प्रतीहारः इत्यमरः । **स** शंभुः **च अन्तः** (**परमात्मसंज्ञम्**) परमात्मेति संज्ञा यस्य तत् **परं** मुख्यम् । परं दूरान्यमुख्येषु इति यादवः । **ज्योतिः दृष्ट्वा** साक्षात्कृत्य **योगात्** ध्यानात् । योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु । इत्यमरः । **उपारराम** उपरतः । व्याङ्परिभ्यो रमः इति परस्मैपदम् ॥

Notes.—**च...च**, express the simultaneity of the two actions. The moment Parvati came to the entrance of the hermitage, Siva broke his trance. **उपारराम**, 'ceased (from meditation)'. उप√रम् takes Parasmaipada. Pan. 1. 3. 83.

Trans.—Uma reached the threshold (of the hermitage) of Sambhu, her future lord; and immediately Sambhu, too, realising the *holy light*, the Supreme Soul, ceased from meditation (*i. e.* ended his trance).

अनुवाद—ज्यूंही पार्वती अपने भावी पति शिवजी महाराज की कुटिया के द्वार पर आई उसी समय महाराज ने परम ज्योतिःस्वरूप परमात्मा को साक्षात् करके अपना योग समाप्त किया ॥ ५८ ॥

ततो भुजङ्गाधिपतेः फणाग्रैरधः कथंचिद्धृतभूमिभागः ।
शनैः कृतप्राणविमुक्तिरीशः पर्यङ्कबन्धं निबिडं बिभेद ॥ ५९ ॥

तत इति ॥ **ततः भुजङ्गाधिपतेः** शेषस्य **फणाग्रैः अधः** भूमेरधः **कथंचित्** अतियत्नेन **धृतभूमिभागः** धृतो भूमिभागः स्वोपवेशनभूभागो यस्य स तथोक्तः । वायुधारणाद्दितलाघवनिवृत्त्या भगवतो महत्त्वादिति भावः ।

शनैः कृता प्राणानां प्राङ्निरुद्धानां विमुक्तिः पुनः सञ्चारो येन स कृतप्राणविमुक्तिः ईशः निबिडं दृढं पर्यङ्कबन्धं वीरासनं बिभेद शिथिलीचकार ॥

Notes—अधः 'from below'. कथंचिद्धृतभूमिभागः, 'the seat (lit. the portion of the earth) of whom was borne up with difficulty.' शनैः कृतप्राणविमुक्तिः 'who slowly let out the vital air'. It is a familiar maxim to breathe out slowly through the nostrils, when a man wants to end his Pranayama, before he draws in his normal breath. निबिडं, 'firm'.

Trans.—Then slowly letting out the vital air (which was pent inside), the Lord, the ground-where-he-sat of whom had been borne up with extreme difficulty from below on his hoods by the King of the Serpents, ended his firm Virasana.

अनुवाद—फिर महाराज ने, जिन्हों की आसन-भूमि सर्पों के अधिपति शेषनाग ने कठिनता से ऊपर उठाई हुई थी शनैः शनैः रोके हुए प्राणों को छोड़ा और अपना दृढ़ वीरासन तोड़ा ॥ ५६ ॥

तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ॥ ६० ॥

तस्मा इति ॥ अथ **नन्दी तस्मै** भगवते । क्रियाग्रहणाच्चतुर्थी । **प्रणिपत्य** नमस्कृत्य **शुश्रूषया** सेवया निमित्तेन **उपेताम्** सेवार्थमागतामित्यर्थः । **शैलसुतां शशंस** निवेदयामास । **भर्तुः** स्वामिनः (**भ्रूक्षेपमात्रानुमतप्रवेशां**) भ्रूक्षेपमात्रेण असंज्ञयैवानुमतप्रवेशामङ्गीकृतप्रवेशाम् **एनां शैलसुतां प्रवेशयामास च** ॥

Notes.—Mark how the direct form which makes a complex sentence (अत्र) शैलसुता शुश्रूषया उपेता इति नन्दी तस्मै शशंस is compressed into a compact simple sentence. The relative clauses which are seen so common in the English language are preferably expressed in Sanskrit by participles.

Trans.—Paying due homage to his lord, Nandi begged to inform him that the daughter of the Mountain-

King stood (at the door) longing to wait upon him; and then admitted her to the Lord's presence, her admittance having been allowed by a mere hint of his eye-brow.

अनुवाद—तब नन्दी ने प्रणाम कर उस से निवेदन किया कि महाराज हिमालय की पुत्री आप की सेवा करने आई है । उन्हों ने भौंह से इशारा कर पार्वती को (आने की) अनुज्ञा दी और नन्दी ने उसे अन्दर प्रवेश कराया ॥ ६० ॥

तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥ ६१ ॥

तस्या इति ॥ **तस्याः** पार्वत्याः **सखीभ्यां** पूर्वोक्ताभ्यां (**स्वहस्तलूनः**) स्वहस्तेन लूनः उपचितः **पल्लवभङ्गभिन्नः** किसलयशकलमिश्रः **शिशिरात्ययस्य** वसन्तस्य संबन्धी **पुष्पोच्चयः** पुष्पप्रकरः । हस्तादाने चेरस्तेये इति घञ्विषयत्वात्कवीनामयं प्रामादिकः प्रयोगः इति वल्लभः । **त्र्यम्बकपादमूले प्रणिपातपूर्वं** नमस्कारपूर्वकं **व्यकीर्यत** विक्षिप्तः ॥

Notes.—**शिशिरात्ययस्य,** 'of spring'. Literally it means 'of the end of winter'. **व्यकीर्यत** 'was scattered'; लङ्, pas. 3rd per. sing. from वि√कॄ 6 p. **त्र्यम्बक-,** *vide* note on त्रियम्बक *supra* sl. 44. **पुष्पोच्चयः,** 'a collection of flowers'. According to Pan. 3. 3. 40. हस्तादाने चेर् अस्तेये the root चि takes the suf. घञ्, if plucking with the hand is meant and theft is not implied. The flowers were doubtless plucked with the hand (स्वहस्तलून), and theft is nowhere implied, hence the grammatically correct form would be पुष्पोच्चायः. In the sense of 'mere collection' we may have उच्चयः. **पल्लवभङ्गभिन्नः** 'mixed with bits of tender leaves'

Trans.—Obeisance done, her two friends spread spring flowers (lit. a collection of flowers) mixed with bits of tender leaves plucked with their own hands at the feet of Siva.

अनुवाद—उस की सहेलियों ने अपने हाथ से तोड़े हुए और पत्तियों के टुकड़ों से मिश्रित वसन्त ऋतु के फूल त्रिनेत्र शिवजी के पैरों पर प्रणामपूर्वक बिखेरे ॥ ६१ ॥

उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ॥ ६२ ॥

उमेति ॥ **उमापि** (**नीलालकमध्यशोभि**) नीलालकानां मध्ये शोभत इति तथोक्तम् । अलकान्यस्तमित्यर्थः । **नवकर्णिकारं विस्रंसयन्ती** (**कर्णच्युतपल्लवेन**) कर्णात् च्युतः पल्लवो यस्य तेन कर्णच्युतपल्लवेन **मूर्ध्ना वृषभध्वजाय प्रणामं चकार** । क्रियाग्रहणात्संप्रदानत्वम् ॥

Notes.—नीलालकमध्यशोभि, acc. neu. sing. goes with नवकर्णिकारम्. For anal. see the comm. **विस्रंसयन्ती**, pres. part. from the causal of वि √स्रंस् ' to fall down '.

Trans.—Uma, too, did obeisance to the Bull-bannered god by (bowing down) her head; (and as she did so), the spray adorning her ear dropped down, and the fresh (white) Karnikara, which radiated the gleam from the midst of her locks, slipped down a little.

अनुवाद—उमा ने भी श्यामवर्ण केशों के मध्य शोभा पा रहे नव सुन्दर कर्णिकार पुष्प को ढीला किया और कानों से सुवर्णवर्ण पत्ते गिराती हुई ने सीस निवाकर वृष की ध्वजा वाले शिव जी को प्रणाम किया ॥ ६२ ॥

अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन ।
न हीश्वरव्याहृतयः कदाचित्पुष्णन्ति लोके विपरीतमर्थम् ॥ ६३ ॥

अनन्येति ॥ **सा** कृतप्रणामा देवी **भवेन** हरेण । अन्यां न भजतीति तम् **अनन्यभाजम्** । भजो ण्विः इति ण्विप्रत्ययः । सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः । **पतिमाप्नुहीति तथ्यं** सत्यम् **एव अभिहिता** उक्ता । उत्तरत्र तथैव संभवादिति भावः । अभिदधातेर्ब्रुवर्थस्य दुहादित्वादप्रधाने कर्मणि क्तः । तथा हि । **ईश्वरव्याहृतयः** महापुरुषोक्तयः **कदाचित् अपि लोके** भुवने । लोकस्तु भुवने जने इत्यमरः ॥ **विपरीतं** विसंवादिनम् **अर्थम्** अभिधेयं **न पुष्णन्ति** न बोधयन्तीत्यर्थः ॥

Notes.—**तथ्यम्**, ' truth '. The word is connected with तथा ' in that manner ' and means तथात्वम् ' the true

state of a thing'. Cf. also याथातथ्यम् 'truth' from यथातथा. अभि√धा and व्या√हृ, both mean 'to speak'. न पुष्णन्ति विपरीतम् अर्थम्, 'do not bear a contrary meaning, do not interpret otherwise'.

Trans.—"Mayest thou get a husband solely devoted to you". And she was, indeed, told the truth by Siva; for, sure, the words of the gods never interpret otherwise in this world.

अनुवाद—और शिव जी ने उस से सत्य कहा "तुझे किसी अन्य स्त्री से स्नेह न करने वाला पति प्राप्त होगा"। महापुरुषों के वचन संसार में कभी भी मिथ्या सिद्ध नहीं होते ॥ ६३ ॥

कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद्वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ॥ ६४ ॥

काम इति ॥ **कामस्तु बाणावसरं प्रतीक्ष्य** उमासन्निधानादयमेव बाणप्रयोगसमय इति ज्ञात्वा पतङ्गेन तुल्यं **पतङ्गवत्** शलभवत् । समौ पतङ्गशलभौ इत्यमरः । तेन तुल्यं क्रिया चेद्वतिः इति वतिप्रत्ययः । **वह्निमुखं विविक्षुः** प्रवेष्टुमिच्छुः । विशतेः सन्नन्तादुप्रत्ययः । उमायाः समक्षमक्ष्णोः समीपम् **उमासमक्षम्** । अव्ययीभावे शरत्प्रभृतिभ्यः इति समासान्तोऽच्प्रत्ययः । (**हरबद्धलक्ष्यः**) हरे बद्धलक्ष्यः सन् । **शरासनज्यां** मौर्वीं **मुहुः आममर्श** परामृष्टवान् ॥

Notes.—**पतङ्गवद्वह्निमुखं विविक्षुः** 'desirous of pushing into the mouth of fire'. विविक्षुः 'one who desires to enter' is a desid. noun from the root विश् 'to push into, to enter' **आममर्श,** 'touched' from आ√मृश 'to touch.'

Trans.—Observing that that was the right opportunity for (discharging) his arrow, Kama, as if anxious like a moth to push into the mouth of fire, touched, taking his aim at Hara who stood before Uma, his bow-string again and again.

अनुवाद—उस समय को काम ने अपना बाण चलाने का अवसर जान अग्नि के मुख में प्रविष्ट होने के इच्छुक पतङ्गे की नाईं उमा की ओर आंख किये शिव को अपना निशाना बनाते हुए अपने धनुष की डोरी बार बार खींची ॥ ६४ ॥

अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ॥ ६५ ॥

अथेति ॥ **अथ गौरी** । तपोऽस्यास्तीति तपस्वी । अस्मायामेधास्रजो विनिः इति विनिप्रत्ययः । तस्मै **तपस्विने गिरिशाय ताम्ररुचा** रक्तवर्णेन **करेण भानुमतो** अंशुमतः **मयूखैः विशोषितां** (**मन्दाकिनीपुष्करबीजमालाम्**) मन्दाकिन्याः पुष्कराणि पद्मानि तेषां बीजानि तेषां मालां जपमालिकाम् **उपनिन्ये** समर्पितवती ॥

Notes.—उपनिन्ये 'offered (to)'; लिट् 3rd per. sing. mid. voice. from उप √नी IU. 'to present, to offer'. **गिरिशाय,** 'to Siva'. The verbs of giving, presenting, offering, etc. govern the dative case. **भानुमतः,** 'of the sun'. Anal. भानवः (rays) अस्य सन्ति इति. **पुष्कर-,** 'a lotus'.

Trans.—Then Parvati offered to Siva, the Great Penitent, a garland of lotus-seeds of the river Mandakini dried by the rays of the sun with her hand of rosy colour.

अनुवाद—उस समय पार्वती ने तपस्वी शिव जी महाराज को तांबे की नाईं रक्तवर्ण हाथ से सूर्य की किरणों से सूख गई मन्दाकिनी नदी के कमल-बीजों की माला दी ॥ ६५ ॥

प्रतिग्रहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमे च ।
संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ॥ ६६ ॥

प्रतिग्रहीतुमिति ॥ **त्रिलोचनः च प्रणयिप्रियत्वाद्** अर्थिप्रियत्वात् **ताम्** अक्षमालां **प्रतिग्रहीतुं** स्वीकर्तुम् **उपचक्रमे** । पुष्पं धनुर्यस्य स **पुष्पधन्वा** कामः **च** । वा संज्ञायाम् इत्यनङादेशः । संमोह्यतेऽनेनेति **संमोहनं नाम** । नामेति प्रसिद्धौ । **अमोघं बाणं** सायकं **धनुषि समधत्त** संहितवान् ॥

Notes.—**प्रणयिप्रियत्वात्,** 'out of love for his suppliants'. The meaning is, 'Siva loves his votaries and therefore'. **त्रिलोचन,** paraphrases त्र्यम्बक. **उपचक्रमे** 'began, moved (to)'. √ क्रम् preceded by the prep. उप takes mid. voice, when the movement signifies the commencement

of an action. **संमोहनं,** ' which steeps the lover in craze for the beloved '. It is one of the five arrows of Cupid. The other four are उन्मादन, तापन, शोषण, and स्तम्भन. This classification has reference to the changes which Cupid produces in the minds of the lovers. The other enumeration अरविन्दम् अशोकं च चूतं च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायका ॥ has reference to vernal beauty which awakens the thoughts of love. **समधत्त,**-सम् √धा means ' to fit (an arrow) '. Cf. Raghu. 3. 53. नवाम्बुदानीकमुहूर्तलाञ्छने धनुष्यमोघं समधत्त सायकम् ॥

Trans.—The Three-eyed God, from mere love for his worshippers, moved to take that garland and that very moment the god of the flowery bow fitted his unerring shaft, known by the name of Sammohana, to his bow.

अनुवाद—जहाँ त्रिनेत्र शिव जी महाराज अपने सेवकों के प्रेम के कारण माला ग्रहण करने लगे उसी समय पुष्पधनुर्धारी कामदेव ने कभी निष्फल न जाने वाला सम्मोहन नाम तीर अपने धनुष् पर रखा ॥ ६६ ॥

हरस्तु किंचित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ ६७ ॥

हर इति ॥ **हरस्तु** हरोऽपि **चन्द्रोदयारम्भे अम्बुराशिः किंचित्** ईषत् **परिलुप्तधैर्यः** । न तु प्राकृतजनवदत्यन्तलुप्तधैर्य इति भावः । (**बिम्बफलाधरोष्ठे**) बिम्बफलतुल्योऽधरोष्ठो यस्य तस्मिन् **उमामुखे विलोचनानि व्यापारयामास** । त्रिभिरपि लोचनैः साभिलाषमद्राक्षीदित्यर्थः । एतेन भगवतो रतिभावोदय उक्तः ॥

Notes.—**किञ्चित्परिलुप्तधैर्यः,** ' whose equanimity was disturbed to some extent '. Siva allowed himself this much latitude to see what those feelings meant and how they could disturb his ascetic mind at all. **चन्द्रोदयारम्भ इवाम्बुराशिः,** The significant point about the

simile is that the surface of an ocean may be ruffled a little, but it will never betray its shallowness. Siva, likewise, felt the influence of love; but he could not, in the fitness of things, prove his long-continued meditation a mere farce.

Trans.—Hara, whose composure was disturbed a little, and who thus resembled an ocean (ruffled in some measure) at the rising of the moon, directed his eyes towards Uma's face, the underlip of which was (red) like the Bimba fruit.

अनुवाद—चन्द्र के उदय समय समुद्र की नाईं किसी अंश में धीरता नष्ट हुए शिव जी महाराज ने बिम्बफलसमान निचले होंठ से सुभूषित उमामुख पर दृष्टि डाली ॥ ६७ ॥

विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥ ६८ ॥

विवृण्वतीति ॥ **शैलसुतापि स्फुरद्बालकदम्बकल्पैः** विकसत्कोमलनीपसदृशैः पुलकितैरित्यर्थः । ईषदसमाप्तौ—इत्यादिना कल्पप्प्रत्ययः । **अङ्गैः भावं** रत्याख्यं **विवृण्वती** प्रकाशयन्ती **चारुतरेण पर्यस्तविलोचनेन** व्रीडाविभ्रान्तनेत्रेण **मुखेन** असाचि साचि संपद्यमाना **साचीकृता** तिर्यक्कृता । तिर्यगर्थे साचि तिरः इत्यमरः । **तस्थौ** । ह्रिया मुखं साचीकृत्य स्थितेत्यर्थः । न केवलं हरस्यैव देव्या अप्युदितो रतिभाव इति भावः ॥

Notes.—**विवृण्वती...भावम्**, 'betraying her passion'. विवृण्वती f. nom. sing. from the pres. part. of वि √वृ 5U. 'to reveal, to betray'. **स्फुरद्बालकदम्बकल्पैः**, 'like young Kadambas fully blossomed'. Parvati's hair stood on end, and thus her limbs resembled Kadamba flowers in full bloom. The suffix—**कल्प** means 'almost'. **साचीकृत** 'thrown aside, hung down'. साचि indec. means 'obliquely, crookedly'. **पर्यस्त—**, "अधः पतित" (Charitravardhana). Malli. paraphrases the idea better.

Trans.—The daughter of the Mountain, too, betraying her love by her limbs which resembled young Kadambas fully blossomed, stood hanging down her face, which was lovelier than bewildered looks.

अनुवाद—पार्वती भी नये खिले कदम्बों की नांई पुलकित अंगों से अपने प्रेमभाव को प्रकाशित करती हुई लज्जा के कारण विभ्रान्त नेत्रों से अधिक सुन्दर मुख नीचे की ओर किये ठहरी ॥ ६८ ॥

अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद्बलवन्निगृह्य ।
हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम् ॥ ६९ ॥

अथेति॥ अथ अयुग्मानि नेत्राणि यस्य सः **अयुग्मनेत्रः** त्रिनेत्रः **वशित्वात्** जितेन्द्रियत्वात् **इन्द्रियक्षोभं** पूर्वोक्तमिन्द्रियविकारं **पुनर्बलवत्** दृढं **निगृह्य** निवार्य **स्वचेतोविकृतेः** स्वचित्तविकारस्य **हेतुं** कारणं **दिदृक्षुः** द्रष्टुमिच्छुः **दिशामुपान्तेषु दृष्टिं ससर्ज** प्रसारयामास ॥

Notes.—**इन्द्रियक्षोभम्**, 'the restlessness of the senses'. **इन्द्रिय**—Already in Rigveda we find इन्द्र conceived as आत्मन्. Senses and sense-organs, sign-posts leading to the soul, came, then, to be expressed by इन्द्रियs. **वशित्वात्**, 'on account of his self-control'. **बलवत्**, indec. 'strongly, with force'. दिदृक्षुः, 'desirous of seeing', desid. noun from √दृश्.

Trans.—The Three-eyed god, having strongly curbed the restlessness of his senses by his self-control, cast his glance around to the ends of the directions with the object of seeing the cause of the perturbation of his mind.

अनुवाद—फिर त्रिनेत्र शिवजी महाराज ने जितेन्द्रिय होने के कारण अपने क्षुब्ध चित्त को पुनः भली भांति वश में कर लिया और अपने मनोविकार के कारण को देखने की इच्छा से इर्द गिर्द दृष्टि डाली ॥ ६९ ॥

स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ ७० ॥

स इति ॥ स भगवान् (**दक्षिणापाङ्गनिविष्टमुष्टिं**) दक्षिणापाङ्गे निविष्टा स्थिता मुष्टिर्यस्य तं **नतांसम्** (**आकुंचितसव्यपादम्**) आकुञ्चितः सव्यपादो यस्य तम् । आलीढाख्यस्थानके स्थितमित्यर्थः । **चक्रीकृतचारुचापं** मण्डलीकृतसौम्यकोदण्डं **प्रहर्तुमभ्युद्यतमात्मयोनिं** मनोभवं **ददर्श** । आलीढलक्षणमाह यादवः—स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् । वितस्त्यन्तरगौ पादौ मण्डलं तोरणाकृती । समानौ स्यात्समपदमालीढं पदमग्रतः । दक्षिणं वाममाकुञ्च्य प्रत्यालीढं विपर्ययः ॥ इति ॥

Notes.—दक्षिणापाङ्गनिविष्टमुष्टि, 'whose clenched hand (stretching the bow-string to its utmost) rested on the corner of the left eye'. मुष्टि f. is the same as Punj. मुट्ठ. Anal. दक्षिणः अपाङ्गः (corner of the eye) दक्षिणापाङ्गः दक्षिणापाङ्गे निविष्टा मुष्टि र्यस्य इति. **आकुञ्चितसव्यपादम्**, 'who bent his left leg a little'. "ईषन्नमित" (Charitravardhana) Anal. सव्यः (left) पादः सव्यपादः ; आकुञ्चितः सव्यपादः यस्य, तम्. **आत्मयोनिम्** 'Cupid'. Lit. 'originating in the mind'. Cf. मनसिज. The portrayal of Cupid just at the point of discharging his arrow is masterly. His hand firmly stretching the bow-string drawn to his ear, his left leg bent backward to allow him to stretch his bow to the utmost, his depressed shoulders, his bow-staff almost stretched to a circle.,—how graphic this picture is, and how beautiful ! It persists before our eyes.

Trans.—He immediately clapped his eyes on Cupid, whose clenched hand (tightly grasping the bow-string) rested on the corner of the left eye, whose shoulders were depressed, who bent back his left leg a little, who stretched his beautiful bow-staff to the form of a circle, and who was on the point of dealing his blow.

अनुवाद—उन्होंने दक्षिण नेत्र के कोने पर मुट्ठी रखे, कन्धा झुकाये, बायां पैर अन्दर की ओर दबाये और धनुष चक्राकार में खींचे हुए और बाण छोड़ने ही लगे कामदेव को देखा ॥ ७० ॥

तपःपरामर्शविवृद्धमन्यो र्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य ।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ७१

तप इति ॥ (**तपःपरामर्शविवृद्धमन्योः**) तपःपरामर्शेन तपस आस्कन्दनेन विवृद्धमन्योः प्रवृद्धकोपस्य (**भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य**) भ्रूभङ्गेण दुष्प्रेक्ष्यं दुर्दर्शं मुखं यस्य **तस्य** हरस्य **तृतीयाद् अक्ष्णः स्फुरन्** उद्दीप्यमानः **उदर्चिः** उद्धतज्वालः **कृशानुः** अग्निः **सहसा** अतर्कितमेव । अतर्किते तु सहसा इत्यमरः **निष्पपात किल** निश्चक्राम खलु ॥

Notes.—**तपः परामर्श**—, 'on account of this attack on his penance'. **भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य,** 'whose face was difficult to be looked at owing to the contraction of his brow'. दुष्प्रेक्ष्य,—Anal. दुस् + प्र + ईक्ष् (to see) + य (ण्यत्). **उदर्चिः,** 'sending its blaze upwards'. Anal. उद्गतानि अर्चींषि यस्य.

Trans.—Instantly a fire sending its blaze upward flashed forth from the third eye of him, whose indignation had been provoked by the attack on his penance, and whose expression could scarcely be gazed at owing to its (terrible) frown.

अनुवाद—तप पर आक्रमण होने के कारण अतिक्रुद्ध और भौंह चढ़ाने से न देखे जा सके मुख वाले शिव जी महाराज के तीसरे नेत्र से अग्नि, जिसकी ज्वाला ऊपर को उठ रही थी एकाएक निकल पड़ा ॥ ७१ ॥

क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥ ७२ ॥

क्रोधमिति ॥ हे **प्रभो** स्वामिन् **क्रोधं संहर संहर** निवर्तय निवर्तय । चापले द्वे भवत इति वक्तव्यम् इति वार्तिकेन द्वित्वम् । संभ्रमेण प्रवृत्तिश्चापलम् इति काशिका । इति एवं **मरुतां** देवानां **गिरः** वाचः **खे** व्योम्नि **यावत् चरन्ति** प्रवर्तन्ते **तावत्** तत्कालमेव भवस्य नेत्राज्जन्म यस्य स **भवनेत्रजन्मा** । अवश्यं बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः । **स वह्निः मदनं** भस्मैवावशेषो यस्य तं **भस्मावशेषं चकार** । ददाहेत्यर्थः ॥

Notes.—संहर संहरेति. This repetition is expressive of the anxious haste with which gods sought to appease Siva's anger. यावत्—तावत्, expresses simultaneity of the actions. भवनेत्रजन्मा, 'born from Siva's eye'. For anal. see the comm. भस्मावशेषं. 'of whom only ashes remain'. Anal. भस्मैव अवशेषः यस्य, तम्. मरुतां, 'gods'.

Trans.—So soon as the (sighing) voices of the gods, Restrain thy anger, restrain thy anger, O Lord, go about the heavens, the flames born from Siva's eye have reduced the god of love to ashes.

अनुवाद—जितने समय में देवताओं के ये वचन "प्रभो क्रोध शान्त कीजिये" आकाशमण्डल में आते है उतने समय में शिव जी महाराज के नेत्र से उत्पन्न हुए अग्नि ने काम को भस्म कर दिया ॥ ७२ ॥

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥ ७३ ॥

तीव्रेति ॥ **तीव्राभिषङ्गप्रभवेण** अतिदुःसहाभिभवसंभवेन । अभिषङ्गस्त्वभिभवे सङ्ग आक्रोशनेऽपि च इति वैजयन्ती । **इन्द्रियाणां** चक्षुरादीनां **वृत्तिं** व्यापारं **संस्तम्भयता** प्रतिबध्नता **मोहेन** मूर्च्छया । कर्त्रा । **रतिः** मदनभार्या । **मुहूर्तम्** (**अज्ञातभर्तृव्यसना**) अज्ञातं भर्तृव्यसनं भर्तृनाशो यया सा तथोक्ता सती **कृतोपकारेव बभूव** । सहसा दुःखोपनिपातान्मुमूर्च्छेत्यर्थः । मोहेन दुःखसंवेदनाभावात्तस्योपकारकत्वोक्तिः ॥

Notes.—तीव्राभिषङ्गप्रभवेण, 'resulting from this terrible shock'; qualifies मोहेन. संस्तम्भयता,—from सम् √स्तम्भ् 'to paralyse'. Rati fell into a swoon and became unconscious. कृतोपकारेव—. Her swooning was a veritable favour done to her by fate, inasmuch as she was spared the experience of poignant sorrow, which would, otherwise have been her lot.

Trans.—Rati, who that moment had been unconscious of her husband's death, was done a favour, as it

were, by the swoon which, resulting from the terrible shock, paralysed the activity of her senses.

अनुवाद—अतिदुःसह दुःख से उत्पन्न हुई मूर्छा ने रति के इन्द्रिय-व्यवहार को रोका, उसे अपने पति की मृत्यु का भी ज्ञान न हुआ और इस प्रकार कुछ समय मूर्छा ने (तपस्विनी कामपत्नी पर) उपकार किया ॥ ७३ ॥

तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य ।
स्त्रीसन्निकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ॥ ७४ ॥

तमिति ॥ **तपस्वी** तपोनिष्ठो **भूतपतिः** शिवः **तपसः विघ्नम्** अन्तराय-भूतं **तं** कामम् **आशु वज्रः** अशनिः **वनस्पतिं** वृक्षम् **इव अवभज्य** भङ्क्त्वा **स्त्रीसन्निकर्षं** स्त्रीसन्निधानं **परिहर्तुमिच्छन्**। तस्यानर्थहेतुत्वादिति भावः। **सभूतः** सगणः सन् **अन्तर्दधे** ॥

Notes.—**आशु**, ind. **तं वनस्पतिं वज्र इवावभज्य** 'quickly'. 'having blasted him as the lightning-flash does a tree'. वनस्पति, m. 'a tree (lit. lord of woods)'. अवभज्य, absolutive from अव √भञ्ज 'to split, to rive, to cleave asunder'. **अन्तर्दधे**, 'disappeared'. Cf. तिरोदधे in Sl. 2. 62.

Trans.—Having blasted him, the hindrance to his austerities, as the lightning-flash a tree, the Great Penitent, the Lord of All Beings, disappeared together with his attendants with the object of escaping from the company of woman.

अनुवाद—तपस्वी शिव जी महाराज तरुवर-भञ्जक वज्र की नाईं तपोविघ्न काम को शीघ्र ही नष्ट कर स्त्री-संगति से बच कर रहने के विचार से गणों सहित अन्तर्धान हो गये ॥ ७४ ॥

शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथंचित् ॥ ७५ ॥

शैलात्मजेति ॥ **शैलात्मजा** पार्वती **उच्छिरसः** उन्नतशिरसो महतः **पितुः**

अभिलाषं हरो वरोऽस्त्विति मनोरथं **ललितं** सुन्दरम् **आत्मनः वपुः च व्यर्थं** निष्फलं **समर्थ्य** विचार्य **सख्योः समक्षं** पुरः **इति च** हेतुना अधिकं जातलज्जा (**अधिकजातलज्जा**) । समानजनसमक्षमवमानस्यातिदुःसहत्वादिति भावः । **शून्या** निरुत्साहा सती **कथंचित्** कृच्छ्रेण भवनस्याभिमुखी (**भवनाभिमुखी**) **जगाम** ॥

Notes.—उच्चिशरसः 'who held his head high'. It refers to the exalted position of Himalya. The use of the adj. is true even when we consider the lofty peaks of Himalaya. Anal. उन्नतं शिरः यस्य, तस्य. **शून्या**, 'blank, full of dejection'. **कथंचित्**, 'with great difficulty'. This word indicates that she went home oppressed with great shame and agony.

Trans.—Considering the high hopes of her noble father and her own personal charm as utterly useless, the daughter of the mountain went home dispirited and oppressed with shame all the more great since all this took place in the presence of her friends.

अनुवाद—इस घटना के सहेलियों के सम्मुख होने से अधिक लज्जित हुई शैलपुत्री भी अपने महान् पिता की अभिलाषा और अपने शरीर का सौन्दर्य व्यर्थ जान निराशा से पूर्ण बहुदुःखपूर्वक अपने भवन की ओर चल पड़ी ॥ ७५ ॥

सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् ।
सुरगज इव बिभ्रत्पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद्वेगदीर्घीकृताङ्गः ॥ ७६ ॥

सपदीति ॥ **सपदि अद्रिः** हिमवान् (**रुद्रसंरम्भभीत्या**) रुद्रस्य संरम्भात्कोपाद्भीत्या । संरम्भः संभ्रमे कोपे इति विश्वः । **मुकुलिताक्षीं** निमीलितनेत्राम् । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् इति षच्प्रत्ययः । षिद्गौरादिभ्यश्च इति ङीष् । अनुकम्पितुमर्हाम् **अनुकम्प्याम्** । ऋहलोर्ण्यत् इति ण्यत्प्रत्ययः । **दुहितरं दोर्भ्यामादाय** दन्तयोर्लग्नां दन्तलग्नां **पद्मिनीं** नलिनीं **बिभ्रत्सुरगज इव**

(वेगदीर्घीकृताङ्ग) वेगेन रयेण दीर्घीकृताङ्ग आयतीकृतशरीरः सन् । पन्थानं प्रतिगता मार्गानुसारिणी गतिर्यस्य स प्रतिपथगतिः आसीत् ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीवनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्ये मदनदहनो नाम तृतीयः सर्गः ।

Notes.—**सपदि,** indec. 'immediately'. **रुद्रसंरम्भ-भीत्या,** 'from fear of Siva's wrath'. **अनुकम्प्याम्,** 'who deserved to be sympathised', Suf. यत्. **प्रतिपथगतिः,** 'who went his way (no matter whither it led)'. For anal. see the comm. The idea of the phrase is that the mountain went his way with great haste.

Trans.—Taking up into his arms his daughter who deserved pity and who had closed her eyes from fear of Siva's wrath, the Mountain immediately went his way, as does the celestial elephant supporting the tender lotus clinging to his tusk straightening his body to its full length for speed.

अनुवाद—उसी समय हिमालय शिव जी महाराज के क्रोध के डर से आंखें बन्द की हुई अनुकम्पा की पात्र अपनी पुत्री को गोद में ले दांतों में पद्मिनी (कमल) पकड़े हुए दिव्य हाथी की नांई वेग के कारण दीर्घ किये अंगों से जूही तूंही मार्ग पर चल दिया ॥ ७६ ॥